In this analysis what we find is : the self which is a substance is the locus in which the cognition of rose, which is a quality, has arisen through a relationship called inherence. Now the self is called the knower *(jñāta)*. Now he is called conscious *(cetana)*. Because he is named cetana(conscious), it implies that he possesses a property *(dharma)* called caitanya(consciousness). He is not identical with consciousness but possesses consciousness. This consciousness is nothing but jñāna which is a special quality of the self. This jñāna is a member of the internal world because it is an inner state and is never found to exist in any other substance. This inner state *(jñāna)* prompts all human behaviour *(sarva-vyavhara-karana)*. It is because of the occurrence of the inner state the self performs a function. The inner state itself is not the self. The self is the locus of the inner state. Therefore, self is not identical with consciousness. This implies that self is not by nature conscious but self alone is capable of becoming conscious when self will acquire inner state or the special quality called jñāna etc. This acquisition will be possible when the self is provided with a proper configuration of conditions like body, inner sense-organ called mind , the external sense-organs and the external real world . Human consciousness, therefore, is a product or effect which comes into being due to certain factors. Jayantabhaṭṭa , hence, calls knowledge as *agantuka* (adventitious). Human beings acquires knowledge. Human being is not knowledge.

Knowledge too cannot be the quality of any physical substance because had it been the quality of a physical substance it could have been known by external sense-organs. Therefore, even though self is a substance according to the Nyāya-Vaiśeṣika system, it is not a physical substance like earth, water, and the like. Had it been a physical substance, the qualities like colour, smell etc. would have occurred in the self and we would have experienced them through our external senses as we see red colour of the rose in our garden. But neither anybody has experienced it, nor anyone has reported it to be so. The system has, therefore, proposed different types of substances in order to account for the reason why a particular quality can reside in a specific substance only and not all qualities in all substances. That is the reason behind classifying qualities as general *(Sāmānya)* and specific *(Viśeṣa)*.

Thus, mind in the sense of self or spirit is a substance (call it a spiritual substance, if you so like) and such a substance alone can be the locus of our inner world, namely, cognition or knowledge, happiness, pain, desire, aversion, volition, merit, demerit and impression of our past experiences (usually known as our inner or mental states).

The very fact that we remember our past experiences forces us to accept the identity between the experiencer and the rememberer and that prompts us to accept the durability of the self. It cannot be the case that X will experience and the Y will remember that experience.

Praśastapādabhāṣya offers the following metaphors to conceptualize the subtle entity called Self:

(1) The body is a chariot and the charioteer is the Self.
(2) The breathing is like the air blown through the air-bag by a blacksmith

towards a specific direction and that blacksmith is the Self.

(3) The Self is like a puppet-player; it is he who makes our eyes open and close.

(4) The Self is a house-keeper who extends and repairs the house i.e. our body in case there is any damage.

(5) The Self is like a boy playing with a marble i.e. our mind sitting at the comer of a room i.e. our body.

(6) The Self is like a person who is peeping through many windows i.e. our external sense-organs e.g. when he sees, say, a ripe mango his tongue starts watering.

(7) The Self is like a carpenter who uses an instrument(i.e. the sense-organ) to bring about a result(i.e. cognition or knowledge).

From all these metaphors what Praśastapāda wants to convey is this that Self is a subtle entity which is neither the body, nor the external senses, and nor the internal sense-organ called *manas*.

Praśastapāda further points out that the following awareness is a public awareness and it is shared by all of us :

(a) I am happy.
(b) I am unhappy.
(c) I have desire.
(d) I have volition.

Here, I possess these four qualities or inner states, happiness, unhappiness, desire and volition, called *guṇa.* Where are these properties located ? In other words, what is the locus of these properties ? What is the referent of the first personal pronoun 'I' ?

Obviously, my body or external sense-organ or even internal sense-organ cannot be its locus because I do not mean either 'body' or 'external sense-organ' or 'internal sense organ' when I refer to it by the first personal pronoun 'I'. Had I meant that the above awarenesses could be substituted by the following:

'My body is happy', 'My body is unhappy', 'My body has desire', 'My body has volition' and so on and so forth which is absurd.

Moreover, these inner states cannot reside in the physical substances because these occur only in a part of their loci and do not exist as long as the loci exist like colour.

Not only that, since these inner states cannot be known by the external senses like colour they cannot be accepted as residing in the physical substances.

And finally, Praśastapāda says, language too does not corroborate the physical substances as the locus of inner states because the first personal pronoun 'I' does not refer to any physical substance.

All these go to prove that we require a substance other than the physical substances as the locus where the inner mental states like cognition, happiness, etc. etc. come to reside, the awareness of which is verbalized in a language which provides an access to be aware of others' inner states too. That non-physical substance is called self or atman (Spirit or Mind) by the Nyāya-Vaiśeṣika system of philosophy. One may call such a substance as a spiritual substance, if one so likes.

This self is conceived of two types : (a) individual self *(jīvātman)* and (b) God *(paramātman)*. They are distinguished by distinguishing the nature of the inner states like knowledge and desire. In an individual self knowledge is acquired, whereas in God knowledge is eternal. Never-the-less, both, individual self and God are spiritual substances only.

There are so many individual selves as many living beings. God, however, is only one. All spiritual substances are all-pervading (vibhu) and eternal (nitya).

The Nyāya-Vaiśeṣika system also required to posit Mind as an internal sense-orsan to reveal our inner states and to facilitate access to the outer world. This Mind is called *manas* and it is also a substance which is neither spiritual substance which can be the locus of inner states nor a physical substance like earth etc. It is merely an instrument to be used by the self but it is not the self.

Out of the nine substances of the Nyāya-Vaiśeṣika system, the remaining seven types are purely physical substances which include sky, time, and space too. You may call these seven substances as Matter if the convention of Physics allows this term in that sense, which I doubt very much. If not, then there is another list of substances called by the name bhuta which refers to earth, water, fire, air, and sky. Will the physicists be comfortable if these five are called Matter ? Here too they may not agree because sky is not referred to as 'matter', I think.

But this is not a philosophical issue but only a matter of convention. Strictly speaking, the term 'matter' should stand for all the seven types of physical substances of the Nyāya-Vaiśeṣika system of philosophy. Thus it is difficult to find an exact parallel of the concept of the term Matter in this system of thought.

Select Bibliography

1. Nyāyakandali of Śrīdhara, Gaekwad Oriental Series No. 174.
2. Nyāyasiddhāntamuktāvalī of Viśvanātha (Pratyakṣakhanda), Chowkhamba edition.
3. Nyāyasutra of Gautama edited by Ganganath Jha.
4. Nyāya-Vaiśeṣika Metaphysics by Sadananda Bhaduri,. Bhandarkar Orietal Research Institute, Pune.

धर्मशास्त्रज्ञः कालिदासः

उज्ज्वला झा

या सृष्टिः स्रष्टुराद्या वहति विधिहुतम् या हविर्या चे होत्री,
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नास्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

यस्य कविकुलगुरोः एते शब्दाः तं प्रणम्य चर्चां प्रारभे। कालिदासस्य तुलना बहुभिः विद्वद्भिः शेक्सपिअरमहोदयेन सह कृताऽस्ति। शेक्सपिअरमहाभागः आङ्ग्ल भाषाकालिदासः कालिदास संस्कृतभाषायाः शेक्सपिअरः एतादृशानि विधानानि नैकैः विद्वदभिः कृतानि। सर विल्यम् जोन्स इत्येतेषां मतानुसारं कालिदासः भारतवर्षस्यल्य शेकासपियारः योहान् वोल्फगांग् फॉन् श्योटे इत्यनेन यदा अनूदितं शाकुल पठितं तदा तद् शिरसि निधाय हर्षोध्भासेन तेन नृत्यं कृतामित्यपि वयं सर्वे जानीमः। स्वीयानन्दानुभूतिः तेन एकस्यां कवितायां निबद्धा। नाटकस्य आरम्भः नान्ध्या करोति कालिदासः। अस्यै कल्पनायै संकल्पनायैवा ग्योटेभटाभागः अत्यन्तं स्पृहयति स्म। शाकुलउपठनान्तरं यत्नाटकम् अनेन महोदयेन लिखितं तत्र तेनापि नान्ध्या एव नाटकारम्भः कृतः। इदमपि अस्माभिः संस्कृतानुरागिभिः कालिदासस्य भक्तैः सम्यग् ज्ञायते एव। परन्तु केषुचित् स्थलेषु पुनरुक्तिः न दोय भवतीति अत्र नियगते। अस्तु।

'कालिदासस्य सम्यग्वर्णनं कुरुत" इत्युक्तौ तस्य संवेदनशीलता श्रेष्ठा इति वा, तस्य अभिव्यक्तेः सुन्दरता उदारा अथवा सुन्दरतायाः अभिव्यक्तिः रमणीया, तस्य निरुपमा उपमा श्रेष्ठा अथवा तस्य अप्रतिमार्थान्तरन्यासाः तस्य निसर्गपूजा, तेन सह ऐक्यम्, तस्य ईश्वरभक्तिः, सर्वः तरतु दुर्गाणि इति वदन्ती तस्य सरस्वती श्रुतिमहती, सर्वः कामानवाप्नोतु इति वदतः तस्य विश्वबन्धुत्वं, तस्य वैदग्ध्य, तस्य वेदान्तित्वम्, तस्य अद्वैतस्य पुरस्कारः, मेघं प्रियायै सन्देशवाहकं दूतं कर्तुः तस्य अद्वितीयकल्पना, तत्तः यत् ज्ञायते तत्तस्य भूगोलस्य ज्ञानम् एतेषु मध्ये कस्य वर्णनं कालिदासस्य सम्यग्वर्णनं भवति इति नूनं जटिलः प्रश्नः। एवमस्ति महिमा कविकुलगुरोः। एस् पी नारङ्गेन चत्वारिंशत् वर्षेभ्यः प्राक् या कालिदास-सूचिः कृता वर्तते, तस्यां दृष्टायां कालिदासः विदुषां प्रेमभाजनं, बहूनां कृते अयं निबन्धविषयः, प्रबन्धविषयः, ग्रन्थविषय इति ज्ञायते।

तज्ज्ञात्वा मनः चकितचकितं भवति एतावन्ति वर्षाणि--वर्षानुवर्षाणि कियन्तः विद्वांसः एनं पठन्ति, स्तुन्वन्ति, उपतिष्ठन्तीति मनः मोमुद्यते। अत्र प्रश्नः उदेति कोऽसौ विशेषः कालिदासस्य यद् व्यास-वाल्मीकिसदृशः किम्बहुना तेभ्योऽपि अधिकतरः स्नेहादरश्च अनेन लक्ष्यते! अयमेक एव कविकुलगुरुः। अनामिकाया अनामिकात्वम् अनेनैव स्थापितम्। अस्यां पार्श्वभूमौ कालिदासस्य धर्मसङ्कल्पना कीदृशी आसीत् इति द्रष्टुं मया प्रयत्नः कृतः। कदाचित् तदनुषङ्गेन कविकुलगुरोः महत्त्वं पुनरेकवारं द्रष्टुं द्रढयितुं शक्नुमः।

यथा यथा विचार्यते कानिचन तत्त्वानि स्पष्टीभवन्ति--कालिदासः वैदिक-परम्परायाः सश्रद्धः अनुयायी, इयं श्रद्धा नैव अन्धश्रद्धा तस्य, अपि तु सः अनया परम्परया परिपूर्णतया परिचितः, सम्यग्जानाति इमां परम्पराम्। तेन स्वीय-सप्तसु कृतिषु इयमेव परम्परा पुनः पुनः नवीनतया, नवनवोन्मेषैः पुरस्कृता। वैदिकपरम्परया यानि वैश्विकमूल्यानि प्रदत्तानि तेषां सर्वदा, सर्वथा रक्षणं कृतमनेन तस्य प्रत्येकग्रन्थे। अस्यां परम्परायां या वर्णाश्रमव्यवस्था समाजव्यवस्थारूपेण वर्तते सैव मनुष्यजीवनस्य सम्यग्व्यवस्था। इति अस्य दृढविश्वासः सर्वासु कृतिषु अनेन ओतश्च प्रोतश्च निबन्धः।

वागर्थयोः सुन्दरता, सुन्दरतायाः देवत्वेन सह नित्यसम्बन्धः, प्रेम्णः गभीरता, अभिव्यक्तेः सुकुमारता, उच्चाभिरुचिः इत्येते सान्ते अस्य प्रतियाया उन्मेषाः परन्तु एतैः सहैव विश्वकल्याणस्य, विश्वमङ्गलस्य सामर्थ्यं येषु अस्ति तानि देशकाल-अनवच्छिन्नानि परम्परागतमूल्यानि सर्वाङ्गसुन्दरतया अनेन शब्दसामर्थ्येन चित्रितानि अत एव सः कविकुलगुरुः इति मन्ये। अत एव नायं केवलं भारतवर्षस्य कविः परन्तु अयं विश्वकविः। अनेन लिखितानि त्रीणि नाटकानि--मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं च, ऋतुसंहारः मेघदूतं च इति खण्ड-काव्य-द्वयम्, कुमारसम्भवं, रघुवंशश्चेति महाकाव्यद्वयं च येनापि अधीतं सः उपरोक्तं सत्यम् अवश्यमेव अनुभवति।

कालिदासः वेदान्ती स अद्वैते विश्वसीति इति योगिअरविन्दानां मतम्। तेषां मतेन

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः। AŚ. 4.10

अथवा

उद्गलितदर्भकवलमृग्यः परित्यक्तनर्तनाः मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः॥ AŚ 4.12

इत्यादिश्लोकाः विश्वस्य ऐकात्म्यं द्योतयलि। अत एव च शकुन्तलायाः पतिगृहगमनं न केवलम् आश्रमवासिनां अपि तु सम्पूर्णप्रकृतेरेत भावनासन्दोह इति कालिदासः सूचयति। पारसिकां जेतुं रघुः यदा प्रस्थितः तस्य प्रस्थानं कालिदासः वर्णयति--

पारसिकान् ततो जेतुम् प्रतस्थे स्थलवर्त्मना।
इन्द्रियाख्यानिव रिपून् तत्त्वज्ञानेन संयमी ॥ Raghu iv. 60

यथा कार्यत् संयर्मा नाम यमनियमवान् पुरुषः तत्त्वज्ञानेन इन्द्रियरूपशत्रून् जेतुं सज्जीभवति तथैव रघुः

पारसिकान् जेतुं भूमार्गेण प्रस्थितः। तत्त्वज्ञानमेव इन्द्रियजयादिद्वारा मोक्षोपाय इति सर्वैः भारतीयदर्शनैः दृढं प्रतिपादितमस्ति इति जानन्त्येव दर्शनाध्येतारः। अस्यैव अयं पुनरुवारः कविकुलगुरोः।

रवीन्द्रनाथ ठाकुर महोदयाः अभिप्रयन्ति--यत् सद्गुणमण्डितम्, शान्तिकारकं, संयमितं, सर्वेषां मङ्गलसाधकं तदेव सौन्दर्यशब्दाभिधेयामिति शाकुन्तलस्य सन्देशः कविना प्रदत्तः।

बहवः विद्वासंः वदन्ति यत् निजकृतिषु कालिदासेन वैदिकपरम्परायाः सर्वे आदर्शाः सुरक्षिताः।

यशसे विजिगीषूणाम् प्रजायै गृहमेधिनाम्।
शैशवेऽभ्यस्तविधानाम् यौवने विषयैषिणाम्
वार्धके मुनिवृत्तिनाम् योगेनाले तनुत्यजाम्
रघूणांमन्वयं वक्ष्ये... इति

वदता कविना रघुवंशारम्भे रघूणां यद्वर्णनं कृतं तद् रघुकुलोत्पन्नाः राजानः सर्वे ब्रह्मचर्यादिचतुराश्रमाणां सम्यक्पालनकर्तारः आसन् इत्येव प्रदर्शयति।

विष्णुस्मृत्यनुसारं (विष्णुस्मृति ३.२) 'वर्णाश्रमाणां स्वे स्व धर्मे व्यवस्थापनम्' इति प्रथमः राजधर्मः। रघुवंशे जाताः राजानः स्वयमपि आश्रमधर्मं पालयन्ति स्म इति कालिदासः वर्णयति। राज्ञा दिलीपेन सरवे, रघुणा च अजाय, अजेन दशरथाय राज्यभारः दत्तः दिलीपेन रघुणा अजेन चानुक्रमेण वानप्रस्थाश्रमः स्वीकृतः इतीयं परम्परा सर्वेऽपि एते राजानः आश्रमधर्मं राजधर्मं च पालयन्ति स्म इति दृढं स्थापयति। अनाकृष्टस्य विषरेर्विद्यानां पारदृश्वनः

तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना। प्रजानां विनयाधानद्रक्षणाद्भरणादपि स पिता पितरस्तासां।
केवलं जन्महेततः॥ रघु ९.२३, २४॥

इदं दिद्वीयस्य वर्णनं, तथैव, यथा प्रसादनाच्चन्द्रः
प्रतापात्तपनो यथा।
तथैव सोऽभूदन्वर्थो
राजा प्रकृतिरञ्जनात्॥ रघु. ४.१२॥

इति रघोः वर्णनमपि एते राजानः 'प्रजापालनम्' इति आद्यं राजधर्मं सश्रद्धम् आचरन्ति स्म इत्येव द्योतयति। कौटिल्यानुसांर-

चतुर्वर्णाश्रमो लोको
राज्ञा दण्डेन पालितः।
स्वधर्मकर्माभिरतो
वर्तते स्वेषु वर्त्मसु॥ अर्थशास्त्र I. 4.16

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि दिलीप एव पिता आसीदिति अधुनैव अस्माभिः उक्तम् तस्यैव दिलीपस्य कृते कालिदासः वदति--

स्थित्यै दण्डयतो दण्ड्यान्
परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्याऽऽस्ताम्
धर्म एव मनीषिणः॥ रघु १.२५

संक्षेपतः कालिदासः न केवलं वैदिक-परम्परायाः ज्ञाता अपि तु अस्याः परम्परायाः दृढं पुरस्कर्ता इति तस्य कृतिषु पुनः पुनः अनुभूयते। अत एव तस्य धर्मसङ्कल्पनायाः विचारः रोचको भविष्यतीति मन्ये। अस्याः चर्चाया अनन्तरं कालिदासः न केवलं धर्मज्ञः परन्तु धर्मशास्त्रज्ञः इति वक्तुं युक्तमिति ज्ञास्यते। सः धर्मशास्त्रं सम्यग्जानाति तथैव धर्मशास्त्रानुसाक् मनुष्यजीवनं सफलं भवति धर्म एव श्रेयस्करः इति तस्य सर्वेषु ग्रन्थेषु तेन ग्रथितम्।

कविः यः कोऽपि भवतु--कविः नाम संवेदनशीलः स्रष्टा, अपारस्य काव्यसंसारस्य एक एव प्रजापतिः यः काव्यं करोति सः कविः इति सत्यं परन्तु काव्यशब्दः अत्र अत्यन्तं व्यापकमर्थम् अभिधत्ते...तदस्तु। कविः यः कोऽपि भवतु सः द्रष्टा, मुनिः ऋषिः इत्यादि-अपरपर्यायः भवति। कुत इति चेत् सः तत्त्वज्ञः। तस्य कृतिषु तस्य सौन्दर्याभिव्यक्त्या सह तस्य दर्शनं, जीवनविषयकं तत्त्वज्ञानं इत्यादि सर्वमपि व्यक्तीभवति तथा च राजशेखरोकनभावयित्रि-प्रतिभासम्पन्नरहृदयः तत्सर्वं हृदयङ्गममपि करोति इति एकम्। अन्यच्च। यस्य कस्यापि कवेः जीवन-विषयकं दर्शनं नैव पूर्णतः तस्य स्वीयं भवति। यस्याः परम्परायाः सः कविः अंशः तस्याः इदं सर्वं सहजतया सः प्राप्नोति। अस्याः पुनरुच्चारं कविः स्वस्य ग्रन्थेषु करोति। परम्परायाः ये अंशाः यानि मूल्यानि तस्य आन्तरिकानि, तानि सः सहृदयं प्रति प्रेषयितुम् इच्छति।

सः स्वयं तात् तत्त्वान् नूतनतया मन्ये आविष्करोति तान् नूतनतया अर्थपूर्णान् कृत्वा दर्शयति। परन्तु इयं परम्परा बहुप्राचीनैव न तेन तेन कविना सा आरब्धा। अयुना क्रमेण कालिदासः यस्याः परम्पराया अंशः सा वैदिकी--वेदकालात् प्रसृता। तस्य धर्म-सङ्कल्पनाऽपि तथैव सनातनीति न कोऽपि विवादः अत्र।

वेदे धर्मशब्दादधिकं ऋतशब्दः प्रयुज्यते। ऋतं नाम वैश्विक-नियमः वैश्विकी व्यवस्था। वेदे वरुणः ऋतस्य गोप्ता। सर्वेऽपि वरुणदेवताभयेन इमां व्यवस्थां अनुसरन्ति। नैव कदापि उल्लङ्घयन्ति अस्य नियमे एव तिष्ठन्ति इति वैदिकऋषीणां विश्वासः। वेदनिष्ठा इयं ऋतसङ्कल्पना एव धर्म इति नाम्ना धर्मशास्त्रे प्रसिद्धा। चतुर्षु पुरुषार्थेषु धर्म एव प्रथमः। मनुष्यजीवनस्य आधारः धर्म एव भवतु इति धर्मशास्त्रस्य सूत्रम्। ऋतं, धर्मः, सत्यं च एते पर्यायाः। अत एव विष्णुस्मृतौ, "सत्येन आदित्यः तपति, सत्येन भाति चन्द्रमाः। सत्येन वाति पवनः। सत्येन भूर्धारयति" इत्युक्तमस्ति। (विष्णु ८.२७-३५) "सत्यं धर्म उदाहृत" इति याज्ञवल्क्यः। 'भूर्भुवःस्वस्त्रयो लोकास्तेऽपि सत्ये प्रतिष्ठिता, इति अङ्गीरसस्मृतिः। अत एव ऋतमेव सत्यं, सत्यमेव धर्मः। को नाम धर्म का अस्य शब्दस्य व्युत्पत्तिरिति चेत् धारणाद् धर्म इत्याहुः इति स्पष्टमेव। परन्तु धर्मः किं धारयति इति प्रश्नः। "धर्मो धारयते प्रज्ञा" इत्येकमुत्तरम्। 'समष्टि-व्यष्टिरूप-ब्रह्माण्ड-पिण्डमय-सम्पूर्णसृष्टिक्रियां धरति यः स धर्मः', इति भारद्वाजधर्मसूत्रम्। धर्म एव ऋतं इति स्पष्टमेव।

अयं धर्म एव तदितर-पुरुषार्थ-त्रयस्य मूलं नाम मनुष्यजीवनस्यैव मूलमिति वैदिकऋषीणां मन्वादिस्मृतिकाराणां तथैव कालिदासस्यापि आदर्शः। धर्म इति महान् विषयः कालिदासोऽपि तथैव। अतएव अस्माकमधुनातनचर्चाया एका सीमा आवश्यकीति मन्ये। तथा च अस्याः चर्चायाः कृते कालिदासस्य या प्रगल्भा विदग्धा कृतिः तदमिज्ञान-शाकुन्तलम् एव स्वीकुर्मः। शाकुन्तलं नाम अभिज्ञानशाकुन्तलमेव कविकुलगुरोः सर्वासु रचनासु विदग्धा। रचना इति नास्ति संशीतिः। तथापि एतत्समर्थनार्थम् एकमेव बिन्दुमत्र विचारयामः।

मालविकाग्निमित्रस्य भरतवाक्यं रचयता कालिदासेन लिखितम्

त्वं मे प्रसादसुमुखी भव देवि नित्यम्।

एतावदेव हृदये परिपालनीयम्। स एव कविः विक्रमोर्वशीयस्य भरतवाक्ये प्रार्थयति--

परस्परविरोधिन्योरेकसंश्रयदुर्लभम्।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदासताम्॥

तथैव

सर्वः तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।

इति विश्वकल्याणमपि अर्थयति। स एव कविकुलगुरुः अभिज्ञानशाकुन्तलस्य भरतवाक्यमारचयति--

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती महीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभुः॥

इश्वरसविधे कविः अत्र पुनर्भवात् मुक्तिं याचते। तदस्तु।

अधुना कवेः धर्मज्ञानं धर्मशास्त्रज्ञानं च परीक्षितुं शाकुन्तलं प्रति दृष्टिं व्यापारयामः। इयं कृतिः विदग्धेति सत्यमेव। यथा सर्वश्रेष्ठा तथैव सर्वाधिकप्रिया जनानाम् इति इयमेवास्माभिः परीक्ष्यते।

प्रथमाङ्के तावत् अनसूयया प्रियंवदया च सह वृक्षसेचनपरा शुकन्तला दृश्यते। सर्वाङ्गसुन्दरः खलु अयं प्रवेशः। तत्र वृक्षच्छायायां स्थित्वा राजा दुष्यन्तः एतासां वार्तालापं सकुतूहलं श्रुणोति। शकुन्तला वदति--हला अयं केसरवृक्षकः मामाह्वयति तदेनं प्रथमं सम्भावयामि।

प्रियंवदाः किञ्चित्कालं तत्रैव तिष्ठ।

शकुन्तलाः किं निमित्तम्?

प्रियंवदाः त्वया सह अयं केसरवृक्षकः लता-सनाथ इव प्रतिभाति।

शकुन्तलाः अतः खलु प्रियंवदाऽसि।

अत्र राजा दुष्यन्तः विचारयति--प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा।

'प्रियं च नानृतं ब्रूयात्', इति मनुस्मृतिः। अस्याः स्मृतेरत्र स्मरणं भवत्येव। प्रियंवदायाः कथनं प्रियं च तथ्य च इति प्रदर्शयितुं दुष्यन्तः शकुन्तलां वर्णयति--

अधरः किसलयरागः
कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोमनीयं
यौवनमङ्गेषु संनद्धम्॥

ततः परं यदा नवमल्लिका उज्णित्वा शकुन्तलायाः मदनं अमिवर्तते भ्रमरः

तदा शकुन्तला वदति-

न एष धृष्टो विरमति। सखि, परित्रायेथां माम् अनेन दुर्विनीतेन मधुकरेण अभिभूयमानाम्।

के आवां परित्रातुम्? दुष्यन्तमाक्रन्द। राजारक्षितव्यानि तपोवनानि नाम।

अवसरोऽयं आत्मनां प्रकाशयितुमिति विचिन्त्य दुव्यन्तः वदति--

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपकिन्यासु॥

अत्र वाक्यद्वयादपि 'प्रजापरिपालनं' नाम आद्यः राजधर्म इत्यस्य विष्णोः वचनस्य (विष्णु III.1) पुनरुच्चार एव श्रूयते।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ॥ (कौ. I. 4.16)

इति कौटिल्योक्तिरपि सुलभं स्मर्यते।

दुष्यन्तं दृष्ट्वा अनसूया शकुन्तलां वदति, सरिव शकुन्तले, गच्छोटजम्, फलभिश्रमर्घ्यमुपाहर। इदं पादोदकं भविष्यति। दुष्यन्तः सत्वरं वदति--भवतीनां सूनृतयैव गिरा कृतमातिथ्यम्। अनसूया वदतिः सखि शकुन्तले, उचितं नः पर्युपासनमतिथीनाम्। अत्रोपविशामः।

ब्रह्मदेवभूत-पितृ-नरयाज्ञान् कुर्यात् इति विधाय विष्णुस्मृतिकारः स्पष्टी-करोति--नृयज्ञश्च अतिथिपूजनम्। अतिथिपूजने च परं फलमाधितिष्ठेत्। (विष्णु ६७.२८)

ततः दुष्यन्तः वदति--वयमपि तावत् भवत्योः सखीगतं किमपि प्रष्टुमिच्छामः।

तस्य प्रश्नोऽस्ति--

वैखानसं किमनया व्रतमाप्रदानाद् व्यापाररोधि मदनस्य निषेवितव्यम्। अत्यन्तमेव सदृशेक्षणवल्लभाभि राहो निवत्स्यति समं हरिणाङ्गनाभिः॥

अत्र प्रियंवदा उत्तरयति-

आर्य! धर्माचरणेऽपि परवशोऽयं जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने सङ्कल्पः।

मनुना उक्तमस्ति-

उत्कृष्टायाभिरूपाय वराय सदृशाय च।
कन्या देया...

चतुर्थाङ्के प्रारम्भ एव अनसूयामुखेन कविकुलगुरुः वदति--गुणवते कन्यका प्रतिपादनीया इत्ययं तावत्प्रथमः सङ्कल्पः। 'दद्यात्गुणवते कन्यामिति' मनुवचनं सद्य एव स्मर्यत एतादृशीयं .शब्द-योजना कवेः।

द्वितीयाङ्के तावत् राजा विदूषकं वदति, सखे, चिन्तय तावत्केनापदेशेन सकृदपि आश्रमे वसामः।

विदुषकः उत्तरयति--ननु भवान् राजा।

राजा पृच्छति--ततः किम्?

कः अपरोऽपदेशः? नीवारषष्ठभागम् अस्माकम् उपहरन्त्विति।

अत्र दुष्यन्तस्य उत्तरमास्ति-

अन्यदेव भागमेते तपास्विनो निर्वपन्ति यो रत्नराशीनपि विहायाभिनन्द्यते।

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तद्धनम्।
तपः षड्भागमक्षय्यं ददत्याण्यका हि नः॥ AŚ II. 14

विष्णुस्मृतिकारः विधत्ते--

प्रजाभ्यो बल्यर्थं संवत्सरेण धान्यतः षष्ठमंशमादयात्। सर्वसस्येभ्यश्च। ब्राह्मणेभ्यः करादानं न कुर्यात्। ते हि राज्ञो धर्मकरदाः। विष्णु III 22-27.

तृतीयाङ्के परस्परानुरक्तौ शकुन्तलादुष्यन्तौ गान्धर्वविवहेन बद्धौ। एतयोः गान्धर्वविवाहः कविना सूचितः वर्तते। राजा शकुन्तलां वदति--भीरु, अलं गुरुजनभयेन। दृष्ट्वा, विदितधर्मा तत्रभवान्नात्र दोषं ग्रहीष्यति कुलपतिः। अपि च,

गान्धर्वेण विवाहेन
बह्व्यो राजर्षिकन्यकाः।
श्रूयन्ते परिणीतास्ताः
पितृभिश्चाभिनन्दिताः॥

धर्मशास्त्रे विवाहस्य अष्टौ प्रकाराः उक्ताः।

अथ अष्टौ विवाहा भवन्ति। (विष्णु-स्मृति 24-17) ब्राह्मो दैव आर्षः प्राजापत्यो गान्धर्व आसुरो राक्षसः पैशाचश्चेति। एतेषु आद्याः चत्वारो धर्म्याः। ibid., 24-27

गान्धर्वोऽपि राजन्यानाम्। ibid., 24-28

अतः गान्धर्वविवाहः क्षत्रियाणां कृते धर्म्य एव इति विष्णुस्मृतिकारस्य विधानम्।

चतुर्थाङ्के आरभ्य एव तयोः गान्धर्वविवाहः जात इति अनसूया कथयति। दुष्यन्तः राजधानीं प्रतिनिवृत्तः इत्यपि तस्याः वचनादेव अस्माभिः ज्ञायते। राजधानीं संप्राप्य राजा आश्रमवृत्तान्तं स्मरिष्यति न वेति तस्याः चिन्ताविषयः। 'न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति' इति प्रियंवदा तां, 'विश्रब्धा भव' इति वदति। तस्याः चिन्ता भवति अन्यैव। 'इमं वृत्तान्तं श्रुत्वा तातः किं प्रतिपत्स्यते' इति।

तदा अनसूया ताम् आश्वासयति 'यथाहं प्रेक्षे, तथा तस्य अनुमतं भवेत्। गुणवते कन्यका प्रतिपादनीया इत्यंय तावत्प्रथमः सङ्कल्पः। तं यदि दैवमेव सम्पादयति ननु अप्रयासेन कृतार्थो गुरुजनः।

गुणवते कन्यका प्रतिपादनीया इति अनसूयायाः शब्दावली, 'दद्यात् गुणवते कन्याम्' इति मनुवचनं स्मारयति इति तु अस्माभिः उक्तपूर्वमेव। यावत्सख्यौ शकुन्तलाविषये एतावच्चिन्तयतः तावदेव दुर्वासाऋषीणाम् आगमनं, शकुन्तलया शून्यहृदयत्वेन अतिथिपरिभावनं, ऋषीणां शापवाणी इत्यादिसर्वं नेपथ्ये वृत्तान्तः।

विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्। स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥ AŚ. IV. 1

एतान् वज्रसारान् शब्दान् श्रुत्वा कस्मिंश्चित् पूजार्हे अपराद्धा शून्यहृदया शकुन्तला इति सखीभ्याम् ज्ञातम्। अयं न यः कोऽपि परन्तु सुलभकोपो महर्षिः दुर्वासाः इति अनसूया वदति। 'कोऽन्यो हुतवहाद् दग्धुं प्रभवति' इति येषां कृते प्रियंवदा वदति ते एते।

प्रियंवदे, गच्छ, पादयोः प्रणभ्य निवर्तय एनम्। यावदहम् अर्घ्योदिकम् उपकल्पयामि।

तथेत्युक्त्वा गता प्रियंवदा शीघ्रमेव प्रतिनिवृत्ता कथयति, सखि, प्रकृतिवक्रः सः कस्य अनुनयं प्रतिगृह्णाति। किमपि पुनः सानुक्रोशः कृतः। यदा निवर्त्तितुं नेच्छति तदा विज्ञापितो मया--भगवन्, प्रथम इति प्रेक्ष्य, अविज्ञाततपःप्रभावस्य दुहितृजनस्य, भगवता, एकोऽपराधो मर्षितव्यः इति।

प्रियंवदाया एषा अभ्यर्थना धर्मशास्त्रानुसारिण्येव। विष्णुस्मृतिकारः विधते--द्वितीयमपराधं न कस्यचित् क्षमेत। (VS III. 93)

अतिथिः यदि न सम्यक्पूज्यते --

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते।
तस्मात्सुकृतमादाय दुष्कृतं तु प्रयच्छति॥ (VS. 67.33)

इत्यपि सख्यौ जानीतः, कथं कृत्वा सानुक्रोशत्वं प्रार्थ्यते तदपि प्रियवदया सम्यक्ज्ञातमासीत्। अत एव खलु महर्षिभिः 'अभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते' इति अनुकम्प कृता।

इतःपरं शकुन्तलायाः भर्तृसकाशविसर्जनस्य वर्णनं नाम संस्कृतकाव्येषु एकमजरामंर पर्वम्। काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला। तत्रापि च चतुर्थोऽङ्कः तत्र श्लोक-चतुष्टयमिति सुभाषितं यथार्थमेव। वनज्योत्स्नाम्, आलिङ्ग्य, गर्भमन्थरां मृगवधु मृगशिशुं आमन्त्र्य पतिगृहं प्रति प्रास्थिता शकुन्तला कण्वं पृच्छति तात, कदा नु भूयः तपोवनं प्रेक्षित्ये? काश्यपर्षिः उत्तरयति--

भूत्वा चिराय चतुरन्तमहीसपत्नी दौःष्यन्तिमप्रतिरथं तनयं निवेश्य। भर्त्रा तदर्पितकुटुम्बभरेण सार्धम् शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥ (AŚ. IV. 20)

विष्णुस्मृतिः विधत्ते-गृही, वलीपलितदर्शने वनाश्रयो भवेत्। अपत्यस्य अपत्यदर्शने। पुत्रेषु भार्यां निक्षिप्य, तया अनुगम्यमानो वा। (VS. 93.1-3)

एवम् उदाहरणानि बहूनि सन्ति। शकुन्तला-प्रत्याख्यानं नामक-पञ्चमाङ्के कञ्चुकी वदति--अविश्रमोऽयं लोकतन्त्राधिकारः। कुतः

भानुः सकृद्युक्ततुरङ्ग एव
नक्तंदिवं गन्धवहः प्रवाति।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः॥ (AŚ. V. 4)

पुनरपि कञ्चुकी वर्णयति राजानम्-

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते श्रान्तमना विविक्तम्।
यूथानि सञ्चार्थ रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः॥

तथैव वैतालिक-द्वयेन युदुक्तं दुष्यन्तविषये-

स्वसुखनिरभिलाषःखिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णमं
शमयति परितापं छायया संश्रितानाम्॥

अथ पुनः

नियमयसि कुमार्गप्रस्थितानात्तदण्डः

इत्यादि स्तुतिश्च

प्रजासुखे सुखं राज्ञः
प्रजानां च हिते हितम्। (कौटिल्यार्थशास्त्र I. 19.34)
नात्मप्रियं हितं राज्ञः
प्रजानां तु प्रियं हितम्॥

इति वदतः कौटिल्यस्य राजधर्मं स्मारयति। तदनन्तरं शार्ङ्गरव-शारद्वतप्रभृतिभिः सह आगतया शकुन्तलया सह परिणयस्य कथां शापप्रभावेण राजा नैव स्मरति।

मूढः स्यामहमेषा वा
वदेन्मिथ्येति संशये।
दारत्यागी भवाम्यादौ
परस्त्रीस्पर्शपांसुलः॥

इति किंकर्तव्यमूढं राजानं पुरोहितः वदति, 'यद्येवं तावदेवं क्रियताम्'। 'अनुशास्तु मां भवान्' इति दुष्यन्तः। पुरोहितः वदति--'अत्रभवती तावदा प्रसवादस्मद्गृहे तिष्ठतु'। परन्तु वस्तुतः किमभवत् स वृत्तान्तः ज्ञायते अस्माभिः

परन्तु, मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः (I. 7.8) इति कौटिल्यवचनमत्र स्मरामः कविकुलगुरूरपि स्मरति एव।

षष्ठाङ्के यदा रक्षिभ्यां धीवरः गृहीतः तस्य मत्स्यबन्धनरूपाजीवस्य च परिहासः कृतः तदा धीवरः वदति--'सहजं किल यद् विनिन्दितं न हि तत्कर्म विवर्जनीयकम्।' स्वधर्मे निधनं श्रेयः परधर्मो भयावहः इति तु सद्य एव स्मर्यते अस्माभिः। परन्तु 'स्वधर्मः स्वर्गाय आनन्त्याय च' इति वदता कौटिल्येन यः राजधर्म इति उक्तः 'तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत्' तस्य राजधर्मस्य पालनं राजा दुष्यन्तः करोति स्मेति अस्मिन् प्रकरणे (सन्दर्भे) विशेषतः द्रष्टव्यम्।

उदाहरणानि नूनं बहूनि। अत्र कियन्ति देयानि इत्येव प्रश्नः। यदा अङ्गुलीयकं दृष्टं तदा राजा पर्याकुलः पश्चात्तापदग्धश्च संवृत्तः। तस्य हृदयं विदीर्णम्। विदूषकः वर्णयति--लङ्घेत एष भूयोऽपि शकुन्तलाव्याधिना।

राजा कञ्चुकीं वदति--वेत्रवति! मद्वचनादमात्यमार्यपिशुनं ब्रूहि। चिरप्रबोधनान्न सम्भावितमस्याभिरद्य धर्मासनमध्यासितुम्। यत् प्रत्यवेक्षितं पौरकार्यमार्येण तत् पत्रारूढं कृत्वा प्रस्थाप्यतामिति। (AŚ. VI Act)

अत्र मनुवचनं
यदा स्वयं न कुर्यात्तु
नृपतिः कार्यदर्शनम्।
तदा नियुञ्ज्याद्विदांसम्
ब्राह्मणं कार्यदर्शने॥ मनु ८.९

सहजमेव मनसि आयाति। कविकुलगुरुः नेदं सर्वं केवलं जानाति अपितु स्वीय-कृतिषु सर्वमिदं पुरस्करोति। अस्यां परम्परायां तस्य दृढविश्वासः।

कवेः सर्वाः कृतयः यद्यनया दृशा अधीयन्ते, मन्ये बहवः प्रबन्दाः भवेयुः इति अस्य विषयस्य व्याप्तिं पश्यामि।

'रघुवंशो दिलीपेनानुष्ठितं गोव्रतं मनुस्मृत्यनुसारि' इत्यादिविषयानधिकृत्य अध्येतृभिः निबन्धाः रचिताः। परं यदस्माभिः अधुनावधि दृष्टं ततः इदं तु निश्चप्रचं यद् अयं सुव्यवस्थित-अध्ययनविषयः भवितुमर्हति।

संक्षेपेण इदं वक्तुं युक्तं यत् कालिदासस्य धर्म-सङ्कल्पना वैदिकपरम्परानुसारिण्येव। धर्म एव मनुष्यजीवनस्य मूलमस्तु इति अस्याः परम्पराया आदर्श एव कविकुलगुरोरादर्शः। मन्ये अत एव यस्मात् आदिपर्वात् कविना शकुन्तलायाः कथासूत्रं प्राप्तं तत्र दृष्टः राजा दुष्यन्तः कालिदासेन न तथैव स्वीकृतः।

महाभारतस्य आदिपर्वे आगतः कथाभागः एवमस्ति--

मृगयार्थं यतः राजा दुष्यन्तः कण्वाश्रमं प्राप्तः। कण्वमहर्षिः तदानीम् आश्रमे नासीदिति शकुन्तलया अस्य विशेषातिथेः सत्कारः कृतः तस्याः सौन्दर्येण मुग्धः राजा तां परिणेतुमैच्छत्।

तदानीं तयोः पुत्र एव राज्यमधिरोहतु इति शकुन्तलया उक्तं राज्ञा च प्रतिश्रुतम्। तदन्तरं तया सह गान्धर्वविवाहबद्धेन राज्ञा कानिचन दिनानि सहर्षं व्यतीतानि। ततःपरं राजा राजधानीं गतः। यथासमयं

प्रसूताया शकुन्तलायाः पुत्रस्य नाम सर्वदमन इति। षड्वर्षाणि यावत् पत्नीं पुत्रं च राजधानीं नेतुं राजा नैव आगत इति कण्वमहर्षिभिः शकुन्तला पतिसकाशं प्रेषिता। यदा शकुन्तला राजप्रासादं प्राप्ता तदा दुष्यन्तेन सा नैव प्रत्यभिज्ञाता। यदा शकुन्तला शोकव्याकुला अभवत् तदा अशरीरिण्या वाण्या दुष्यन्तः आज्ञप्तः--'स तवैव पुत्रः, तं स्वीकुरु' इति। अयमेव सर्वदमनः पश्चात् भरत इति प्रथितः।

अयमादिपर्वगतः कथाभागः। नायं कालिदासाय अरोचत। दुर्वासमहर्षिणां शापयोजनया तेन कथासूत्रस्य सुन्दरता विवर्धिता इति तु सत्यामेव परन्तु ततोऽपि अधिकं यत् तेन दुष्यन्तस्य चारित्र्यं धर्ममूलमेव इत्यपि दर्शितं तस्य प्रेम अपि अकलङ्कमेव रक्षितम्। 'ममैव पुत्रः राज्यमधिरोहतु' इति शकुन्तलामुखात् नैव उक्तम्। अत्र मनुष्यस्य न्यूनता, स्वभावसिद्धा अपूर्णता तेन दूरीकृता। सहृदयेभ्यश्च एका उदात्त-प्रेमकथा उपहारीकृता।

रघुवंशोऽपि राज्ञां धर्ममूलानाम् इह अभ्युदयः अमुत्र निःश्रेयसं फलम् इत्येव तत्त्वम्। अधर्ममार्गेण गच्छन् अग्निवर्णः राजयक्ष्मग्रस्त अभूत्। तेन रघुकुलं 'व्योम पश्चिमकलास्थितेन्दुः' अथवा 'पङ्कशेषमिव धर्मपल्वलम्' अभवत् इति कालिदासः विशेषत्वेन वर्णयति। इन्द्रियजय एव आद्यः जातधर्मः इति तस्य विश्वासः।

अधुनावधि अस्माभिः कालिदासविषये या चर्चा कृता, ऊपोहः कृतः ततः इदं वक्तुमुचितमिति प्रतिभाति यत् कालिदासः न केवलं धर्मज्ञः अपितु धर्मशास्त्रज्ञः च। तस्य सर्वाभ्यः कृतिभ्यः स अमुमेव सन्देशं प्रदातुमिच्छति यत् मनुष्यजीवने अर्थकामौ धर्ममूलौ। धर्मेणैव चतुर्थपुरुषार्थः अधिगन्तुं सुकरः इत्येव तत्त्वम्। तस्य अतीव ज्ञानीपात्रेभ्यः आरभ्य, आश्रमकन्यका अपि धीवरसदृश-अतिसामान्य-पात्राण्यपि इदं तत्त्वं सम्यग्जानन्ति। न केवलं जानन्ति परन्तु तदनुसारमेव तेषां सर्वेषाम् आचरणमिति अस्माभिः नैकैः उदाहरणैः दृष्टमेव। अत एव के. कृष्णमूर्तिमहोदयैः यदुक्तं नाम, "His works indicate that, he lived in times of peace, when the leisured class would pursue fine arts, free from threats of invasion from without or from conflicts within". तत् समीचीनमिति भाति।

अन्ते एकं बिन्दुं स्प्रष्टुमिच्छामि यत् संस्कृतेः, परम्परायाः बन्धने स्थित्वा एव कलाकृतिः निर्मातव्या अथवा परम्परायां यन्न्यूनं यः विसंवादः तस्योपरि कविना स्वीयकृतिषु भाष्यं करणीयम्, यत्सत्यं जगति दृश्यते, अनुभूयते सर्वैः, तस्यापि चित्रणं कर्तव्यम् वा इति मतद्वयं प्राचीनकालत एव प्रचलति। केचित् विद्वांसः एकस्य पुरस्कर्तारः केचित् पुनः अन्यस्य।

मन्यते कालिदासेन प्रथमः मार्गः स्वीकृतः। तस्य कारणमेवं प्रतिभाति यद् विविधमूल्येषु मध्ये विधायकत्वमिति अपि काव्यस्य एकं मूल्यम्। तद्दृष्टितः कवेः उत्तरदायित्वमस्ति भारः अस्ति यद्यत् सुन्दरं, सत्यं, शिवं च तस्यैव परिपोषः तस्य कृतिषु भवतु इति। इदं उत्तरदायित्वं कालिदासेन सर्वथा स्वीकृतमिति प्रतिभाति।

जगतीतले बह्व्यः भाषाः सन्ति। परन्तु विश्वास्मिन् विश्वे यावन्तः काव्यरासिकाः सहृदयाः तैः सर्वैः अवश्यमेव पठनीयं इति सर्वोत्कृष्टं अभिजातं वाङ्मयं तासु मध्ये कतिपयासु एव वर्तते। देववाणी एतासु भाषासु एका भाषा। अस्याः यः उपासकः अस्यां भाषायां यदभिजातं श्रेष्ठं काव्यमस्ति तत्कर्तॄणां यः ललामभूतः तम् कविकुलगुरूम् अभिवन्द्य विरमामि।

RIDDLE POETRY IN VEDAS

PRADYOT KUMAR DATTA

A task on Riddles depends on some discussions regarding observations on the nature of such poetry in Vedas. The Veda is the storehouse and master piece of all such poetries, A detailed discussion of riddle questions and their interpretations shows a conception of proper senses of Vedic poems. Scholars both traditional and modern busied themselves with interpretation of certain Vedic ambiguous words occurring in the versions of Vedas. Then Vedic literature supplies exhaustive informaion of every mantra with reference to salient features of poetry. Scholars have already entrusted with their all around efforts to find out intelligible meaning of obscure Vedic words. This work is immensely intended to be enriched by treasures at modern outlook to bring the wealth of ideas hidden there by finding out exposition of them.

The Ṛgvedic hymns like I/95; I/164 and X/114 are examples of riddle poetry containing a large number of riddles. M. Winternitz remarks that the riddle poetry was "very popular with ancient Indians as with other ancient nations" in 'A History of Indian Literature', Vol. I, p/102. Scholars come across pieces of such riddles in several Ṛgvedic hymns. The different natural day and night are moving as if they are serving by nourishing each other child referred to in the ṚV I/95/1—द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते. The Sun gets food from one, and Agni gets bright light from the other. Then the Sun and Agni are so-called sons of day and night chronologically. Sāyaṇa says that the Sun disappears at night in the womb of night, and appears from the end of night. Hence the Sun is the son of night. Agni, though exists in the day-time, it remains brightless. Therefore, Agni is the son of the day.

The duty of the night to have his son as Sun for drinking Juice is done by the day; and what is the duty of the day i.e. to have his son as Agni to drink Juice is made by night. The three birth places of Agni are glorified. One is in the sea, one is in the sky and the other in heaven as referred to in the Ṛgveda—त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु--ऋ. १।९५।३. He as a Sun divides the seasons; and for the sake of all creatures of the world creates the east. Sāyaṇa explains the place of origin of Agni as Submarize fire bore on eruption in the ocean. Agni originates as the Sun in the sky and as lightning in heaven. There is naturally no difference between space and time in terms of a stationery object. Scholars know the direction of a space when an object moves and from its movement they can know the time of movement during the period. The direction towards the east, etc; and the period of seasons are ascertained only through the movement of the Sun as the place or position of the Sun seen from the earth that is rotating on its orbit and also around the Sun simultaneously. Therefore, the Sun is the master of direction on space and season as time.

ṚV I/95/4—क इमं .वो निणामा चिकेत वत्सो मातृर्जनयन्त माभिः बह्वीनां गर्भो अपसामुपस्थान्महान् कविर्निश्चरति स्वधावान् i.e.—who among you knows the disappeared Agni? That Agni being a son gives birth to his mother by oblation. That Agni is like the womb of waters of clouds, and comes out from the ocean of sky. Sāyaṇa interprets thus. Agni as the lightning is as if the son of the waters of clouds but Agni gives birth to the mother like rain-waters by oblation. Clouds are formed in the sky when Agni carries the sacrificial smoke there. Hence Agni as the lightning is the womb or offspring of waters of clouds but again the Sun like Agni comes out from the ocean to mean clouds of heaven termed *ākāśanadī* called samudra as mentioned in the commentary of Durgācaraṇa एला च इला च इत्येवमाद्या on Vedas. ṚV I/95/6 : उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः, स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः- Both the worlds like beautiful wives serve him and take care of him remaining near him like lowing of cows. Sāyaṇa interprets that day and night are like two pieces of wood. Fire is enkindled by rubbing two pieces of wood to hold them firmly by ten fingers. Stanza '2' refers to as such—दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो बिभृथत्वष्टृ. Here ष्टृ (Tvastṛ) means Vāyu to designate wind. Fire is enkindled by rubbing two pieces of wood with the help of ten fingers. Hence fire is as if the womb of wind that pervades the existence. Thus enkindled fire burns giving out loud sound like lowing of cows. When the fire is enkindled day and night, then he may be served like a son elsewhere. Stanza '7' mentions उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति. He extracts up from all things the bright substance of Juice as flood of light and creates new coverings from his mothers. Agni creates all enveloping flood of light from the motherly waters of the clouds. Sāyaṇa interprets that Agni prepares the energy as coverings of the whole world by the new clothing of flood of light taking from his mother rain waters. Stanza '10' is noted as विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु. He holds all substances like food in his belly and for that purposes he lives or stays in corn seeds produced by rain water. Agni of the Sun rays causes corns or grains to grow in the field with the help of rain water falled there. ṚV I/96/5 is referred to as नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची. Though day and night destroy each other's colour, but they nourish the baby like Agni in harmony. Day and night mean light and darkness respectively.

Though day and night are destructive, but Agni remains burning day and night as it is immortal also. ṚV III/26/7; अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्, अर्कस्त्रिधातु रजसो विमानोऽजस्रो ठर्मो हविरस्मि नाम means as I am Agni, from my birth I am Jātavedas, ghee or butter is my eye, nectar is in my mouth, I have threefold lives, I measure heaven, I have undecaying heat and I am like oblation. Sāyaṇa says that lightning is Mātariśvan. *Agni travels in his motherly heaven as the lightning termed* Aśvājanī, and hence he is called Mātariśvan as आदित्यस्य रश्मिभ्य:.

Yāska, a great etymologist on the basis of the ṚV I/60/1 interprets *Mātariśvan* as wind by a passage मातरि अन्तरीक्षे श्वसिति श्वयति प्राणिति वर्तते इति यावत् इति मातरिश्वा वायु:. But the Vedic tradition does not corroborate this idea on the portion of the passage—भरद्भृगवे मातरिश्वा--ऋ. १।६०।१. Mātariśvan has brought this Agni to the Bhṛgus like a friend. According to the Vedic tradition supported by Bötling and Roth there are two meanings of Mātariśvan. He is a god and messenger of Vivasvant and has brought Agni from the sky for the Bhṛgus. In another sense Mātariśvan is the other secret name of Agni. Such scholars are of their opinion that there is no use of Mātariśvan as wind in the Ṛgveda. But in ṚV I/164/48 Mātariśvan is wind and also Agni. In ṚV I/96/4 स मातरिश्वा पुरुवारपुष्टिर्विददगातुं तनयाय स्वर्वित् he gives ample nourishment in heaven. Sāyaṇa interprets मातरिश्वा as मातरि सर्वस्य जगतो निर्मातर्यन्तरीक्षे श्वसन् वर्धमान:. Here Mātariśvan is not wind, but an epithet of Agni. ṚV III/26/2 notes वैश्वानरं मातरिश्वानमुक्थ्यम् to mean that as shelter for oblation of the sacrifices the seer poets invoke the bright Vaiśvānara, Mātariśvan and so on. Sāyaṇa says that Agni travels as lightning in his motherly heaven, and hence he is called Mātariśvan on आदित्यस्य रश्मिभि: to mean rays of the Sun. In the ṚV I/128/2 यं मातरिश्वा मनवे परावतो देवं भा: परावत: Mātariśvan brought Agni for Manu from a great distance. In ṚV I/31/3 त्वमग्ने प्रथमो मातरिश्वन: it is meant that Oh Agni, you come before Mātariśvan i.e. wind. Hence three names are same like Agni, Vāyu and Āditya.

In the ṚV III/27/9 दक्षस्य पितरं तना Dakṣa's daughter holds Agni, and in another verse of ṚV III/27/10 नि त्वा दधे वरेण्यं दक्षस्येला सहस्कृत Dakṣa's daughter Ilā holds Agni also. Sāyaṇa interprets दक्षस्येला as platform. Ilā means ground. Tanayā denotes altar. Agni is enkindled on a platform i.e.—Agni is held by Ilā to mean platform. ṚV I/102/8 त्रिविष्टधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना, अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिन्द्र जनुषा सनादसि denotes that Oh master of men, you to be Indra are the power of all creatures like a threefold rope, you have three kinds of power or energy in three worlds, and are powerful enough to hold the whole universe. Sāyaṇa interprets त्रिविष्टधातु as यथा त्रिविष्टस्त्रिगुणिता रज्जुर्द्रढीयसी, इन्द्रोऽपि दृढ इत्यर्थः. The Sun in the sky, lightning in heaven, Agni in world are three kinds of power or energy as threefold lives. In Ṛ̣V I/121/2 स्तंभीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः, अन्त स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः he or Indra holds the sky calmly or steadily, he is the leader of cows, he at spreading rays all around sends drinkable and life-sustaining rainy water as food, the mighty Sun like Indra appears after his daughter Uṣas, he has made horse's wife mother Cow. Here Indra is praised as the Sun-god.

The Sun extracts vapour from the waters of ocean which are condensed in the sky to forms clouds, and Indra hurls his bolt upon the clouds like Ahi, Vṛtra, Śuṣṇa causing showers of rain to fall on earth for drinking and nourishing of the plants and animals. The Sun-rays are meant both Aśvas and cows. Here Sāyaṇa cites an allusion relating a frolicsome story that once Indra created a cow or cowmother from a mare or horse's wife. Hence scholars find that cows and horse or mares are Sun rays. Thence Uṣas is called the daughter of the Sun. In Ṛ̣V I/113/1-2 पथ्या प्रसूता सवितुः सवाय एषा रात्र्युषसे योनिमारुक्, रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः Just as the night is the offspring of the Sun similarly she is the birth place of Uṣas. The glowing bright Uṣas is the mother of Sūrya having appeared. The dark night has gone to her place. Sāyaṇa interprets the riddle such as that after the Sun-sets night comes there. Then night is the offspring of the Sun. Again after night Uṣas comes.

Hence Uṣas is the offspring of night. After Uṣas, the Sun appears. Thence the Sun is the son of Uṣas. Then Uṣas is the mother of the Sun whereas in Ṛ̣V I/121/2 and also Ṛ̣V I/ 171/ 5 Usas is the daughter of the Sun. In stanza '19' of Ṛ̣V. I/113 as माता देवानामदितेरनीकम् it appears that Oh Uṣas! you are the mother of gods like Aditi. Sāyaṇa interprets that at dawn all the gods are invoked in the sacrifice. So they all awake, and are called offsprings of Uṣas. In Ṛ̣V I/71/ 5 स्वसां देवो दुहितरि तिष्वि धात् the glowing Agni spreads his light over his daughter Uṣas. Sāyaṇa interprets दुहितरि दुहितृवत् समनन्तरभाविनाम्. Night is the resting time of Agni. Then Uṣas appears after night. Hence Uṣas is called the daughter of so-called Agni.

Ṛ̣V I/123/8 refers to as अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परिषन्ति सद्यः to mean everyday from the resting place of Varuṇa, the Uṣas, etc. staying at a distance of 30 yojanas गृहं गृहमहना यात्यच्छा--this portion means that Ahanā, a name of Uṣas politely travels towards her husband's abode i.e. Varuṇa or the Sun's house everyday. Here Varuṇa i.e.—the Sun is the husband of Uṣas. Sāyaṇa says that the Sun travels 5059 yojanas. If so the Sun moves 79 yojanas in every Daṇḍa, Uṣas is said to have 30 yojanas ahead of the Sun, the rising time of Uṣas is 3/8th daṇḍa before the Sun-rise. According to Bently in his Hindu Astronomy the reckoning of the Sun's daily journey cited by Sāyaṇa perhaps from some texts of Vedas is much nearer to the truth than that of the Purāṇas, something more than 20,000 miles and being in fact euatorial circumference of the earth also.

ṚV I/139/11 notes 33 gods as ये देवासो दिव्येकादश स्थ पृथिव्या मध्येकादश स्थ अप्सु स्थितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्. Those gods are eleven in heaven, of which they are eleven on the world, eleven live in the atmospheric region termed antarīkṣa, they live in eleven, enjoy the oblations of sacrifice. Here the gods are the Ṛṣis prevailing at the time of observation of Vedas. They are 33 in number. ṚV I/34/11 is worthy to be mentioned like आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना to mean Oh Nāsatya, Aśvins! Come here to drink honey with eleven gods three times. Here there is a reference of 33 gods divided by three times in number of eleven deities.

According to the Taittirīya Saṁhitā I/4/10/1 eleven in the sky, eleven in the world and eleven in heaven are referred to as 11+11+11 > 33 gods in their number. The Śatapatha Brāhmaṇa VII/5/7/2 mentions eight Vasus, eleven Rudras, twelve Ādityas belonging to the sky or dyu and the world as 8+11+12+1+1 totally 33 in number. In the Aitareya Brāhmaṇa II/18 there are eleven Prayājadevas, eleven Anuyājadevas and eleven Upayājadevas like 11+11+11 as 33 gods wholly in their number. The Viṣṇupurāṇa surveys eleven Rudras, twelve Ādityas, eight Vasus, Prajāpati and Vaṣaṭkāra also as 11+12+8+1+1 > 33 deities in their number. According to the Purāṇas the number of gods is in 33 crores. According to Yāska in his Nirukta-text there are three gods, one in heaven as Sūrya, either Indra or Vāyu as one in the sky and Agni in the world. Then thrity three gods are calculated including twelve Ādityas, but in Ṛgveda Ādityas are the sons of Aditi. In ṚV II/27/1 there is the sixfold portion of Āditya like मित्रोऽर्यमा भगो वरुणो दक्षोऽशंश्चेति. Six Ādityas are in their number. In this portion it is mentioned that may Mitra, Aryaman, Bhaga, Varuṇa, Dakṣa and Aṁśa hear me. In this connection there is a reference to six Ādityas. In ṚV IX/114/3 सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव there are seven directions as the resting places of many suns, there are seven sacrificer priests and seven suns as Ādityas. Here the number of the Ādityas is in seven as so referred to there.

In ṚV X/72/8 अष्टौ पुत्रासो अदितेर्ये जाता स्तम्बस्परि there are eight Ādityas, sons of Aditi. Eight sons were born of Aditi, of which she brought seven with her in heaven and the son colled Mārtāṇḍa was cast far-away. The portion '9' प्रजायै मृत्यवे त्वत् पुनर्मार्तण्डमाभरत् states that Aditi gave birth to Mārtāṇḍa only to be born, and die. In ṚV I/114/3, etc there are various references to deities in number. 'इन्द्रं वायुं बृहस्पतिं मित्रमग्निं पुषणं भगमादित्यान्मारुत गणम्' — so many portions refer to as such : Give share of oblation to Indra, Vāyu, Bṛhaspati, Mitra, Agni, Pūṣan, Bhaga, all the Ādityas and the Maruts. Hence there is a mention of the names of seven Ādityas. In Ṛgveda, the number of the Ādityas mentions to be six, seven and eight. The number gradually increases in the Brāhmaṇas. The Ādityas are eight like Bhaga, Aryaman, Mitra, Varuṇa, Aṁśa, Dhātṛ, Indra and Vivasvant in the Taittirīya Saṁhitā. In the Ṛgveda scholars find the names of gods, Dhātṛ and Vivasvant separately. In the Śatapatha Brāhmaṇa II/6/3/8 there are twelve Ādityas; but there twelve Ādityas are twelve months or the Suns of twelve months as कतमे आदित्या इति, द्वादश मासाः संवत्सरमासा एते आदित्याः. In the Mahābhārata and the Purāṇas, there are twelve Ādityas. Yāska, the author of the Nirukta-text calls Aditi as आदिमा देवमाता to be mother of all gods. Root *dit* means what is whole as integral, undivided, infinite that is Aditi. Then it means vast expanse of the sky, eternal nature. Max Müller defines Aditi, an ancient god or goddess. It is in reality the earliest name invented to express the Infinite. Roth defines Aditi as eternity or the eternal. This eternal and inviolable principle is the celestial light of the whole world as so far.

There is a relation of Aditi and Dakṣa with the Ādityas. In the ṚV X/72/4 Dakṣa was born of Aditi whereas Aditi was again born of Dakṣa. In stanza '5' of the same hymn Aditi was thus born as found so. She is the daughter of Dakṣa. This hymn shows that gods are born of themselves. Therefore, Aditi is the mother of Dakṣa whereas Dakṣa begets Aditi. In this sense she is his daughter. Just as the Sun has its origin from fire whereas the Sun produces fire to be Agni. Then the Sun is the offspring of Mitra and Varuṇa as lower of Uṣas mentioned there.

ṚV I/152/3 'गर्मो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत्' states that Āditya, offspring of Mitra and Varuṇa fulfils the truth as regular order termed ऋत and destroys which is not regular to be अनृत bearing the burden of the world. Here Āditya is called the offspring of Mitra and Varuṇa to be day and night respectively. The Sun rises between the time of day and night. Hence the womb of day and night is stated to be the offspring as the Sun to be the child of Mitra and Varuṇa. In stanza '4' प्रयन्तमित् परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् there is a mention of the daughter's lover i.e. जारं कनीनाम् as Uṣas' lover Āditya gradually proceeding, but never taking rest. Here the Sun is the lover of Uṣas. In ṚV I/155/3 दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः the son holds the worst name. The best name is for the father, and the third name exists in the glowing region of heaven.

Sāyaṇa explains the inner meaning of such verse. The oblation which is offered to Agni, goes to the abode of the Ādityas; and among them Indra and Viṣṇu get nourishment. On the other hand, Indra and Viṣṇu send rain water to the world. At this situation the world becomes full of plant and corns on which animals as men live. In this circle of production there originates father, son as offspring and grand-sons. Heaven and earth to be द्यावापृथिवी respectively are connotated as the motherly womb on पौंस्यं नि मातरा नयति रेतसे भुजे--ऋ.१।१२।३. In stanza '6' चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीरवीविपत्, बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् Viṣṇu covers by making four times ninety days of the year like a moving circular wheel. Having possessed a vast figure and nourished by praises in sacrifices he is ever eternal young and unbachelor i.e. अकुमार, and goes for war to be आहव. This is a verse indicating measure of time as wheel or cycle of time. According to Sāyaṇa's ascetainment, there are 94 periods of time i.e. चतुर्नवति. These are one year i.e.—saṁvatsara, two Aśvins, five seasons, twelve months, twenty four pakṣas, thirty ahorātras, eight Praharas, twenty four nights as 1+ 2+ 5 + 12 + 24 + 30 + 8 + 24. Muir interprets चतुर्भिर्नवतिम् as four times ninety days to be three hundred sixty days. In terms of days in a year this interpretation is easy to be understood. So there are many ascertainments of period.

Three bonds are noted as बन्धनानि त्रीण्यप्सु which are entitled to Aśva like atmospheric region. In the Ṛgveda there is a reference to such a bond on त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे-ऋ. १।६३।४ to mean that Oh Aśva! you have three hands like बन्धनानि in heaven as well as three bindings in water i.e.—in the world and three in the sky. Then three bindings specially are so entitled to the heaven on आहुस्ते त्रीणि दिवि बन्धनानि--ऋ. १।१६३।३.

शब्दार्थयोः साहित्यधर्मः अस्मदालोच्यविषयमूलम्। साहित्यशब्देन साम्प्रतं संस्कृते वङ्गभाषायाञ्च काव्यनाटकादिदीप्तिगुणात्मकानां रचनानां परिग्रहः। साहित्यं तत्र काव्यशब्दस्यैव पर्यायवाचकत्वेन परामृष्टम्। वङ्गभाषायान्तु काव्यशब्दः स्वमर्थं गुणीभूय केवलं छन्दोबद्धमहाकाव्यादिकं बोधयति। सहस्रवर्षेभ्यः पूर्वं राजशेखरस्य कालादारभ्य साहित्यशब्दस्यायं प्रयोगः प्राचलत्। भोजराजेन विशेषेण कुन्तकाचार्येणापि प्रचलितार्थे शब्दोऽयं प्रयुक्तः। वङ्गभाषायां पुनः साहित्यशब्देनार्थस्य प्रचयगमनार्थं दर्शनविज्ञानादिशब्दार्थमयवाङ्मयस्य बोधो जायते। अर्थाद्वक्तुं शक्यं यद्वङ्गभाषायां काव्यशब्दस्यार्थसंकोचस्तथा साहित्यस्य चार्थव्याप्तिरिति अभवत्। साहित्येनावबुध्यते शब्दार्थयोर्मिलितसत्ताया मिलनमिति। काव्येन चावगम्यते कविकर्म कवेर्महिमा वेति। परं फलितार्थे शब्दद्वयमेकसत्तायामापन्नम्। पाश्चात्त्यतत्त्वज्ञैरपि वागर्थयोरभेदत्वं सुन्दरतया व्याकृतम्। कविशेलिवर्यैः शब्दः (sound) अर्थः (thought) चेत्युभयोर्मिथः सम्बन्धः समुल्लिखितोऽपि नायं विचारितः। एवं कार्लाइलमहाभागा अपि उपमासहयोगेन विषयमिमं समीरितवन्तः-'देहात्मनोरिव शब्दार्थयोश्च स्थले तथा सर्वत्रैवाश्चर्यरूपेण सहगामित्वं वर्तते।'[९] साहित्यापरपर्यायस्य काव्यस्यैतादृशविभाज्यस्वरूपविधौ एवारक्रम्बिमहाभागस्याशयोऽत्रोल्लेखार्हः - 'काव्यस्य धर्माः परस्परं न विभाजनीयाः। काव्यमेव स्याच्चेत्तर्हि तदविभाज्यतया सामूहिकरूपेण च विद्यमानं स्यादिति।[१०] विषयोऽयं निःसंशयं स्पष्टीकृतो मनस्विना ब्राड्लेपादेन यत्-'यथा हास्यरेखास्तदर्थाश्च भवत्सविधे एकमेव वस्तु, न द्वयं, तथा काव्येऽपि अर्थध्वन्योरेकत्वं विद्यते। अहमेवैतद्वक्तुं शक्यमत्र समस्ति ध्वनिमयोऽर्थः कश्चन उतार्थमयध्वनिरिति। [११]।

भाषा तावद्भावस्य' प्रकाशिका (expressive), भावोद्दीपिका (emotive), रूपोद्दीपिका (evotive) चेति। रचयिता भाषाया माध्यमेन मनुजनुनां भावमभिव्यनक्ति। तत्र रसस्यैव सर्वातिशायि प्राधान्यं सर्वैरभ्युपगतम्। एवं शब्दार्थभावा दण्डचक्रादिन्यायेन, न तु तृणारणिमणिन्यायेन मानवानामनुभूतौ प्रतिक्रियां सृजन्तः साहित्यमुपजनयन्ति। यदापि वाह्यिकदिशा प्राच्यपाश्चात्त्ययोर्नास्ति तादृशोऽन्तरः, परं सूक्ष्मेक्षिकया विचार्यते चेत्तर्हि दृश्यते सामूहिकतयोभयोस्तत्त्वजातानां वैलक्षण्यं विद्यते नाम।

२.१ साहित्यतत्त्वविश्लेषणे प्राच्यविदुषामाशयः

प्राच्यसाहित्यतत्त्वालोचनात् प्रागेव एतत्स्मर्तव्यं यत् शास्त्रमिदं स्वजन्मसमयादेव नितरां लोकप्रियतां गतम्। कालभेदात् काव्यशास्त्रस्य विविधनामान्तरसत्त्वेऽपि तत्र सर्वसम्मततया काव्यलक्षण शब्दार्थशक्ति-गुण-रस-रस-ध्वनि-रीत्यलंकारादिसाहित्यतत्त्वं प्रतिपादितमासीत्। तेषु साहित्यस्वरूपं नाम काव्यस्वरूपालोचनं

प्रामुख्यमभजत। अतः 'प्राधान्येन व्यपदेशा भवन्तीति' इति न्यायाद् गुणालंकारध्वनिरीत्यादीनां प्रधानोपजीव्यभूतत्वात् काव्यस्वरूपमादौ पर्यालोचितमिह बन्धे। मया अग्निपुराणे सर्वप्रथमं काव्यलक्षणं लक्षितम्--

"संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम्॥" इति।[12]

अत्र काव्यस्य तत्त्वानि स्वीक्रियन्ते-इष्टार्थः, संक्षिप्तं वाक्यम्, अलंकाराः, गुणाः, दोषाश्चेति। एतेन काव्यस्य बाह्यरूपरेखा स्फुटीभवति।

२.१.० काव्यस्वरूपविषयको भरताचार्यनयः

भरतस्य नाटयशास्त्रे प्राचीनतमं काव्यलक्षणमुपलभ्यते--

"मृदुललितपदाढ्यं गुणशब्दार्थहीनं
जनपदसुखबोध्यं युक्तिमन्नृत्ययोग्यम्।
बहुकृतरसमार्गं सन्धिसन्धानयुक्तं
भवति जगति योग्यं नाटकं प्रेक्षकाणाम्॥" इति।

अत्र मुख्यतो दृश्यकाव्यमेव परिभाष्यते। अत्रेदमुल्लेखार्हं यत् भरताचार्यैः काव्यस्य पर्यायवाचकत्वेन नाटकमिति मन्यते। तथाहि त्रिलोकस्य भावानामनुकरणं हि नाट्यमित्युक्तम्--'त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनमि'ति। किञ्च 'लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्' इत्युक्त्वा भरताचार्येण मनुष्याणां प्रवृत्तेरनुकरणं नाट्यमित्यभिधीयते। अतोऽवस्था-देश-काल-प्रकृति-विशेषसमुचितभावानुकीर्तनमात्रमेव कर्तव्यम्।[13]

अस्य निहितार्थोऽयं यदनुकरणेन वस्तुनः प्रत्यक्षमूर्तेः चित्रणमेव न हि शिल्पपदवाच्यं, परं तस्यान्तःस्थितभावमूर्तिः परिकर्तव्या शिल्पिना। अत्रेदमुल्लेखार्हं यदनुकरणं काव्यशिल्पस्य प्राथमिकसत्यमिति परञ्च शिल्पिनो दृष्टिभङ्गिमानसिकतयोः भूमिका भारतीयालंकारशास्त्रे नितरामुल्लेखार्हा।

भरतोत्तरवर्तिनि काले आचार्याणां विचारप्रकारद्वयं समुपलभ्यते। केचनाचार्याः शब्दनिष्ठमेव काव्यत्वं स्वीकुर्वन्ति केचन च शब्दार्थोभयनिष्ठम्।

१.१.१. शब्द एव काव्यम्--

गुणालंकारादिनिष्ठप्रकारतानिरूपितविशेषताकाव्ये विशेष्यतावच्छेदकं काव्यत्वम्। प्रसङ्गादत्र 'शब्द एव काव्यम्' इति मत्वा कृतानि प्राचीनाचार्याणां काव्यलक्षणानि प्रदर्श्यन्ते--

(क) दण्डिनः काव्यस्वरूपम्--

'तैः शरीरञ्च काव्यानामलंकाराश्च दर्शिताः' इत्यनेन काव्यस्य शरीरं निरूपयताचार्येण दण्डिनाभिहितम्-

'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' इति। चकारद्वयमुभयप्राधान्यद्योतकम्। काव्यानामिति बहुवचनं मुक्तकादिभेदेन काव्यस्य बहुविधत्वसूचनाय। काव्यस्य शरीरं पदावलीरूपं भवति। कीदृशी पदावलीति चेदाह-मनोज्ञरूपेणाभिलाषिताः येऽर्थास्तैर्युक्ता पदावली काव्यशब्दवाच्या भवतीति यावत्।

न चेष्टार्थव्यवच्छिन्नानां पदानां काव्यत्वस्वीकारे सति 'कविता कामिनी चन्दनं ललितम्' इति पदसमुदायस्यापि काव्यत्वापत्तिः स्यादिति वाच्यम्, पदानामाकाङ्क्षायोग्यतादिसमन्वितानामेवात्रेष्टार्थव्यवच्छिन्नानां काव्यत्वस्याभिप्रेतत्वात्।

अत्र एवेष्टार्थत्वं नाम चमत्कारबहुलत्वम्। लोकोत्तराह्लादजनकत्वमेव चमत्कारत्वम्। तच्चायाति काव्येषु कविप्रतिभाजन्यार्थनिवेशितत्वादिति। एवं दण्डी शब्दस्यैव काव्यत्वं स्वीकरोति। भोजेन 'सरस्वतीकण्ठाभरणे' अभ्यधायि--

'निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम्।
रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिश्च विन्दति॥' इति।[१४]

अर्थाद् दोषरहितं गुणोपेतमलंकारयुक्तं, रसान्वितं काव्यं विरच्य कविः प्रीतिं यशश्च लभते। भोजराजस्य काव्यलक्षणमिदमलंकारवादिनां मार्गमनुसृत्यैव निरूपितं यत्र गुणालंकारसानां समधिकप्राधान्यं प्रदत्तम्।

(ख) जगन्नाथस्य विचारः

सप्तदशशताब्द्यां पण्डितराजेन जगन्नाथेन 'रसगङ्गाधरे' स्वाभिमतं काव्यलक्षणमकारि-'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति। अर्थात् स्वप्रातिभज्ञानमूलकालौकिकचमत्कारकारणेन मनोहरस्यार्थस्य वाच्यलक्ष्यव्यङ्ग्यान्तरस्य प्रतिपादकः समुद्भावकः शब्दः काव्यम्। अतो रमणीयार्थप्रतिपादकत्वे सति शब्दत्वं काव्यम्।

अत्र लक्षणे दोषादिपरिहारो यथा-रमणीयस्य चमत्कारानुरागाद्यर्थस्य व्यञ्जके कटाक्षनिक्षेपाद्यर्थेऽतिव्याप्तिं वारयितुं विशेष्यदलम्। रमणीयत्वविशेषणञ्चाचमत्कारार्थबोधके 'घटमानय' इत्यादिवाक्येऽतिप्रसङ्ग-व्युदासाय। अपरञ्च, रमणीयार्थनिरूपितस्य वाचकत्वस्य निवेशे तादृशार्थव्यञ्जके व्यञ्जकत्वस्य निवेशे च तथाविधार्थवाचके शब्देऽव्याप्तिं निराकर्तुं तदुभयसाधारणस्य प्रतिपादकत्वस्य प्रवेशः। रमणीयशब्दप्रतिपादके व्याकरणेऽतिव्याप्तिं परिहर्तुञ्चार्थस्य ग्रहणम्।

ननु का रमणीयता इति चेदुच्यते--'रमणीयता च लोकोत्तराह्लादज्ञानगोचरता' इति। साम्प्रतं प्रश्नः समुदेति--किं नाम लोकोत्तरत्वमिति? ग्रन्थकारः स्वयमेवाह--'लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः' इति। अत्रायमाशयो यत्--अत्रत्यलोकोत्तरत्वं सातिशयो निरतिशयो वा किमपि न हि घटत्वपटत्वमिवानन्दे स्थित एको जातिविशेषः। सहृदयानामनुभव एव प्रमाणम्। यथोक्तं विश्वनाथेन--'सचेतसामनुभवः प्रमाणं तत्र केवलम्' इति।

पुनः शङ्का जागर्ति यत्--ननु ईदृशं लोकोत्तरचमत्कारं को जनयतीत्याकाङ्क्षायामाह--'कारणञ्च तदवच्छिन्नो

भावनाविशेषः पुनः पुनः अनुसन्धानात्मा' इति। अत्रायमाशयः--विशिष्टे लोकोत्तरानन्दे पुनः पुनः अनुसन्धानरूपो धारावाहिको भावनाविशेषः शाब्दबोधात्मकः अनुभव एव कारणमिति। अत्राह्लादे लोकोत्तरनिवेशे कारणमाह--'पुत्रस्ते जातः', 'धनं ते दास्यामि' इति वाक्यार्थधीजन्याह्लादस्य न लोकोत्तरत्वम्, अतो न तस्मिन् वाक्ये काव्यत्वप्रसक्तिरिति। वस्तुतो वाक्यार्थानामेषां भावनया समुत्पन्न आनन्दो नैव लोकोत्तरो भवितुमर्हति। सहृदयानां मते, तस्मिन्नानन्दे लोकात्तरत्वस्य प्रतीतिर्न भवति।

एतत्सर्वं प्रस्तुतेऽस्मिन् काव्यलक्षणनिष्कर्षरूपे यथा समाहितं तत्तथा-

'इत्थं चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्, यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वं स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा कारणत्वमिति फलितम्' इति।

जगन्नाथेन लक्षणमिदं निरूप्य रमणीयतावादो नाम विशिष्टमतादर्शः प्रतिष्ठापितः संस्कृतालंकारशास्त्रे।

२.१.२ शब्दार्थनिष्ठं काव्यम्--

अथ ये च शब्दे चार्थे चोभयत्र काव्यत्वमभ्युपगच्छन्ति, तेषां नामानि प्रदर्श्यन्ते। प्राचीनालंकारिकैर्भामहैः प्रथमं तावत् काव्यसंज्ञाकारि--'शब्दार्थौ सहितौ काव्यम्' इति। काव्यशास्त्रे शब्दार्थयोरविच्छेद्यसम्बन्धज्ञापनाय विशेषणत्वेन सहितशब्दस्य प्रयोगः संलक्ष्यते प्रथमतया। रचनाया गुणगतमानविश्लेषणं भामहदण्डिणोरासील्लक्ष्यम्। अर्थगतदिशा साहित्यमीमांसा परवर्तिभिरुद्भटादिभिरालंकारिकैः मीमांसिता।

उत्तरभाविनि काले साहित्यशब्दं गुहित्वा रुद्रटमम्मटादिभिः साहित्यमीमांसकैः कालिदासादिभिः कविभिश्च काव्यलक्षणं लक्षितम्। यथा-'काव्यालंकारसूत्रवृत्तौ' वामनेन 'काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते। भक्त्या तु शब्दार्थवचनमात्रोऽत्र गृह्यते' इत्युक्तम्। रुद्रटाचार्यैरुदितम्--'शब्दार्थौ काव्यम्' इति। 'काव्यानुशासने' वाग्भटाचार्येण लक्षितम्--'शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालंकारौ काव्यम्' इति। विद्यानाथेन 'प्रतापरुद्रीये' भणितम्--

'गुणालंकारसहितौ शब्दार्थौ दोषवर्जितौ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः॥' इति।[१५]

'एकावल्यां' विद्याधरेण-'शब्दार्थौ वपुरस्य, तत्र विबुधैरात्माभिधायि ध्वनिः॥' इति।[१६]

क्षेमेन्द्रेण 'कविकण्ठाभरणे' निगदितम्--'काव्यं विशिष्टशब्दार्थसाहित्य-सदलंकृतिरि'ति। न्यायवागीशेनालंकारचन्द्रिकायां समुदितं--

'गुणालंकारसंयुतौ शब्दार्थौ रसभावगौ।
नित्यदोषे विनिर्मुक्तौ काव्यमित्यभिधीयते॥' इति।[१७]

क. काव्यमीमांसायां साहित्यस्वरूपम

काव्यार्थे सुस्पष्टतया साहित्यशब्दं प्रयुक्तवान् राजशेखरस्तदीयायां काव्यमीमांसां दशमशताब्द्याम्। तेन

स्वयमेव साहित्यविद्यास्वरूपं निर्णीतम्-'शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या' इति। सहभावार्थ एव साहित्यम्। अत्र भामहोक्तसहितशब्दो गुणवाचकविशेष्यरूपतां लब्धा द्रव्यार्थे साहित्यत्वमाप्नोति। सहितयोर्भावः साहित्यम्। किञ्च, काव्यमीमांसायां काव्यपुरुषं साङ्गोपाङ्गं प्रस्तौति।

'शब्दार्थौ ते शरीरं, संस्कृतं मुखं, प्राकृतं बाहुः..... रस आत्मा, रोमाणि छन्दांसि, अनुप्रासोपमादयश्च त्वामलंकुर्वन्ति' इति। अत्र 'रस आत्मा' इत्यनेन काव्ये रसस्यात्मत्वमुरीकृतम्। ग्रन्थस्यास्य 'पदवाक्यविवेकाख्ये' अध्याये आदावेव 'पदानामभिधित्सितार्थग्रन्थनाकरः सन्दर्भो वाक्यम्' इत्युक्त्वा 'गुणवदलंकृतश्च वाक्यमेव काव्यम्' इति काव्यलक्षणमकारि राजशेखरेण। वाक्यस्य प्राधान्यं स्वीकृत्य पदानां शोभासम्पादकधर्मत्वेन गुणालंकारयोरपहिार्यत्वमङ्गीकार्यम्।

ख. भोजराजस्य साहित्यमीमांसा

एकादशशताब्द्यां भोजराजेन तदीयसाहित्यमीमांसायां साहित्यविषयकं यद्विरचितं तत्र भाषा काव्यस्तरे समुन्नोता जाता। तथाहि तेनाभ्यधायि शृङ्गारप्रकाशे-'किं साहित्यम्? यः शब्दार्थयोः सम्बन्धः। स च द्वादशधा-अभिधा, विवक्षा, तात्पर्यम्, प्रविभागः, व्यपेक्षा, सामर्थ्यम्, अन्वयः, एकार्थीभावः, दोषहानं, गुणोपादानम्, अलंकारयोगः, रसावियोगश्चे'ति। तन्नये शब्दार्थयोः द्वादशविधत्वसम्बन्ध एव साहित्यम्। तत्रादिमा अष्टौ सम्बन्धा व्याकरणमूलाः। इतरं सम्बन्धचतुष्टयमेवालंकारशास्त्रनिष्ठम्। ते च यथा-दोषवर्जनं, गुणग्रहणम्, अलंकारप्रयोगो, रसावियोगश्चेति। अर्थात् शब्दार्थयोः साहित्येन कृत्स्नं व्याकरणशास्त्रमलंकारशास्त्रञ्चावबुध्यते।

ग. मम्मटाचार्यस्य काव्यलक्षणविमर्शः

'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति लक्षणमेतत् काव्यस्य स्वरूपं सर्वाङ्गत्वेन व्यवस्थापयति। अर्थाद् अदोषौ रसप्रतिघातिदोषानपहतौ सगुणौ प्रातिभासिकेन सत्येन वा माधुर्योजः प्रसादादिगुणगणेन व्यस्तेन समस्तेन वा सहितौ क्वापि क्वचिच्च स्फुटरससहितस्थले तु अनलंकृतौ स्फुटालंकाररहितावपि शब्दार्थौ काव्यम्।

प्रथमतः--दोषयोः शब्दार्थयोरतिव्याप्तिवारणायादोषौ इत्युक्तम्। पूर्णतो निर्दोषस्य काव्यस्याभावादसम्भवदोषापत्तिः स्याल्लक्षणेऽस्मिन्। सत्स्वपि वा तादृशेषु द्वित्रेषु प्रविरलविषयतया काव्यविद्भिः काव्यत्वेनोररीकृतानामनेकेषामेव काव्यानामकाव्यापत्तिः स्यादिति। यथा कालिदासादेः काव्यमपि न निर्दोषावहम्।

अत्रायं समाधिर्यत्--निर्दोषशब्देन काव्यस्य रसापकर्षदोषराहित्यमेव विवक्षितम्। अत आदर्शकाव्ये निर्दोषतायाः चिकीर्षितत्वात् काव्यं यथा निर्दोषं भवेत्तदर्थं यतनीयं काव्यकृद्भिः। तदुक्तं दण्डिना--

'तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्यादवपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥' इति।[१८]

द्वितीयतः-निर्गुणयोः शब्दार्थयोरतिव्याप्तिवारणाय सगुणौ इत्युक्तम्। गुणशब्देनात्र माधुर्यौजःप्रसादादयो गुणा व्यपदिश्यन्ते। अपि तु गुणस्य रसनिष्ठत्वात् गुणपदं तद्व्यञ्जकपरम्।

तृतीयतः-अनलंकृतीत्यत्राल्पार्थको नञ्। तेनानलंकृतीत्यस्यार्थस्ता-वदस्फुटालंकारौ। अस्फुटालंकारौ शब्दार्थावपि क्वचित् काव्यत्वमधत्त। एतेन सर्वत्र काव्यमिति फलति।

मम्मटनये काव्यं सदैव स्फुटालंकारविशिष्टं क्वचित् स्फुटरससहितस्थले स्फुटालंकाराभावेऽपि अस्फुटालंकारविशिष्टं भवति अलंकारकृतचमत्कार-स्यापि काव्ये आवश्यकत्वात्।

'अनलंकृती पुनः क्वापि' इत्यनेनापि रसयुक्तस्यास्फुटालंकारस्य क्वचिदेव काव्यत्वमङ्गीकृतम्। तथा च--

'यः कौमारहरः स एव वरस्ता एव चैत्रक्षपास्ते चोन्मीलित-मालतीसुरभयः प्रौढाः कदम्बनिलाः। सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥'

इत्यत्र पद्ये 'हरः वरः' इत्याद्यनुप्रासस्य स्फुटस्यापि प्रकृतशृङ्गाररस-प्रतिघातिवर्णघटितत्वेन नालंकारता। यद्यप्यत्र विभावनाविशेषोक्तो तावत् सम्भावितेतथापि न ते स्फुटे। अनयोरस्फुटत्वेन एतन्मूलकसत्त्वे सगुणालंकारयोरपि अस्फुटत्वम्। अत्र विप्रलम्भशृङ्गाररसस्य प्राधान्यान्नालंकारता। विश्वनाथेन तत्र विभावनाविशेषोक्तिमूलक-सन्देहसंकरालंकारस्य स्फुटत्वमङ्गीकृतम्।

विश्वनाथेन तु महता प्रयत्नेन प्रायेण प्रतिपदं दोषमुद्भाव्य मम्मटप्रदत्तकाव्यलक्षणस्य खण्डनं विहितम्।

२.१.३. काव्यस्यात्मा

पवर्तिभिराचार्यैः 'कः काव्यस्यात्मा' इति गवेषयद्भिर्बहुधा च प्रस्तूयते। वस्तुतः शब्दार्थयोः समन्वयेन काव्यस्य शरीरं निर्धार्यते। काव्यस्य शरीरज्ञानेऽपि तत्र 'क आत्मा' इति न निश्चप्रचं परिज्ञायते--

क. आचार्यवामनमतानुसारं काव्यस्यात्मा रीतिः

रीतेरात्मा गुणः। अतो गुणस्यैव काव्ये मुख्यत्वम्। स एव काव्यस्य नित्यधर्मः। तदुक्तं वामनेन--'काव्यशोभायाः कर्तारो धर्मा गुणाः' इति। अतस्तेनोक्तं 'रीतिरात्मा काव्यस्य' इति। ननु केयं रीतिरित्यपेक्षायामाह वामनः-

-

'विशिष्टा पदरचना रीतिः' इति। अस्यार्थस्तेनैव स्फुटीकृतः-'विशेषवती पदानां रचना रीतिः' इति। अत्र कोऽसौ विशेष इत्याकाङ्क्षायामाह 'विशेषो गुणात्मा' इति। गुणात्मा ओजःप्रसादादिगुणस्वभाव इत्यर्थः। रीतिशब्देन शैली भाषासौन्दर्यं सालंकृतित्वञ्चाभीष्यन्ते।

ख. काव्यात्मविमर्शे ध्वनिकारनयः

ध्वनिकारस्तु 'काव्यस्यात्मा ध्वनिः' इत्येतत्स्वमतं बलीयसीभिर्युक्तिभिः गरीयोभिस्तर्कैः प्रमाणैश्च प्रतिपाद्यैतस्य युक्ततां साधयामास। ध्वनिकृता काव्यस्यात्मा ध्वनिरित्याद्युक्त्या काव्यत्वतया काव्यस्य स्वरूपं प्रतिपादयितुं प्रवृत्तेन सहृदयश्लाघ्यस्य प्रतीयमानार्थस्य काव्यात्मत्वं समुद्घोषितम्। तदुक्तं ध्वन्यालोकस्य प्रथम उद्योते-

'योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥' इति।[१९]

किञ्च आनन्दवर्धनेन शब्दार्थयोः समप्राधान्यमङ्गीकृत्य काव्यलक्षणं लक्षितम्--'सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्' इति। काव्यं तस्य गुणालंकारादीनि अङ्गानि चाविच्छेद्यसम्पर्केण मिथः सम्बन्धिनीति मतमानन्दवर्धनेन ध्वन्यालोके प्रतिपादितम्।

ध्वनिवादिनां नये, गुणालंकाररसादियुक्तमखण्डमविभाज्यं कविकर्म एव काव्यम्। काव्यस्य तादृशमविभाज्यत्वमभिनवभारत्यां प्रतिपादितमासीत्। तथाहि अभिनवभारत्याम् अभिनवगुप्तपादेनोक्तं--

'........किञ्च पुरुषस्यैव काव्यस्य लक्षणगुणालंकारव्यवहारो न युक्तः। पुरुषस्य शरीरचैतन्यभेदात् कटकादीनां ततोऽपि भेदात्। काव्यस्य पुनर्विरचनकाले प्रतिपत्तिकाले च प्रापकसत्तायां तेषामगणितत्वात्.....किन्तु विरचनविवेचनसामर्थ्यसमर्थनायावश्यं काल्पनिकोऽपि विभाग आश्रयणीयः।' इति।

अलंकारादिभिर्नित्यसम्बन्धत्वे काव्यस्य महिमभट्टस्यापि सम्मतिरासीदिति तस्य व्यक्तिविवेकस्य विश्लेषणादेव परिज्ञायते। तथा चोदितं तेन--

'किञ्च सौन्दर्यातिरेकनिष्पत्तयेऽर्थस्य काव्यक्रियारम्भः कवेः न तु अलंकारनिष्पत्तये, तेषां नान्तरीयकतयैव तत्सिद्धेः भङ्गिभणितिभेदानामेवालंकारत्वोपगमात्।

न चालंकारनिष्पत्यै रसवन्धोद्यतः कविः।
यतते ते हि तत्सिद्धिनान्तरीयकसिद्धयः॥
यतः..........रसस्याङ्गं विभावाद्याः साक्षान्निष्पादकत्वतः।
तद्वैचित्र्योक्तिवपुषोऽलंकारस्तु तदाश्रयः॥' इति।

ग. साहित्यदर्पणकृतः साहित्यात्मविषयचिन्तनम्

प्राचीनकाव्यलक्षणानि स्वयुक्त्या दूषयित्वा किं पुनः काव्यमिति निरूपणाय दर्पणकारः स्वाभिमतं काव्यलक्षणस्वरूपं दर्शयति--'वाक्यं रसात्मकं काव्यम्' इत्यनेन। रस आस्वादविशेषः शृङ्गारादिरिति यावदात्मा यस्य तद्वाक्यं पदोच्चयविशेषः काव्यम् इत्यर्थः। 'रसो वै सः' 'रसो ह्येवायं लब्ध्वानन्दीभवति' इत्यादिश्रुत्युक्तनयेन रस एवात्मा। स च 'रस्यत आस्वाद्यते' इति समाख्यानुरोधेनानुभवैकविषयः शृङ्गारादिव्यपदेशः चमत्कारविशेषः। असौ च काव्यस्य शरीरीभूतो जीवनाधारः। शरीरं चैतस्य वाक्यम्। तस्मात् काव्यस्य वाक्यरूपे रसव्यपदेशः चमत्काररूप आत्माधिगम्यते। अतः अनेन प्राणितं वाक्यमेव काव्यम्। शरीरमन्तरात्मेव वाक्यमन्तरा न रसश्चमत्कुरुते। अतो वाक्यशरीरो रसः।

अतो रसात्मकं वाक्यं काव्यमित्यन्वयः। अत्र वाक्यमित्यनेन काव्यलक्षणे योग्यताकाङ्क्षासत्तियुक्तस्य पदोच्चयस्यैव प्राधान्यम्। लक्षणेऽस्मिन् रसपदेनासंलक्ष्यक्रमभेदानां सर्वेषां परिग्रहः। तथा च व्यञ्जकतासम्बन्धेन रसादिमद्वाक्यत्वं काव्यत्वमिति काव्यसामान्यलक्षणम्। विश्वनाथेनैव वृत्तौ लक्षणमिदमेव व्याख्यातं--'रस एवात्मा साररूपतया जीवनाधायको यस्य, तेन विना काव्यत्वानङ्गीकारात्' इति। अत्र एवकारेण ध्वनिकाराद्युक्तस्य वाच्यार्थस्य वस्त्वलंकारमात्रव्यङ्ग्यस्य व्यवच्छेदः। पूर्वाचार्यं भरतमुनिमनुसृत्य एव लक्षणमिदमुपनिबद्धम्। तथाहि

'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति भरतः। व्यक्तिविवेककृतापि उक्तम्--'काव्यस्यात्मनि सङ्गिनि रसादिरूपे न कस्यचिद्विमतिः' इति।

तथा चात्र लक्षणे 'रस्यते चर्वणाविषयीभवति इति रसः' इति व्युत्पत्त्या रसपदेन रस-रसाभास-भाव-भावाभासादीनामपि ग्रहणम्। तथाहि तेषु रसभावतदाभासादिषु काव्यात्मभूतेषु मध्ये रसस्योदाहरणम्--'शून्यं वासगृहं विलोक्य.......' इत्यत्र शृङ्गाररसो व्यज्यते। स च सम्भोगरूपः। सा च सहृदयहृदयनिष्ठा स्थायिभावरतिः शृङ्गाररूपेणावतिष्ठते। स च रसोऽखण्डास्वादविशेषरूपः। इत्थमेव रसात्मवाक्यस्य काव्यरूपता।

दर्पणकारस्य काव्यलक्षणस्यास्य किञ्चिद्वैशिष्ट्यमस्ति। लक्षणमिदं प्रकाशकारकृतलक्षणस्य संक्षिप्तसारमिति नो मतम्। अपि चेदं, प्रकाशकृल्लक्षणायाः सुसंस्कृतरूपमिति।

घ. कुन्तकाचार्यस्य साहित्यपदविचारः

आनन्दवर्धनात्परमेव ये तावदलंकारिकाः प्रादुर्भूतास्तेषु बहव एव ध्वनिवादमभ्युपगम्य काव्यमीमांसां चक्रुः, परन्तु केचन ध्वनिवादमसहमाना नवनवीनं तत्त्वं व्यवस्थापयितुं यतितवन्तः, एवं ध्वनिविरोधितया निर्दिष्टेष्वालंकारिकेषु कुन्तकादयः समुल्लेखार्हाः। तत्रभवतां कुन्तकेन स्वकृतवक्रोक्तिजीवितग्रन्थे वक्रोक्तेरेव काव्यात्मत्वं व्यवस्थापितम्।

आदावेव काव्यमेकमविभाज्यं कविप्रतिभोपेतं सृष्टिकर्मेति कुन्तकाचार्यस्याशयः। कवेः प्रातिभदर्शनमेव वक्रवाचिप्रकाशितं काव्यतया परिगण्यते। अतो, वक्रोक्त्या समलंकृतमेव काव्यं प्रजायते। अपि च, कविव्यापारः सृष्ट्युन्मुखो गुणालंकारादिसमन्वितं वक्रवागात्मकं विरचनं निष्पादयति। अतः काव्यस्यायमलंकारो गुणोऽयमित्यादिरूपेण विश्लेषणं न युक्तम्। एवमखण्डं निरस्तावयवमविभाज्यमेव कविकर्म तत्त्वदिशा काव्यतया कुन्तकेनोररीकृतम्।

साहित्यमिति यद्यपि काव्यसमार्थकपदं तथापि कुन्तकपूर्ववर्ती कश्चिदालंकारिकः साहित्यशब्दस्य तथाविधं व्याख्यानं न चकार। यथा तस्य काव्यसमर्थकता प्रतिष्ठिता भवेत्तदर्थं विषयेऽस्मिन्नवहितेन कुन्तकेनागादि स्वयमेव--

> 'यदिदं साहित्यं नाम तदेतावति निःसीमनि
>
> समयाध्वनिः साहित्यशब्दमात्रेणैव प्रसिद्धम्। न पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढिरमणीयस्याद्यापि कश्चिदपि विपश्चिदयमस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः।' इति।

तेन साहित्यशब्दस्य त्रिधा व्याख्यानं विहितम्। काव्यस्वरूपस्याविभाज्यत्वं प्रदर्श्य व्यवहारिकदृष्ट्या काव्यलक्षणमेवं लक्षितम्--

'शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।' इति।[२०]

अर्थादाह्लादकारिणि वक्रोक्तियुक्ते बन्धे वैशिष्ट्ययुक्ततया स्थितौ शब्दार्थौ काव्यमिति।

साहित्यस्य प्रथमप्रकारः

कुन्तकलक्षिते काव्यलक्षणे शब्दार्थौ सहितौ काव्यमिति अंशविशेषः। प्रथमस्तेन शब्दार्थयोरुभयोरेव साहित्यं काव्यमित्युक्तम्। अत्रैव साहित्यस्य प्राथमिकं तत्त्वं सामान्येन प्रतिपादितम्। कविकर्मसु विद्यते शब्दसमुदायस्तथार्थसमुदायः। अनेन समुदाययोः मिथः सौन्दर्यशालितापेक्षिता वर्तते। सौन्दर्यसम्पदा उभयमेव परस्परप्रतिस्पर्धि भवेत्। तेनोक्तम्--

‘शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकम्
इति विचित्रैवाप्तिः।........तस्माद् द्वयोरपि प्रतितिलमिव
तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्।’ इति।

साहित्यस्य द्वितीयप्रकारः

कविकर्मणि विद्यमानशब्दानां मिथः साहित्यं तथार्थानां मिथः साहित्यं यद्व्याख्यातं वक्रोक्तिजीवितकृता तदेव तस्य साहित्यतत्त्वस्य द्वितीयप्रकारतया प्रतिभाति।

शब्दभागे विद्यमानानां शब्दानां कुत्रचिन्न्यूनता क्वचिच्चार्थभागे वर्तमानानां शब्दानां दृश्यते। शब्दांशविशेषे साहित्याभावो यथा-

‘चारुता वपुरभूषदासां तामन्यूननवयौवनयोगः।
तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः॥’ इति।

अत्र कविविवक्षितस्य दयितसङ्गमशब्दस्य प्राधान्यं बाधितम्। एतेन काव्यसौन्दर्यस्योत्सभूतदीपकालंकारोऽपि विपर्यस्तः। अतोऽत्र शब्दांशे न्यूनता विशेषेण लक्षणीया।

अर्थस्यार्थान्तरेण सह साहित्यविरहो यथोदाहृतो ग्रन्थकृता-

‘असारं संसारं परिमुषितरत्नं त्रिभुवनम्।
निरालोकं लोकं मरणशरणं वान्धवजनम्॥
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमपि विधातुं व्यवसितः॥’ इति।

अतः श्लोकयोरनयोः शब्दसौन्दर्ये विद्यमानेऽपि नास्ति लेशतोऽपि अर्थसौन्दर्यमिति कृत्वा उदाहरणमिदं साहित्यपदवाच्यं न भवितुमर्हति।

अर्थसौन्दर्याभावस्योदाहरणमिदं विविच्य शब्दसौन्दर्याभावेन साहित्यभावं व्याख्यातुं कुन्तकेनोदाहरणमेकमुपात्रम्--

'प्रकाशस्वाभाव्यं विदधाति न भावस्तमसि यत्।
तथा नैते ते सूर्यादि किल तथा तत्र न कथम्॥
गुणाध्यासाभ्यासव्यसनदृढदीवागुरुगुणौ
रविव्यापारोऽयं किमथ सदृशं तस्य महसः॥' इति।

अत्र कुन्तकेनैवं समीक्षितं यद् अप्रस्तुतप्रशंसात्मकः कश्चिद् रमणीयार्थः कवेश्चेतसि प्रतिभातोऽभवत्। किन्तु स यथायथशब्देन न सम्पन्नः। अतः काव्यिकसौन्दर्यप्रतियोगितायां शब्दसमुदायो न्यूनतां भजते। तदर्थमेव श्लोकोऽयं साहित्यपदवाच्यो भवितुं नार्हत्येव। एवमुदाहरणप्रत्युदाहरणद्वितयं प्रदर्श्य कुन्तकेन शब्दार्थसाहित्यस्योदाहरणं यथा प्रदत्तं कुन्तकेन स्वयमेव-

'ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।
दध्रे कामपरिक्षामकामिनीगणपाण्डुताम्॥' इति।

अत्रानुप्राससद्भावाद् वर्णविन्यासवक्रता शब्दसमुदाये विलसतितराम्। सुप्रयुक्तोपमा वर्ण्यमानस्यार्थभागस्य परिपूर्णं सौन्दर्यं प्रकाशयतितराम्। एवमत्र शब्दसमुदायोऽर्थसमुदायश्च सर्वजनस्पृहनीयतां बोधयितुं समर्थाः। किन्तु 'मरणशरणम्' इत्यवान्तरवाक्यस्यार्थः सौन्दर्यप्रतियोगितायां किञ्चिन्न्यून इवाभाति। एतदेवाभिप्रेत्य ग्रन्थकृतोदितम्--

'द्वयोरपि एतयोरुदाहरणयोः प्राधान्येन प्रत्येकमेकतरस्य साहित्यविरहो व्याख्यातः। परमार्थतः पुनरुभयोरप्येकतरस्य साहित्यविरहोऽन्यतरस्यापि पर्यवसति। शब्दोऽपि वाक्योपयोगिवाच्यासम्भवे वाच्यान्तरवाचकः सन् वाक्यस्य व्याधिभूतः प्रतिभाति।' इति।

साहित्यस्य तृतीयः प्रकारः

साहित्यशब्देन कविरचनायाः सामग्रिकं साहित्यमपि कुन्तकस्याभिमतमासीत्। तथाहि सर्वेषामेव काव्योपादानानां मार्गवृत्तिगुणालंकारादीनां परस्परस्पर्धितया विद्यमानत्वं तावत् साहित्यमित्येतदपि कुन्तकेन न विस्मृतम्। अयमेव तस्य साहित्यतत्त्वस्य तृतीयप्रकारत्वेनास्माभिः परिगण्यते।

'साहित्यसमन्वितौ तादृशौ शब्दार्थौ पुनः बन्धे व्यवस्थितौ स्याताामि'ति कुन्तकस्य काव्यलक्षणस्य द्वितीयं दलम्। बन्धो नाम श्लोकादेर्विशिष्टसन्निवेशः। तेन बहूनां शब्दार्थानां सन्निवेशविशेषः काव्यपदवाच्यतामेति। ननु कीदृशो बन्ध इति चेदुच्यते-वक्रकविव्यापारशालीति। तेन कविव्यापारः कवेः काव्यकरणम्। स च वक्रः प्रसिद्धप्रस्थानातिरिक्तः। कुन्तकेन वक्रतायाः काव्यजीवितत्त्वमङ्गीकृतम्। वक्रतायोगेनैव शब्दार्थयोर्याथार्थं साहित्यमिति।

काव्यलक्षणेऽस्मिन् तृतीयं दलं तावत् तद्विदाह्लादकारित्वम्। तत्पदेनात्र काव्यमित्यस्य परिग्रहः। तेन यदि तद्विद् इत्यस्य काव्यविद् इत्यर्थः। अर्थात् शब्दार्थसाहित्यं वक्रतासमन्विते वाक्यादिरूपसन्निवेशविशेष विद्यमानं यदि काव्यज्ञानामानन्दमुत्पादयेत्तर्हि तत्काव्यतया गण्यते।

२.१.४. अर्वाचीनानामालंकारिकाणां नये साहित्यस्वरूपम्

जगन्नाथोत्तरवर्तिकाले बहवोऽर्वाचीनालंकारिका राजचूडामणिदीक्षित-भूदेवशुक्ल-रामदेवचिरञ्जीवभट्टाचार्य-विश्वेश्वरपण्डित-नरसिंहकवि-विद्याराम-आशाधरभट्टवेणीदत्तशर्मण्-अच्युतरायशर्मण्-श्रीकृष्णकवि-राधावल्लभत्रिपाठि-रेवाप्रसादद्विवेदि-हर्षदेवमाधवादयश्च प्रादुरभवन् ये साहित्यस्वरूपं नूत्नाङ्गिकेन व्याख्यातवन्तः। ते पूर्वाचार्याणां काव्यस्वरूपं लक्षणञ्च विश्लिष्य खण्डितवन्तः स्वस्वयुक्तिभिः। यथा राजचूडामणिदीक्षितः मम्मटकृतकाव्यलक्षणस्य 'अनलंकृती पुनः क्वापि' इति पदानि परिवर्त्य 'सदलंकृती' इति पदं सन्निवेशितवान्। तत्कृतकाव्यलक्षणं तावत् 'काव्यं [illegible] [illegible]णो शब्दार्थौ सदलंकृतीति'[२१]। तथाहि 'काव्यदर्पणे' व्याख्यातं-

"वस्तुतस्तु अदुष्टमेवोत्तमं काव्यम्, अन्यथा काव्यतदाभासविवेको न स्यात्। प्रविरलविषयता च काव्यत्वव्यवहारस्यैष्टैव, यदाहुर्ध्वनिकृतः अत एव द्वित्रा एव कवयो द्वित्राण्येव काव्यानि"[२२] इति।

साहित्यसुधासिन्धौ विश्वनाथदेवेन काव्यलक्षणे दोषाभावत्व-गुणत्व-अलंकारत्वादिवैशिष्ट्यादिकं समायोजितम्। तेन लक्षितं काव्यलक्षणं--

"जायते परमानन्दो ब्रह्मानन्दसहोदरः।
यस्य श्रवणमात्रेण तद्वाक्यं काव्यमुच्यते॥"[२४] इति।

अपि चोक्तम्--

"कविनिर्वाह्यं काव्यम्। न ह्यर्थः कविना निर्वाह्ये, कामिनीचन्द्रचन्द्रिकादीनां ब्रह्मणैव निर्वाहितत्वात्। अपि तु कविनिर्वाह्या पदगुम्फना। सैव काव्यम्" इति। अदोषाविति पदस्यान्वर्थत्वं प्रतिपादयतोक्तम्--अदोषाविति यथाशक्ति दोषहानम्, परं न तु लक्षणप्रविष्टम्, दुष्टेष्वपि रसोद्बोधात्[२५] इति।

नरसिंहकविना स्वकीये नञ्जराजयशोभूषणे काव्यपरिभाषा व्याकृता-कविसमयानुरोधेन निबद्धौ शब्दार्थौ काव्यम्[२६] इति।

"पर्वतमात्रे सिंहशरभा इत्यादिद्रव्यकल्पनम्, प्रतापशृङ्गारादौ अरुणत्वमित्यादिगुणकल्पनम्, चकारेषु चन्द्रिकापानमित्यादिक्रियाकल्पनम् व्यञ्जनारूपशब्दव्यापारकल्पनञ्चेति कविसमयः"[२७] इति। नरसिंहकविः कश्चन ध्वनिमार्गस्योपासक इति कृत्वा कविसम्प्रदायगततत्त्वातिरिक्तं व्यञ्जनाख्यव्यापारमुरीचकार। परिशेषे तेन काव्यलक्षणं परिष्कृतम्--

यल्लोकोत्तरवर्णनानिपुणस्य कवेः सरसशब्दार्थसङ्घटनात्मकं कर्म तत्काव्यमिति[२८] इति।

किन्तु 'मन्दारमरन्दचम्पू'रित्यलंकारग्रन्थे श्रीकृष्णशर्मणा राजचूडामणिनरसिंहयोः काव्यलक्षणयोः समन्वयः साधितः। तन्नये--

"सालंकारगुणौ काव्यं शब्दार्थौ दोषवर्जितौ।
तथा कवीनां समयानुरोधेन निबन्धितम्"[२९] इति।

"काव्यं तद्गुणवच्चान्यत्काव्याभासमुदीर्यते"[३०] इति। अत्र चमत्कारत्वं नाम रसालंकारयुक्तत्वम्, अनघत्वञ्च दोषरहितत्वमिति। हरिदाससिद्धान्तवागीशेन काव्यकौमुद्यां निर्दोषत्वसगुणत्वादिपदानि परिवर्त्य मनोहारियुक्तौ शब्दार्थौ काव्यमित्युक्तम्--'मनोहारिणौ शब्दार्थौ काव्यमिति'[३१]। मनोहारित्वं खलु रसमाधुर्येणालंकारसौन्दर्येण भाववैचित्र्यादिना च रसिकाह्लादकत्वमिति। अतो रस-गुणालंकार-भाववैचित्र्यादियुक्तं वाक्यं हि काव्यमिति फलितार्थः।

किन्तु रेवाप्रसादद्विवेदी काव्यपरिभाषां दार्शनिकानां दृक्कोणतः पर्यालोचितवान्। काव्यं न हि स्थूलं, परं भावात्मकं ज्ञानात्मकञ्च। काव्यस्वरूपं ह्यर्थः। अतः काव्यस्य ज्ञानरूपत्वे शब्दत्वं नोपपते। तथाहि तेनोक्तं काव्यस्वरूपम्--

"ज्ञानात्मकोऽपि शब्दः स्यादुपाधि काव्यवर्ष्मणि।
पात्रं रसे पानकाख्ये दर्पणे वा तनौ यथा॥
आत्मवानर्थसंघातविज्ञानं काव्यमिष्यते"।[३२]

इति। काव्यालंकारकारिकायां तेन विज्ञानस्य काव्यत्वमुक्तम्--

"आनन्दकोषस्योल्लासे लोकोत्तरविभावना।
अलंकृतार्थसंवित्तिः कविता सर्वमङ्गला"[३३]॥ इति।

सत्यानुभूतिर्हि काव्यात्मेति आशयो ब्रह्मानन्दशर्मणः। तथाह्युक्तम्--

"सत्यमर्थगतं काव्ये, अर्थे शब्दस्य संस्थितिः।
शब्दार्थयोर्हि सद्भावादस्य साहित्यरूपता"[३४] इति।

अर्थात् शब्दार्थयोर्निहितस्य सत्यस्य रमणीयत्वप्रतिपादकत्वं हि काव्यत्मम्--

"शब्दार्थवर्ति सत्यस्य सुन्दरं प्रतिपादनम्।
काव्यस्य लक्षणं ज्ञेयं, सत्यस्यात्र विशेषता"॥[३५]

अनेन काव्यनिष्ठरमणीयतया समं सत्यतायाः समन्वयः साधितः। सत्यं प्रत्यस्माकं सहजाकर्षणवशादेव तथा च तेन सह सूक्ष्मताधानेन जायमानाकर्षणाधिक्यात्सत्यं शिवं सुन्दरञ्च सम्पद्यन्ते। तथाहि मन्ये पाश्चात्त्यविद्वद्भिः कीटस्-पादैरुक्तम् 'Beauty is truth, truth beauty' इति। ब्रह्मानन्दस्य काव्यलक्षणमिदं पाश्चात्त्यविज्ञेनारस्तूमहाभागेन प्रभावभावितमिति मामकी मतिः। यतः काव्ये वास्तविकतायास्तथा सत्यतायाश्चोपरि समधिकं प्राधान्यं प्रादाद् ब्रह्मानन्दः। प्रसङ्गेऽस्मिन् बलदेव-उपाध्यायस्य गीः संस्मरणीया-

The poet should remember to put the actual scenes as for as possible before his eyes......he will divise what is appropriate, and be least likely to overlook in Congruities." र्गति।

जगन्नाथोत्तरवर्तियुगेऽपि नव्यन्यायपरिभाषया काव्यशास्त्रचर्चा प्रचलतितराम्। मधुसूदनशास्त्रिणा जगन्नाथस्य काव्यलक्षणं नव्यन्यायभाषया परिष्कृतम्--

''रमणीयार्थविषयकप्रतीतिनिष्ठजन्यतानिरूपितानुपूर्वीविशेषावच्छिन्न शब्दधर्मिकज्ञाननिष्ठजनकतावच्छेदकीभूतविषयताश्रयवर्णत्वव्यापकसमुदायत्वनिष्ठन्यूनवृत्तित्वानिरूपकं यत् रमणीयार्थविषयकप्रतीतिजनकतावछेदकीभूतवर्णत्वव्यापक-समुदायत्व-निरूपित-पर्याप्तिसम्बन्धावच्छिन्नाश्रयत्वं काव्यत्वम्''[३६] इति।

मम्मटाचार्याणां काव्यलक्षणानि परिशील्य 'लोकानुकीर्तनं काव्यमिति' काव्यलक्षणं पुरस्करोति पुनः पुनः व्याख्याति च राधावल्लभत्रिपाठी अभिनवकाव्यालंकारसूत्रे।

ध्वनिवादी अभिराजराजेन्द्रमिश्रः अभिराजयशोभूषणस्य तृतीये आत्मतत्त्वोन्मेषे रसालंकाररीतिवक्रोक्त्यौचित्यानां काव्यात्मत्वं निराकृत्य ध्वनेरात्मत्वं स्वीकृतवान्। रेवाप्रसादद्विवेदी 'अलं ब्रह्मेति' ग्रन्थे अलंकारः ब्रह्मपर्यायभूक्त इत्युक्तवान्। तथा च, राधावल्लभः 'अभिनवकाव्यालंकारसूत्रे' अलंकारः काव्यजीवनमिति प्रोच्यालंकारस्य काव्यात्मत्वमुररीकृतवान्। किन्तु तन्मते यत्किमपि सौन्दर्याधायकं वस्तु अलंकारपर्यायभुक्तं स्यात्। अभिनवगुप्तेनापि सौन्दर्यस्यैव काव्यात्मत्वं स्वीकृतम्--'सौन्दर्यप्रतीतिस्तर्हि काव्यात्मा स्यात्'।

परिशेषे एतदेव वक्तव्यं यत् साम्प्रतिकालंकारिकेषु केचन सन्ति नूतनकाव्यतत्त्वान्वेषिणः, केचित्पुरातनधारां नवालोकैः परिपोषिणः, चेतरे पिष्टपेषणेन पूर्वोक्तकाव्यस्वरूपं विलक्षणशब्दराजिभिः प्रतिपादयन्ति, अपरे केचन समेषां राद्धान्तान् विश्लिष्य संयोज्य च स्वकमतं संस्थापयन्ति।

३.० उपसंहृतिः

काव्यशिल्पस्य नैकानि लक्षणानि पर्यालोच्याभिधातुं साम्प्रतं यत् प्रत्येकं राद्धान्तेषु नास्ति ऐक्यमत्यम्। पाश्चात्त्ये यथानुकरणप्रकाशाभिज्ञता-बुद्धिस्वज्ञावादाश्चेति बहवो मतवादा विद्योतन्तेतमां तथैवास्माकं प्राच्येऽपि रसालंकारध्वनिरीतिरम्यार्थवादाश्च काव्यात्मनिरूपणे प्रयत्नशीला बुभूवुः। परं सूक्ष्मेक्षिकया पर्यालोच्यते चेत्तर्हि दृश्यते यत्--

प्रथमतः

नैके काव्यशिल्पसर्जनं कल्पनानुभवबुद्धीनां समवायेन सृष्टयौगिकमानसिकव्यापारत्वेनामनन्ति।

द्वितीयतः

सर्जनव्यापारो न हि विशुद्धमननक्रियाविशेषः। शुद्धमननक्रियायामस्माकं जिज्ञासावृत्तिरेव कार्यं सम्पादयति। मननस्यायं पर्यायः--'Conceptual progress'—'intellectual or rational level' इत्युच्यते। वैशिष्ट्यं तावदस्य शुद्धज्ञानात्मन एकाग्रतायामस्येतरवृत्तिर्भवति स्तिमिता किञ्च ज्ञेयवस्तुनः स्वरूपसंग्रहायैव मनस्तु एकीभूतं भवति। भोगवृत्तेः क्रियाभावाद् विशुद्धज्ञानात्मकक्रिया भोगवासनानिरपेक्षा रागद्वेषादिरहिता

मङ्गलामङ्गलप्रवृत्तिविमुक्ता चेति। साहित्यं प्राधान्येन विशुद्धज्ञानरूपायाः क्रियायास्तावत् फलम्। क्रियेयमनुभवासम्पृक्ता कल्पनाभावविशिष्टा वेति। परं काव्यशिल्पमनुभवसम्पृक्तं रसान्वितकल्पनोपेतं चेति।

तृतीयतः

काव्यसृष्टावुपरोक्तव्यापारेभ्य एवानुसिद्धान्ततया यानि वैशिष्ट्यान्युपलभ्यन्ते तानि यथा-

(१) कान्टमहाभागस्य साहित्यलक्षणं वैयक्तिकमूलकम्-

(२) क्रोचेपादस्यानुभवमूलकतावादः कल्पनासर्वस्वतावादो वा (reality apprehended in the vital impules in its feeling) पाश्चात्त्यसाहित्यमीमांसायां सुप्रतिष्ठितः।

(३) वस्तुभावयोर्व्यक्तिरूपकल्पनकार्यत्वमस्त्येव।

कल्पनायाः कार्यं प्रतिरूपसर्जनमर्थाद् रूपसृष्टावेव कल्पना सर्वदा क्रियाशीला। वासनामूलककल्पनायामेवात्मसम्पृक्तिः जायते। अतो यत्रैव व्यक्तेः रूपकल्पनं तत्रैवानुभूतेः क्रिया, तत्रैव च विद्यमानात्मकसम्पृक्तिश्चेति।

चतुर्थतः

प्राच्यालंकारशास्त्रे साहित्यशब्देन क्रमेणावबुध्यन्ते-

१) शब्दार्थयोर्व्याकरणगतसाहित्यम्

२) शब्दार्थयोरलंकारनिष्ठसाहित्यम्

३) शब्देन समं शब्दस्य तथा चार्थेण सहार्थस्य साहित्यम्

४) रीतिगुणालंकारवक्रतारसादीनां मिथः साहित्यम्

एतेन पानकरसवद् यदा समेषामुपादानानामतिरिक्तः कश्चनापूर्वः नूत्नास्वादविशिष्ट आविर्भवति, तदा साहित्यं परमसार्थक्यमुपालभते। आदर्शभूतं तच्छब्दार्थसाहित्यं द्वैताद्वैतरूपमर्धनारीश्वरमूर्तिरूपम्।

एरिस्टटलमहाभागः अनुकरणतत्त्वेन काव्यस्य वैशिष्ट्यद्वितयं निर्दिशयति। कल्पनात्मकव्यापारस्यानुभवमूलकत्वादनुकरणमप्यात्मसम्पृक्तमनुभवमूलकमिति। यद्यपि अनुकरणमिति शब्देन सह यान्त्रिकानुकरणस्य भावानुसङ्गः सम्बन्धबद्धस्तथापि आत्मगतभावकल्पनायां यान्त्रिकानुकरणाभावादपि एतन्नास्वीकर्तुं शक्यं यत् एरिस्टटलपादस्य काव्यसंज्ञा जगतः शाश्वतसत्यस्य सन्निकटवर्तिनीत्यत्र न विद्यते संशयलवः। परमेतत् सत्यं यत् काव्यस्य साहित्यस्य वा स्वरूपं यद्वा स्यान्नाम, लोकोत्तरानन्दः काव्यस्य मूलं तावत् प्रयोजनमित्यत्र विदुषां विप्रतिपत्तिर्नास्तीति। तदुक्तं कुन्तकेन 'वक्रोक्तिजीविते'--

"चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥"[४२] इति

वस्तुतः, रसास्वादनादेव काव्यस्य मौलिभूतो 'विगलितवेद्यान्तरानन्दः' समुद्भवति, क्वचिद्वा रम्यार्थबोधस्य दीप्त्या एव। प्रबन्धेऽस्मिन् रसशब्दो रम्यार्थबोधकः भावशब्देन च रम्यार्थस्य परिग्रहः। वस्तुतः,

कविस्तस्यापूर्ववस्तुनिर्माणक्षमप्रतिभया सहृदयसामाजिकानां हृदि अलौकिकानन्दनिष्यन्दव्यापारयोः शब्दार्थयोः यत् साहित्यमुत्पादयति, तदेव साहित्यम्। अर्थात् 'आनन्दमयवाक्यमेव काव्यम्।' प्राच्यपाश्चात्त्ययोः विविधानि साहित्यस्वरूपानि पर्यालोच्य वक्तुमलं यत्--कल्पनानुभूतिजन्यविचाराणां मधुराभिव्यक्तिकलैव कवितेति साधिष्ठा व्याख्या-

"Poetry is the art of expressing in melodious words, thoughts which are the creations of imagination and feelings," (Chamber's Dictionary) इति सर्वश्चतुरस्त्रम्।

तथ्यसूत्रम्

१. ऐतरेयब्राह्मणम् (६/५/१)।

२. पाणिनीयम् (५/१/१२४)।

३. काव्यालंकारः

४. रघुवंशम् (१/१)

५. रामायणम् (१/२/१५)

६. रामायणम् (१/२/१६)

७. रामायणम् (१/२/१७)

८. ध्वन्यालोकः (१.५)

९. "For body and soul, word and idea go strangely together here as everywhere."—(The Hero as poet) (See-काव्यालोकः- पृ. २४४)

१०. "Poetry does not consist of separable qualities, if it exists at all, it exists as an indivisible whole." (The Idea of great poetry.) (पृ. १७).

११. Just as, There the lines and their meaning are to you one thing, not two, so in poetry the meaning and the sounds are one : there is, if I may put it so, a, resonant meaning or a meaning resonance. —'Oxford Leotures on Poetry.' Poetry for Poetrys sake.

१२. अग्निपुराणम्-३३६/६-७

१३. तथाहि अभिनवगुप्तपादेनाभिनवभारत्यामुक्तम्--

'नन्वेवं तावता नियतानुकारो भा भूत्। अनुकारेण तु किमपराद्धम्। न किञ्चिदसम्भावादृते। अनुकार इति हि सदृशकरणम्।'तत् कस्य। न तावद्रामादेः। तस्याननुकार्यत्वात्। एतेन प्रमदादिविभावानामनुकरणं पराकृतम्। ....भावे वाननुकारत्वात्। न चान्यद्वस्त्वस्ति, यच्छोकेन सदृशं स्यात्। अनुभावांस्तु करोति। किन्तु सजातीयानेव, न तु तत्सदृशान्। साधारणरूपस्य कः केन सादृश्यार्थः। त्रैलोक्यवर्तिनः सदृशत्वन्तु न विशेषात्मना यौगपद्येनोत्पद्यते। कदाचित् क्रमेण नियत एवानुकृतः स्यात्। सामान्यात्मकत्वे कोऽनुकारार्थः। तस्मादनियतामुकारो नाट्यमित्यपि न भ्रमितव्यम्।" इति।

१४. 'सरस्वतीकण्ठाभरणम्'-१/२

१५. 'प्रतापरुद्रीयम्'-पृ. ४२ द्रष्टव्यम्:, (See- 'अलंकारशास्त्रेतिहासः, पृ.-१९०)

१६. 'एकावली'-१/१३

१७. 'अलंकारचन्द्रिका', (See-'अलंकारशास्त्रेतिहासः', जगदीशचन्द्रमिश्रकृतः, पृष्ठा-१९१)

१८. 'काव्यादर्शः'

१९. 'ध्वन्यालोकः' (१/२)

२०. 'वक्रोक्तिजीवितम्' (१/१)

२१. 'काव्यदर्पणम्' (पृ. १०), See- Modern Sanskrit Poetics (Hindi version) : पृ.-१०५

२२. तत्रैव (पृ. १२)

२३. तत्रैव (पृ. १३)

२४. साहित्यसुधासिन्धुः (पृ. ७), See- Modern Sanskrit Poetics (Hindi version) : पृ.-१०६

२५. तत्रैव (पृ. २२)

२६. 'नञ्जराजयशोभूषणम्' (पृ. १४), See- Modern Sanskrit Poetics (Hindi version) : पृ.-१०७

२७. तत्रैव

२८. तत्रैव

२९. 'मन्दारमरन्दचम्पूः' (पृ. १८६), See- 'Modern Sanskrit Poetics' (Hindi version) : पृ.-१०८

३०. 'रसदीर्घिका' (पृ. ५५), See- 'Modern Sanskrit Poetics' (Hindi version) : पृ.-१०९

३१. 'काव्यकौमुदी' (पृ. ३), See- 'Modern Sanskrit Poetics' (Hindi version) : पृ.-११३

३२. 'काव्यालंकारकारिका' (पृ. ६२, ६४), See- 'Modern Sanskrit Poetics' (Hindi version) : पृ.-११४

३३. तत्रैव (पृ. ५)

३४. 'काव्यसत्यालोकः' (पृ. १५), See- 'Modern Sanskrit Poetics' (Hindi version) : पृ.-११५

३५. तत्रैव (पृ. ७२)

३६. 'रसगङ्गाधरालोचनम्' (पृ. ७), See- 'Modern Sanskrit Poetics' (Hindi version) : पृ.-११७

३७. 'पाणिनीयम्' (४/१/१२४)

३८. 'काव्यालंकारः' (१/१६)

३९. 'साहित्येर पथे' (रवीन्द्ररचनावली, दशम)

४०. 'साहित्य' (रवीन्द्ररचनावली, दशम, पृष्टाङ्कः ३६३)

४१. तत्रैव (पृष्ठाङ्कः-३५१)

४२. 'व्यक्तिविवेकः' (२/११८)

४३. 'वक्रोक्तिजीवितम्' (१/५)

परिशीलिता ग्रन्थानुक्रमणी

(Select Bibliography)

१. आङ्गलभाषायाम्

- Rasagangādhara; (edt.) Chinmayi Chatterjee, The Asiatic Society, Calcutta, 1992 (1st)
- East West Poetics at work—(edt.), C.D. Narasimhas, Sahitya Akademi, Calcutta, 1994 (1st)
- Modern Sanskrit Poetics—Ananda Kumar Srivastav Ananda Kumar, Eastern Book Linkers, Delhi, 2012.

२. संस्कृतभाषायाम्

- अलंकारशास्त्रेतिहासः–(सम्पादकः) डॉं जगदीशचन्द्रमिश्रः, चौखाम्बा सुरभारती प्रकाशन, वाराणसी, २००९।
- औचित्यविचारचर्चा–(सम्पादकौ) जयकृष्णदासः हरिदासगुप्तश्च, चौखाम्बा-संस्कृत-सिरिज्, वाराणसी, १९९३।
- काव्यप्रकाशः–(सम्पादकः) कपिलदेवगिरिः, चौखाम्बा-संस्कृत-संस्थान, वाराणसी, १९८९।
- काव्यमीमांसा–(सम्पादकः) शेषराजशर्मा, चौखाम्बा-संस्कृत-संस्थान, वाराणसी।
- काव्यालंकारः–(सम्पादकः) नागनाथशास्त्री, वारणसी-संस्कृत-ग्रन्थमाला, वाराणसी, १९८०।
- काव्यालंकारसूत्राणि–(सम्पादकः) पं. श्रीहरगोविन्दशास्त्री, चौखाम्बा सुरभारती प्रकाशन, वाराणसी, २००५।
- नाट्यशास्त्रम् (प्रथमो भागः)–(सम्पादकः) पारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९२।
- वक्रोक्तिजीवितम् (प्रथमोन्मेषः)–(व्याख्याकारः) परमेश्वरदीनपाण्डेयः, चौखाम्बा सुरभारती प्रकाशन, वाराणसी, २०१०।
- साहित्यदर्पणः (१-३) (लक्ष्मीटीकोपेतः)–आचार्यकृष्णमोहनशास्त्री, चौखाम्वा-संस्कृत-संस्थान, वाराणसी, १९९६।

३. वङ्गभाषायाम्

- अरिस्टटलेर पोयेटिक्स ओ साहित्यतत्त्व–साधनकुमारवन्द्योपाध्याय, दे'ज पावलिशिं, कोलकाता, २०१० (नवम संस्करण)
- अरिस्टटलः काव्यतत्त्व–शिशिरकुमार दास, प्यापिरास, कोलकाता, २००९ (चतुर्थ संस्करण)
- काव्यालोक–ड. सुधीरकुमार दाशगुप्त, दे'ज पावलिशिं, कोलकाता, १९९८
- काव्यविचार–सुरेन्द्रनाथ दारागुप्त, कलिकाता, १९३९ (प्रथम संस्करण)
- काव्यादर्श–चिन्मयी चट्टोपाध्याय, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, कोलकाता, १९९५।

४. पत्रिकायाम्

- संस्कृतसाहित्यपरिषत्पत्रिका (Vol.—LXXXII, Nos. 1-2) —(सम्पादकः) ड. करुणासिन्धुदासः, कलकाता, १९९९-२०००।

রবীন্দ্রনাথের উর্বশী

দেবাশিস ভট্টাচার্য

ঋগ্বেদ-এর দশম মণ্ডলের পঁচানব্বই সূক্তে পুরূরবা-উর্বশী সংবাদে উর্বশীর স্বরূপ ব্যক্ত হয়েছে। পুরূরবা নামক তেজস্বী রাজাকে উর্বশী বিবাহ করেন। চার শরৎ রাত্রি তাঁরা একত্রে বাস করেন। এইজন্য বলা হয়েছে 'রাত্রীঃ শরদশ্চতস্রঃ'। তাঁদের পুত্রের নাম আয়ু। কোনো কারণে এরপর পুরূরবা ও উর্বশীর মধ্যে বিচ্ছেদ ঘটে। অনেক অন্বেষণের পর তাঁদের আবার সাক্ষাৎ হয় এবং তখন যে উক্তি-প্রত্যুক্তি হয়েছিল—তাই সংবাদ নামে ১৮টি ঋকে বর্ণিত। উর্বশীর এই কাহিনি পরবর্তীকালে শতপথ ব্রাহ্মণে (৫/১-২) পল্লবিত হয়েছে।

উর্বশী জ্যোতির্ময়ী। ঋগ্বেদে তিনি যজ্ঞাগ্নিও। উর্বশী অপ্সরা বিশেষ। 'অপ্সরা' শব্দটির অর্থ-জল থেকে উত্থিত হয় যে। অপ্ অর্থাৎ জল। উর্বশী অপ্সরাদিগের মধ্যে প্রধানা। উর্বশী নামের ধাতুগত অর্থ হল বিস্তীর্ণদেশব্যাপিনী। ভানুজি দীক্ষিত ব্যাখ্যায় বলেছেন—'উরূন্ মহতো'শ্নুতে ব্যাপ্নোতীতি বশীকরোতীতি যাবৎ'। ঋগ্বেদে এই একজন অপ্সরারই নাম পাওয়া যায়। তিনি হলেন উর্বশী।

উর্বশী স্বর্গের নর্তকী। দেবলোকের অমৃতপানসভার সখী। উর্বশীর সৌন্দর্যে দেবতা ও ঋষিদের ধ্যানভঙ্গ হয়, তাঁরা মোহিত হন। উর্বশীর কাহিনি নানা সময়ে নানা কবির রচনায় নতুন নতুন তাৎপর্যে অভিনব রূপ লাভ করেছে। কেউ কেউ মনে করেন উর্বশী নারায়ণের উরু ভেদ করে বহির্গত হন। আবার কথিত আছে সমুদ্রমন্থনের সময় সমুদ্র হতে উত্থিতা অপ্সরাদের মধ্যে উর্বশী অন্যতম। সাতজন মনু উর্বশীকে সৃষ্টি করেন—এমন ধারণাও প্রচলিত। কালিদাসের বিক্রমোর্বশীয় নাটকে পুরূরবা-উর্বশীর কাহিনিটি বিস্তারিত হয়েছে। উর্বশী পৌরববংশের মাতা হলেও অর্জুনের সঙ্গ কামনা করেন। কিন্তু অর্জুন মাতা-সন্তান সম্পর্কের কথা স্মরণ করে উর্বশীকে প্রত্যাখ্যান করলে উর্বশী অভিশাপ দেন—অর্জুন নপুংসক হবেন। বিরাট দেশে অবস্থান কালে অর্জুন বৃহন্নলা হয়েছিলেন—যা অভিশাপ হলেও তার পক্ষে বরস্বরূপ হয়েছিল।

পদ্মপুরাণে উর্বশীর কথা আছে। বিষ্ণু ধর্মপুত্র হয়ে গন্ধমাদনে তপস্যা করছিলেন। ইন্দ্র সে তপস্যায় ভীত হয়ে বসন্ত কামদেব এবং অপ্সরাদের ধ্যান ভঙ্গের জন্য পাঠান। তারা তপস্যা ভঙ্গে ব্যর্থ হলে কামদেব অপ্সরাদের উরু থেকে উর্বশীকে সৃষ্টি করলেন। উর্বশী বিষ্ণুর তপস্যা ভঙ্গ করেন এবং ইন্দ্র উর্বশীকে গ্রহণ করলেন। কিন্তু মিত্র ও বরুণের অভিশাপে উর্বশী মনুষ্যভোগ্যারূপে পুরূরবার স্ত্রী হন।

এভাবে দেখা যায় উর্বশী প্রসঙ্গে বারবার বিবাহ এবং সন্তান সৃষ্টির প্রসঙ্গ প্রত্যাবৃত্ত হয়েছে। উর্বশী নামটির সঙ্গে উর্বরতার ভাবনাটি মিশে গেছে। রূপ-সৌন্দর্য এবং সন্তান উৎপাদন একই সত্তায় আধারিত। উর্বশী সৌন্দর্যময়ী, জ্যোতির্ময়ী। তিনি বীরভোগ্যা এবং স্রষ্টা। তাঁর সৌন্দর্যের কোনো আদি-অন্ত নেই। অমর সৌন্দর্য যেন স্থির হয়ে আছে উর্বশীর মধ্যে। তিনি এই জন্যই অনন্তযৌবনা। রবীন্দ্রনাথ 'চিত্রা' কাব্যের 'উর্বশী' নামক

কবিতাটি রচনা করেছেন ২৩ অগ্রহায়ণ ১৩০২ বঙ্গাব্দে। এই কবিতা রচনার প্রেক্ষিত হিসেবে তিনি লিখেছেন:

> কাল থেকে জপথেই আছি। আশা ছিল আজ শিলাইদহে পৌঁছব, কিন্তু তার কোন লক্ষণ দেখছিনে.... স্বেচ্ছাকৃত চিন্তা এবং কাজ ছাড়া কোন কর্তব্যই নেই।... সমস্ত দিন আমার খসড়া কবিতার খাতাটা খুলে পেন্সিল হাতে যখন তখন দুচার লাইন করে লিখছি এবং তারপরে অলসভাবে কোন একটা দিকে চেয়ে আছি। আজ ভোর চারটের সময় ঘুম ভেঙে গেল—উঠে কতকগুলো গরম কাপড় জড়িয়ে বাতি জ্বেলে উর্বশী নামক একটা কবিতা শেষ করে ফেল্লুম....।[১]

রবীন্দ্রনাথের উর্বশী কবিতায় উর্বশীর সৌন্দর্যের কথাই তাৎপর্যপূর্ণ হয়ে উঠেছে। সর্বসম্পর্কবিরহিত অ্যাবাস্ট্রাকট সৌন্দর্যের কথা বলা হয়েছে এতে। অর্থাৎ যাকে দেখে মুগ্ধ হওয়া যায় অথচ যাকে কোনো সাংসারিক বন্ধনে বেঁধে তার নৈর্ব্যক্তিকতাকে ক্ষুণ্ণ করা যায় না। সৌন্দর্যের এই প্রতিমূর্তি-ই হল উর্বশী। উর্বশী প্রসঙ্গে রবীন্দ্রনাথ স্পষ্টভাষায় ব্যাখ্যা করেছেন একটি চিঠিতে, তিনি লিখেছেন :

> পৌরাণিক উর্বশীর নাম অবলম্বন করিয়া আমি যাহাকে কমপ্লিমেন্ট দিয়াছি তাহাকে অনেক দিন হইতে অনেক কবি কমপ্লিমেন্ট দিয়া আসিতেছেন। গেটে যাহাকে বলেন—The Eternal Women : Ewige weibliche আমি তাহাকে উর্বশী মূর্তির মধ্যে প্রতিষ্ঠিত করিয়া পুষ্পাঞ্জলি দিয়াছি। সে আমাদের সহিত কোনোরূপ সম্বন্ধে আবদ্ধ নহে ; বধূ নহে, মাতা নহে, কন্যা নহে—সে রমণী ; সে আমাদের হৃদয় হরণ করে, সে দিব্যরূপে আমাদের স্বর্গে বিরাজ করে, সে আমাদের ভুলায়, সে আমাদের পৌত্রদিগকেও চঞ্চল করিয়া তুলিবে;[২]

এই নিরঙ্কুশ beautiful-ই উর্বশীর মধ্যে মূর্ত। উর্বশী কবিতার প্রথম স্তবকটি এরকম :

নহ মাতা, নহ কন্যা, নহ বধূ, সুন্দরী রূপসী,
হে নন্দনবাসিনী উর্বশী।
গোষ্ঠে যবে সন্ধ্যা নামে শ্রান্ত দেহে স্বর্ণাঞ্চল টানি,
তুমি কোনো গৃহপ্রান্তে নাহি জ্বালো সন্ধ্যাদীপখানি,
দ্বিধায় জড়িত পদে কম্প্রবক্ষে নম্র নেত্রপাতে
স্মিতহাস্যে নাহি চলো সলজ্জিত বাসরশয্যাতে
স্তব্ধ অর্ধরাতে
উষার উদয়সম অনবগুণ্ঠিতা
তুমি অকুণ্ঠিতা।

এই 'নন্দনবাসিনী' উর্বশী প্রাকৃতিক সৌন্দর্যের প্রতিমূর্তি। উষা ও উর্বশী—এই দুই সত্তা আসলে সূর্যের দুই বর্ণালী দিয়ে গঠিত। অপ্সরা যে জল থেকে উদ্ভূত হয় তা সূর্য ও প্রকৃতির ঋতুগত অবস্থানের অনুসন্ধানে উদ্‌ঘটিত হয়।

অপ্সরার উদ্ভব বিষয়ে সমালোচকের বিশ্লেষণ এরকম :

> কোনো কোনো বৎসর বর্ষ আরম্ভ হইলে, বিশেষতঃ বর্ষার শেষাশেষি ও শরৎকালে পশ্চিম আকাশ অস্তগামী সূর্যের বামে দক্ষিণে উর্ধ্বে লাল রঙ্গের খেল দেখিতে পাওয়া যায়। কেহ যেন রাশি রাশি সিন্দুর ঢালিয়া দিয়াছে। শুধু সিন্দুর নয়, লোহিত বর্ণের অগণ্য ভেদে পশ্চিম-গগন দীপ্ত হইয়া উঠে। কোথাও যেন পাটলী পলাশ অশোক, কোথাও জবা ও ডালিম, কোথাও বান্ধুলি শিমূল ফুল। সে সব

> রঙ্গের নাম নাই। মনোহর অপূর্ব কান্তি, দৃষ্টি ফিরাইতে পারা যায় না। অল্পে অল্পে রঙ্গের মেলা বসে, দশ-বার মিনিটের মধ্যে অদৃশ্য হয়। ইহা লাল মেঘ নয়, মেঘ থাকিলে তাহা রক্তাভ দেখায়, উর্ধ্ব গগনও দীপ্ত হয়। আমি এই দৃশ্যকে অপ্সরা-কল্পনার মূল মনে করি। ইংরেজিতে ইহার নাম—Sunset colours।[৩]

ঋতুগতভাবে পৃথিবী এবং সূর্যের অবস্থান এবং বর্ণালীর বিভা থেকে অপ্সরা উদ্ভবের এই অনুমান অসাধারণ। সূর্যোদয়ের সময় থেকেই উর্বশীর আবির্ভাব। সাধারণত বর্ষাকালে এবং শরৎকালে পশ্চিমাকাশে উর্বশী পরিলক্ষিত হয়। জলে সূর্যের বর্ণালী পড়লে সে যেন নৃত্যপর হয়ে ওঠে। পশ্চিমের সন্ধ্যারাগের উর্বশী দিব্যবসনধারিণী, স্বল্পস্থায়ী। গন্ধর্বদের সঙ্গে অপসরাদের প্রণয় প্রণয়িনীর সম্পর্ক। দিব্যাঙ্গনা, আকাশচারিণী এই গন্ধর্ব-প্রণয়িনীরা কামরূপিণী এবং ইচ্ছামত রূপ ধারণ করেন। গান্ধর্বরা গান গায় এবং অপ্‌সাগণ নৃত্য করে। গন্ধর্বদের নগর রয়েছে—যার নাম গন্ধর্ব-নগর। বরাহমিহির তাঁর বৃহৎসংহিতার ষষ্ঠ অধ্যায়ে আনুমানিক খ্রিস্টিয় ষষ্ঠ শতাব্দে লিখেছেন :

> ঈষৎ পাণ্ডুবর্ণ গন্ধর্বনগর 'উত্থিত' হইলে অশনিপাত ও বাত হইয়া থাকে। গন্ধর্বনগরযুক্ত সন্ধ্যা বর্ষাকালে অবগ্রহ (বর্ষারোধ) করে। গন্ধর্বনগর দীপ্ত হইলে রাজার মৃত্যু, বাম ভাগে হইলে অরিভয় এবং দক্ষিণ ভাগে স্থিত হইলে জয় হইয়া থাকে।[৪]

অর্থাৎ গন্ধর্ব এবং অপ্সরা—উভয়ের সৃষ্টির মূল প্রাকৃতিক প্রক্রিয়ার ভূমিকা স্বীকার্য। পুরাণে গন্ধর্বরাজার নাম ছিল চিত্ররথ গন্ধর্ব-নগর ইন্দ্রধনুতুল্য এবং তা অন্তরীক্ষে দেখা যায়। রাজা চিত্ররথের রথ চিত্র অর্থাৎ আশ্চর্যজনক ছিল। এই জন্য যোগেশচন্দ্র রায় বিদ্যানিধি সিদ্ধান্ত করেছেন—'যাহাকে অপ্সরা বলিতেছি, তাহাই গন্ধর্বনগর।'[৫]

এই দিক থেকে রবীন্দ্রনাথের 'উর্বশী' কবিতার উর্বশীর সৌন্দর্য বিশ্লেষণ করা যেতে পারে। এ কবিতায় উর্বশীর প্রসঙ্গে যে সমস্ত প্রাকৃতিক সৌন্দর্য ও সময়ের দোতনা সৃষ্টি করা হয়েছে তা নিম্নরূপ :

১. গোষ্ঠে যবে সন্ধ্যা নামে শ্রান্ত দেহে স্বর্ণাঞ্চল টানি,
২. তুমি কোনো গৃহপ্রান্তে নাহি জ্বালো সন্ধ্যাদীপখানি,
৩. স্তব্ধ অর্ধরাতে/উষার উদয়সম অনবগুণ্ঠিতা।
৪. বৃন্তহীন পুষ্পসম আপনাতে আপনি বিকশি/কবে তুমি ফুটিলে উর্বশী।
৫. আদিম বসন্তপ্রাতে উঠেছিলে মন্থিত সাগরে,
৬. কুন্দশুভ্র নগ্নকান্তি সুরেন্দ্রবন্দিতা,
৭. মুকুলিকা বালিকা-বয়সী
৮. আঁধার পাথারতলে কার ঘরে বাসিয়া একেলা
৯. মণিদীপদীপ্ত কক্ষে সমুদ্রের কল্লোলসংগীতে
১০. পূর্ণপ্রস্ফুটিতা
১১. তোমার মদির গন্ধ অন্ধবায়ু বহে চারিভিতে,
১২. নূপুর গুঞ্জরি যাও আকুল-অঞ্চলা/বিদ্যুৎ-চঞ্চলা।
১৩. তব স্তনহার হতে নভস্তলে খসি পড়ে তারা,
১৪. দিগন্তে মেখলা তব টুটে আচম্বিতে

১৫. স্বর্গের উদয়াচলে মূর্তিমতী তুমি হে উষসী,
১৬. জগতের অশ্রুধারে ধৌত তব তনুর তনিমা,
১৭. ত্রিলোকের হৃদিরক্তে আঁকা তব চরণ-শোণিমা।
১৮. অরবিন্দ-মাঝখানে পাদপদ্ম রেখেছ তোমার
১৯. অখিল মানসস্বর্গে অনন্তরঙ্গিণী,
২০. অতল অকূল হতে সিক্তকেশে উঠিবে আবার?
২১. প্রথম সে তনুখানি দেখা দিবে প্রথম প্রভাতে,
২২. সর্বাঙ্গ কাঁদিবে তব নিখিলের নয়ন-আঘাতে,
২৩. ফিরিবে না ফিরিবে না—অস্ত গেছে সে গৌরবশশী,
২৪. আস্তাচলবাসিনী উর্বশী।

এ কবিতায় উর্বশীর স্বরূপ চিত্রিত করতে গিয়ে তার মূর্তি নানা তাৎপর্যপূর্ণ ব্যঞ্জনায় অঙ্কিত হয়েছে। কখনো উষা, কখনো সন্ধ্যা, কখনো রাত্রির নিস্তব্ধতায় উর্বশী মূর্ত, কখনো উর্বশী সমুদ্রমন্থনে উত্থিত। কখনো সে সমুদ্রের গভীর কোনো মণিরত্নখচিত পালঙ্কে অবস্থান করছে। আবার কখনো তার একহাতে বিষ, অন্য হাতে অমৃত দেখা যায়। সে কখনো বিশ্বময় প্রস্ফুটিত অরবিন্দে পাদপদ্ম রেখে বিকশিত, কখনো নিষ্ঠুর, বধিরা। তার অনন্তরূপ তবু সব ক্ষেত্রেই সম্পৃক্ত রয়েছে। কবির অবচেতনে উষা, অহল্যা, সীতা, লক্ষ্মী, ছায়া প্রভৃতির রূপ ও স্বরূপ বিভিন্নভাবে এই উর্বশী কল্পনায় সম্পৃক্ত। কখনো বা রূপকথার রাজকুমারীর মতোই সে বহুদূরে অবস্থান করছে। শেষ পর্যন্ত এক বিরহ বেদনাই এ কবিতার মধ্যে ব্যাপ্তি চেয়েছে। পুরূরবার মতোই তন্ন তন্ন অন্বেষণে দিব্য ও অপূর্বশোভনা উর্বশীর জন্য প্রতীক্ষা এ কবিতায় সঞ্চারিত হয়েছে।

অ্যাবস্ট্রাকট সৌন্দর্য এবং জগতের সাংসারিক বন্ধনে আবদ্ধ রূপের মধ্যে প্রথমটিই এ কবিতায় রূপায়িত। beautiful ও good-এর মধ্যে প্রথমটি-ই এখানে নিরূপিত। রবীন্দ্রনাথ বলেছিলেন :

> মনে রাখতে হবে উর্ব্বশীকে। সে ইন্দ্রের ইন্দ্রানী নয়, বৈকুণ্ঠের লক্ষ্মী নয় ; সে স্বর্গের নর্ত্তকী, দেবলোকের অমৃতপানসভার সখী।
>
> দেবতার ভোগ নারীর মাংস নিয়ে নয়, নারীর সৌন্দর্য নিয়ে। হোক-না সে দেহের সৌন্দর্য, কিন্তু সেই তো সৌন্দর্যের পরিপূর্ণতা।[৬]

মোহিতলাল মজুমদার বলেছিলেন এ কবিতায় স্ববিরোধ রয়েছে এবং সুইনবার্নের 'এ্যাটলান্টা ইন ক্লেডন' থেকে এ্যাফ্রোডাইট অংশটির অনুবাদ ('প্রায় অনুবাদ') আসলে এই কবিতাটি—সে কথার সত্যতা যাই হোক,—সৌন্দর্যের আইডিয়াল ধারণা যে ভাবে এ কবিতায় মূর্ত তা একান্তই প্রাকৃতিক এবং শাশ্বত।

উৎস নির্দেশ :

১. রবীন্দ্রনাথ ঠাকুর—ছিন্নপত্র, রবীন্দ্ররচনাবলী, প.ব. সরকার, একাদশ খণ্ড, পৃ. ৪৫৫
২. রবীন্দ্রনাথ ঠাকুর—রবীন্দ্র রচনাবলী, প. ব. সরকার, ষোড়শ খণ্ড, পৃ. ১৩১
৩. যোগেশচন্দ্র রায় বিদ্যানিধি—বেদের দেবতা ও কৃষ্টিকাল পৃ. ২৪
৪. ঐ, পৃষ্ঠা - ২৬
৫. ঐ
৬. রবীন্দ্রনাথ ঠাকুর—রবীন্দ্র রচনাবর্লী, প.ব. সরকার, ষোড়শ খণ্ড, পৃষ্ঠা-১৩২।

MODEL OF UNDERSTANDING CONSCIOUSNESS IN BUDDHISM

Amit Bhattacharjee

• *Points ; Background of consciousness—Development of consciousness—Nature of consciousness—Classification of Vijñānas—Eightfold consciousness at the three levels—Conclusion.*

Background of consciousness

Each Philosophical school has different view and model of understanding consciousness. Through consciousness we can detect all the temporal phenomena that we see. Now one may ask if momentariness is the characteristic of the world how one can able to prove that he is conscious or he has consciousness. If all objects are changing in the subsequent moment then how consciously one can say that he has had consciousness of an object. Questions are raised in the Buddhist Philosophical schools too. If 'All is void, void' ; 'All is momentary, momentary' how Lord *Tathagata* was absolutely able to recognize those principles ? Unless he had consciousness how he could recognize 'All is void' or 'All is momentary'. Therefore, consciousness never can be ignored. And all of us know Lord approved and agreed to the questionary. As a result of this *vijñāna* or *chetana* was accepted and established.

The purpose of the *Yogācāra* school, founded about the fourth century A.D. by two Brahmanas named *Asanga* and *Vasubandhu,* was to establish the doctrine of mind-consciousness only. The very first *Karika* of *Vijñaptimatratasiddhi* states that everything in the world is in consciousness only 'विज्ञप्तिमात्रमेवैतत्' i.e. it is all mere consciousness only. In the *Vijñānavada* system of philosophy four terms viz. *Citta, manas, vijñāna* and *vijnapti* are used as synonyms 'चित्तं मनो विज्ञानं विज्ञप्तिश्चेति पर्यायाः' (Vim. Vr. 1.1). The worlds are all mere representations of consciousness. Actually if we take *nāmarūpa* then we must say it will have to depend upon *vijñāna.* So in this way role of consciousness has vividly been explained in Buddhism.

I have seen similar thought was expressed in *Srimad-Bhagavad-Gita* in saying I am the intelligence of the creatures 'भूतानामस्मि चेतना' (10.22). It implies a modification of the intellect, which is expressive of consciousness. One moves his hand, and one feels and one knows that he is moving his hand. He calls it consciousness. He is conscious that he is moving his hand. Actually consciousness is the name of the surface only of the mental ocean, but within its depths are stored up all our experiences, both pleasant and painful. The mind and the body, in fact all the various phenomena of nature, are in a condition of incessant change. But in spite of changeness, *Āryadeva* probably in the third century A. D. categorically said :

मनःपूर्वङ्गमा धर्मा मनःश्रेष्ठाः मनोजवाः।

मनसा हि प्रसन्नेन भाषते वा करोति वा ॥

The conceived phenomena (dharma) are born in the mind and also superior function of mind is born in the mind ; Without the mind is clear, how one could speak out or act on. Needless to say here mind implies *citta* or consciousness as said by *Vasubandhu.*

Development of consciousness :

In the *Milinda Panha* the term consciousness was compared with a watchman at the middle of the cross-roads seeing all that come from any direction. In the *Atthasalini, Buddhaghosa* says that consciousness signifies that which thinks its object. If men are to define its characteristics they must say that it knows *(vijñāna),* moves in advance *(pubbangama),* connects *(sandhana)* and stands on *nāmarūpa (nāmarūpapadatthanam).* When the consciousness attains a door, at a place the objects of sense are made out or distinguished and it moves first as the predecessor. When a visual object is looked by the eye it is admitted only by the consciousness, and when the *dhammas* are made the objects of *mano,* it is recognized only by the consciousness. *Buddhaghosa* believes that when states of consciousness rise one after another, they leave no gap between the previous state and the later and consciousness therefore seems as connected. A question may arise if both the consciousness are same or different with each other? *Buddhaghosa* himself answered having compared consciousness with the sun though it is the same yet in a sense it is different too *(Atthasalini,* p. 112).

We have seen that *Yogācāra* deals with ideas, consciousness, mind in its works in a very extensive way. One may put the question why was the object rejected ? The answer also is given vividly. The object is rejected because it has no independent existence. Object must necessarily be revealed by consciousness. Therefore all existence has its center and being in mind. It does not mean that the objects are not there. Nowhere it is said that these objects do not exist from the conventional *(samvrtika)* point of view. What is rejected is that the false super-imposition made by us on the objects of the world.

Four conditions are known in developing consciousness. They are (i)

Alambana (the data) (ii) *Samanantara* (the suggestion) (iii) *Sahakari* (the medium) and (iv) *Adhipati* (the dominant organ). In all the cases the term : 'प्रत्यय': shall be added. 'ते चत्वारः प्रत्ययाः प्रसिद्धा आलम्वनसमनन्तसहकार्यधिपतिरूना:' (Sarva. Da. Sa.). As for example, the form of blue arises from the condition of blue data in the understanding in which there is a manifestation of blue, which manifestation is styled a cognition. The revival of forms arises from suggestion as a condition 'समनन्तरप्रत्ययात्प्राचीन-ज्ञानाद्बोधरूपता' (Sarva.Da.Sa.). The restriction to the apprehension of that object arises from the medium (light). Therefore light is also a condition 'सहकारिप्रत्ययादालोकात् स्पष्टता' (Sarva.Da.Sa.). And lastly the eye is able to become dominant in recognizing one particular object 'चक्षुषोधिपतिप्रत्ययाद्विषयग्रहणप्रतिनियमः' (Sarva.Da.Sa.). In this way we must recognize four causes which constitute the understanding of consciousness and its modifications.

Nature of consciousness :

Consciousness is creative : 'चेतना चित्ताभिसंस्कारो मनसश्चेष्टा' (T.V.B. 3), The object has no separate existence of its own. Since it can not be known to exist apart from the consciousness of it, the two are not distinct at all : 'ज्ञानज्ञेययोः परस्परम् एक एव उपालम्भो न पृथगिति य एव हि ज्ञानोपलम्भः स एव ज्ञेयस्य य एव ज्ञेयस्य स एव ज्ञानस्येति यावत्' (T.S.P. I. 568 & P.V. II. P. 390-1).

By the creativity of consciousness must not be understood the illusory notion that consciousness creates real physical objects. Itfc creativity consists i; being diversified into so many modes which, though having an apparent externality, are really but modes of consciousness 'न च विषयप्रतिभासात्मना उत्पत्तिं मुक्त्वा विज्ञानस्यान्याक्रियास्ति' (M.V.S.B.T. P. 21). One idea generates another idea and not an external object. Objects are hypostatised ideas. The content of consciousness is not imported from outside, but is inherent in the states of consciousness themselves 'स्वबीजपरिंपाकाद् रूपाद्याभासं विज्ञानं प्रवर्तते न तु रूपादिकोऽर्थोऽस्ति' (M.V.S.B.T. P. 20).

Kātyāyanīputra said in his J.P.S. that consciousness is nothing but the activity of mind only 'सर्वा चेतना संचेतना अधिचेतना चैतन्यं चेतनान्वयः चित्तक्रिया मनःकर्म। इति चेतना' (अष्टमो निःश्वासः, 1). *Kātyāyanīputra* also differentiates consciousness from imagination. Readers may find there in question-answer form 'चेतनाकल्पनयोः को भेदः? प्रतिवचनम्। चेतना कर्म। कल्पना तु मतिः' (J.P.S.I).

The process of consciousness is called as *citta-vithi* or *vithi-citta* or a canalised consciousness. *Citta-vithi* is to be understood as dynamic flow of being. In Buddhist psychology Rhys Davids said : '*Bhāvāṅga* is a factor or condition of becoming, becoming standing for existence of life' (P. 233). In deep sleep the consciousness, *citta* is stated to have gone into that is become one with *Bhāvāṅga* or flow of organic life and does not go or does not recognize or discern what is pleasant or unpleasant (Do. P. 171).

In the *Laṅkavatara-sūtra* we also find the sole reality of consciousness. The main portion of chapter 2nd-7th is entirely philosophic in content where *Shakyamuni* and *Mahamati Bodhisattva* became engaged in question-answer pattern dialogue to clarify the problems of consciousness in details.

The self-nature *Svabhava* of the mind and the consciousness is pure, non-wavering, calm, like an ocean with no wave. The consciousness wavers and that occurs in the case of an ordinary person on account of thought-construction *vikalpa.* The scope of discriminating one from other is no other than thought-construction. It is generated by the latent-impressions for habit inclinations in the ordinary mind as effectuated by the action what the individual performed in the past. That is called *Vasana* in the Indian diction. Therefore, *Vasana* and the consciousness in functioning *Pravṛtti-Vijñāna* become inter-related and it tends to generate thought construction in respect to an average person. (L.S. II. 139 ; III 74-78).

L.S. stated categorically three points : (a) The consciousness of the ordinary person functioning in the extrovert mind *pravṛtti-vijñāna* (b) The consciousness of the elevated persons whose mind remains concentrated in the introvert mind *Kliṣṭa-mano-vijñāna* and (c) The wholesome consciousness in its retrovert state *alaya-vijñāna* (II. 102-104).

Consciousness would undergo progressive or regressive change under the functioning status of the mind and the mental facilities *citta-caitisika* dharma. Those arise at the three levels. Firstly, in the case of ordinary persons, the mind becomes extrovert being liable to discriminate under thought-constructed problems, uncertainties, doubts, discriminations etc. Secondly, by the sustained efforts for concentrating the mind through the observance of moral precepts *shila* and the restrained way of life *Brahamacarya* the functioning mind and its faculties would enter in a state of concentration in the case of the introvert mind i.e. *Kliṣṭa-mano-vijñāna.* Lastly, the mind becomes calm like an ocean with no wave.

Classification of Vijñānas :

Yogācaravadins accept three different types of *vijñānas* namely (a) *Alayavijñāna* (b) *Kliṣṭa-mano-vijñāna* and (c) *Pravṛtti vijñāna.* Among the three *vijñānas* the most important is the *alayavijñāna* (store-consciousness) because it contains all the seeds *(bija)* and impressions *(vasanas)* in itself. All the actions done by any individual get maturity in the *alayavijñāna.* Vasubandhu said : 'तत्रालयाख्यं विज्ञानं सर्वबीजकम्' (T.V. 2). We have seen in the

Bhasya : 'तत्र. सर्वसांक्लेशिक-धर्मबीजस्थानत्वाद् आलयः। आलयः स्थानमिति पर्यायौ। अथवा आलीयन्ते उपनिवध्यन्ते अस्मिन् सर्वधर्माः कार्यभावेन.... सर्वधर्मबीजाश्रयत्वात् सर्ववीजकम्' (T.V.B. 2).

Second stage in the development of understanding consciousness is *kliṣṭa-mano-vijñāna*. *Manas* is so defined because the process of intellection *(manana)* is always going on in it : 'मनो नाम विज्ञानं मननात्मकम्' (T.V. 5). In the *bhasya* it is defined as : 'एवं मननात्मकत्वान्मन इत्युच्यते नैरुक्तेन विधिना' (T.V.B. 5). Now one may ask why it is called *klioa* ? The answer is given that because it is surcharged with a particular class 'of 'Mentals' *(caittas)*, i.e. the four 'निवृताव्याकृतक्लेशाः'. As long as *manas* functions, it must be accompanied by these four. It is said in the T.V.B.

अविद्यया चात्मदृष्ट्या चाभिमानेन तृष्णया।

एभिश्चतुर्भिः संक्लिष्टं मननाल्लक्षर्ण मनः॥

विपर्यासनिमित्तं तु मनः क्लिष्टं सदैव यत्।

कुशलाव्याकृते चित्ते सदाहंकारकारणम्॥

But *manovijñāna* and *kliṣṭa-mano-vijñāna* are not the same. Prof. A. K. Chatterjee observed 'This *manovijñāna* is not to be confused, with *kliṣṭamanas* ; the latter is a transcendental function, while the former is merely the knowledge of empirical ideas'.

The last stage in the development of understanding consciousness is *Pravṛttivijñāna*. In brief it is the determinate awareness of the object 'तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्' (Sarva.Da.Sa.). Only this can be empirically known. The former two form its submerged base as it were. In *Pravṛttivijñāna* one is sure about the determinate contents of the object through the consciousness. The ignorant beings possessed with latent *vasana* see the manifestation of the world of objects in various forms and understand them as real. The manifestation of the external world in varied forms occurs in empirical mind of a being on account of the evolving consciousness *Pravṛttivijñāna*. That manifests out of the accumulating tendency of the *citta*.

Eightfold consciousness at the three levels :

The *Lahkavatara suira* enumerates eight characteristics of the consciousness in the extrovert and the introvert mind and above. Such as : Five sense consciousness arising in contact of the phenomenal objects in the empirical mind (1-5).

(i) *Cakṣu-vijñāna* in contact of object elating to eyes *cakṣu-indriya-ayatana*

(ii) *Ghrana-vijñāna* in contact of object elating to noses *ghrana-indriya-ayatana*

(iii) *sparso-vijñāna* in contact of object elating to body *kaya-indriya-ayatana*

(iv) *srotra-vijñāna* in contact of object elating to ears *karna-indriya-ayatana* and

(v) *swada-vijñāna* in contact of object elating to tongue *jihva-indriya-ayatana.*

The empirical mind prompting to mind-consciousness relating the mind of the individual *mano manovijñānam ca* (6-7).

Lastly *alayavijñāna* the wholesome consciousness to which both functional mind consciousness and talent consciousness exist (8). Generally, it is translated as store-consciousness by D. T. Suzuki.

A diagram may be given to highlight eight kinds of consciousness in the *Laṅkavatarasūtra* :

Eight kinds of consciousness in
The *Lankavatara sutra*
The mind *(citta)*

function state *pravitta-citta.*	potents state *suddha-citta.*
1-5. Five-fold sense-consciousness arising on contact with five sense organs.	8. the unwavering state of the pure mind with wholesome consciousness *alayavijñāna* when the tranquil psyche in the self-nature of the mind. The pure mind is by nature calm, tranquil and crystal like transparent.
6. the empirical mind *manas* that conduces through sensations and neuro-muscular functions in mind-matter relations.	
7. the mental consciousness *mano-vijñāna* arising out of the functions of the empirical	

mind *manas* and that
co-relates the extrovert and the
introvert mental process by
meditations *manovijñāna*.

Conclusion :

We apprehend that power of consciousness, is so profound that it can not be ignored consciously. I am now speaking of English. It is not my mother tongue, in fact no words of my mother tongue are now present in my consciousness; but let me try to bring them up, and they rush in. It shows that consciousness is only the surface of the mental ocean, and within its depths are stored up all our experiences. So, let me allow to say in conclusion :

या देवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

Abbreviation

J. P. S.	Jñānaprasthana-śāstra.
L. S.	Laṅkavatarasūtra.
M. V. S.B.	Madhyantavibhaga-sūtra-Bhasya-Tīka.
P. V.	Pramāṇavārtika.
Sarva.Da.Sa.	Sarvadarsana-saṁgraha.
T. S. P.	Tattavasaṅgrahapañjīka.
T. V.	Trimsika-vijñāpti.
T. V. B.	Trimsika-vijñāpti-Bhāṣya.
Vim. Vr.	Viṁsatikavṛtti.

Bibliography

1. A History of Indian Logic : Satis Chandra Vidyabhusana, Motilal Banarsidass Pvt. Ltd. 1920.
2. A History of Indian Philosophy : S. N. Dasgupta, Vol. 1, Motilal Banarsidass Pvt. Ltd. 1922.
3. Bauddha Darsan (with commentary in Sanskrit by V.S. Abhyankar) : Ed. Amit Bhattacharjee, Sanskrit Pustak Bhandar, Kolkata-700 006, 1907 (in Bengali).
4. Being as Consciousness *(Yogācāra Philosophy of Buddhism)* : Fernando Tola & Carmen Dragonetti, Motilal Banarsidass Pvt. Ltd. 2004.
5. *Jnanaprasthana-sastra (katyayaniputra)* : Santi Bhiksu Sastri, Visvabharati, Santiniketan, 1955.
6. Indian Buddhism : A. K. Warder, Motilal Banarsidass Pvt. Ltd. 1970.
7. Some psychological aspects of early Buddhist Philosophy Based on

Abhidharmakosa of Vasubandhu : Aruna Haldar, The Asiatic Society, 1, Park Street, Kolkata, 1981.

8. Sarva-Darsana-samgraha *(Sayana-Madhava)* : E. B. Cowell & A. E. Gough, BKP, Delhi, 2008.
9. The Buddhist Philosophy of Universal Flux : Satkari Mookherjee, Motilal Banarsidass Pvt. Ltd. 1975.
10. The Complete works of Swami Vivekananda : Mayavati Memorial Edition, Advaita Ashrama, Kolkata-700 014, 1992.
11. The Lankavatara-Sutra : D. T. Suzuki, Munshiram Manoharlal Pvt. Ltd. 2007.
12. The Yogācāra idealism : Ashok Kumar Chatterjee, Motilal Banarsidass Pvt. Ltd. 1987.
13. Vijnaptimatratasiddhi *(Vasubandhu)* : T. R. Sharma, Eastern Book Linkers, Delhi, 1993.
14. Vijnaptimatratasiddhi *(Vasubandhu)* : Ed. Dr. Sukomal Chowdhury, Sanskrit College, Kolkata, 1975 (in Bengali).

'ANUMĀNA' ACCORDING TO SĀṂKHYA PHILOSOPHY

Gourangao Aich

Indian philosophy is traditionally divided into two classes viz. Āstika and Nāstika. Among the Āstika schools, the oldest and one of the most important one is Sāṃkhya. The school said to be founded by Maharṣi Kapila. But though Kapila is said to be the founder of this school, no text written by him has reached us. According to tradition 'Sāṃkhya Kārikā' composed by Īśvarakṛṣṇa has been considered by generations of scholars as the authentic text of Sāṃkhya. In later times books like 'Jayamaṅgala Tīka', 'Gaurapadabhāṣya', 'Rājavārtika' written by anonymous scholar (or by Bhojarāja according to some), 'Yuktidīpikā'. 'Sāṃkhyatattvakaumūdī' by Vācaspati Miśra, etc. have been of great use in the study and interpretation of Sāṃkhyakārikā and in the comprehension of Sāṃkhya philosophy as a whole. Our present discourse is based mainly on 'Yuktidīpikā', though others have also been consulted.

Bhartṛhari of the Śabdādvaitavādī school, Cārvāka of the Jarādvaitabādī school, Citsukhāchāryaya of the Advaitavedānta school and almost all other Indian philosophers have accepted 'Anumāna' as one of the proofs (Pṛamāṇa) next only to 'Pratyakṣa'. They include Āstika philosophers of schools like 'Nyāya' as well as Nāstika philosophers of Bauddha, Jaina and the like.

The word 'Anumāna' is derived from the root 'Mā' in the causative voice prefixed by 'Anu' with the 'Lyut' suffix. The prefix 'Anu' means 'after' and the root 'Mā' means 'to know'. Therefore, 'Anumāna' denotes 'later knowledge' or knowledge gathered afterwards. Now the question may be raised : why 'later knowledge' ? In reply it may be said that 'Anumāna' is ascertained only later on through the effect of Pratyakṣa. That is why it is called 'later knowledge' or 'after knowledge' (i.e. after Pratyakṣa). Nyāya philosopher Gautama too in his 'Nyāyasūtra' begins with "Atha Tatpurvakaṃ..."[1] Etc. while deciding the features of Anumāna just after deciding the features of 'Pratyakṣa'.

Materialist philosophers of Naiyāyika, Vaiśeṣika, Mīmāṃsaka etc. have attached most importance to popular usage. Anumāna is based on this popular usage. Sāṃkhya too could not refute popular usage altogether. So, it may be said that Sāṃkhya could not ignore Anumāna. In the fourth Kārikā of Sāṃkhya Kārikā, Īśvarakṛṣṇa has accepted Anumāna as one of the three forms of proof (Pramāṇa) second only to direct proof (Pratyakṣa)-Dṛstamanumānamāptavacanaṃca Sarvapramāṇasiddhatvat. Trividam Pramāṇamistam prameyasiddhiḥ Pramāṇāddhiḥ.[2]

It may be said that nothing is done without reasons. So what is the use of three forms of proof ? In Sāṃkhya scriptural directives have been accepted as one of the ways of an eternal end of sorrow. Īśvarakṛṣṇa while ascertaining the nature of these directives has essentially pointed to the science of entire Sāṃkhya philosophy. He says—

> *Dṛstabadānuśravikaḥ sa hyaviśuddhikṣyātiśayayuktaḥ.*
> *Tadviparītaḥ śreyan byaktābyaktajña-vijñāṇat.*[3]

The expression 'Byaktābyaktajña - bijñānat' has three words - 'Byakta', 'Abyakta' and 'Jña' (or Bijñāna). Byakta means that while it is expressed or action ; Abyakta means cause or 'Prakṛti' and Jña means consciousness or Purusha. These elements, viz. Byakta, Abyakta and Jña are elements of real knowledge or Prameya, which can be substantiated only by proof (Pramāṇa). So it has been said in the 'Kārikā' "Prameyasiddhih Pramāṇāddhih"[4] By Siddhi the writer of Kārikā here means "Siddhiradhigamo'babodha ityarthaḥ"[5] That is to say, Siddhi means to understand or to comprehend, It may be doubted in this connection that as knowledge is always one and same there can be no reason of accepting more than one forms of proof. The writer of Dipika explains to answer, "Tadekameva buddherekatvabhyupagamāt ; upādhivaśāttu bhinnamāśriyate Pratyakṣamnuman-mityādi"[6] Though proof (Pramāṇa) is one it manifests itself in various forms of Pratyakṣha, Anumāna, Āptabākya (axioms) etc.

Āchārya Īśvarakṛṣṇa deals with the divisions and characteristics of Anumāna Pramāṇa in the Fifth Kārikā after dealing with Pratyakṣa or visual proof.

> "Prativiṣayādhyavasāyo dṛṣṭaṃ
> trividamānumānamākhyātam.
> Tallingalingipūrvakamāptaśrutirāpta-
> vacanaṃ tu"[7]

Īśvarakṛṣṇa has mentioned "Tallingalingi-pūrvakam"[8] as the common characteristics of Amumāna. It means AnumānaPramāṇa is the knowledge we gather about 'Linga' and 'Lingi' i.e. from 'byāpyabyāpakabhaba and 'pakṣadharmatā'. Vachaspati Miśra in his Sāṃkhyatattvakaumūdi says while explaining the characteristics of Anumāna-pramāṇa "Vyāpyavyāpakabhāba-pakṣadharmātajñana-pūrvakamānumānamityanumānasamānyam lakṣitam."[9] He has started discussing about Anumānapramāṇa after dealing with visible or Pratyakṣa and refuting the theory of single proof of the Cārvākas. But the writer of Yuktidīpikā has explained Anumāna more intelligently saying -

"Kasyapunartindriyasannikarṣe Pratyakṣatvam prāpnoti? Ucyate Anumānasya. Kasmāt? Taddhi Liṅgadarsanādasnnikṛṣte viṣaye bhabati".[10]

The writer of Dīpikā has not attached much importance to the characteristics of Liṅga or Lingi and the like for he has accepted either the traditional views or those advocated by his predecessors.

While explaining the common characteristics of Anumāna, Vācaspati Miśra in his Tattvakaumadī defines Liṅga as "Lingyate Jñāyate apratyakṣaḥ arthaḥ yena".[11] He means to say that Liṅga is by which something that has no proximity with our senses is known. The indicator of things unrelated to senses is Liṅga. That is why it is also known as Hetu. But Liṅga does not indicate the thing directly or by its very nature. It becomes the indicator by extension of meaning (Vyāpti) and so it is called Vyāpya. The thing which is known through Liṅga is called Linga. So Lingī means Vyāpaka. Vācaspati Miśra shows the relation between Vyāpya and Vyāpaka as "Saṅkitasamāropitopādhi-niṛakaraṅena ca vastusvabhābapratibaddham Vyāpyam, yena prativāddham tad vyapakam."[12]

"Yatra yatra dhūmaḥ tatra tatra bahniriti sahacāryaniyamo Vyāptiḥ" is the common characteristics of Vyāpti. Some philosophers has also described Vyāpti as "Anaupādhikasambandhaḥ vyāptih"[13] because the relation between Vyāpya and Vyapāka is a natural relation. Every natural relation is an "anaupādhika" relation. Anumāna becomes possible because of this knowledge of Vyāpti. Vācaspati Miśra describes the whole process of Anumāna as follows : "liṅgaliṅgigrahaṇena viṣayavācina viṣayinam pratyamupalakṣayati. Dhūmādirvyāpyo bahnya-dirvyāpakaḥ iti yaḥ pratyastatpurvakaṃ. Liṅgigrahanam ca'vartaniyam tena ca Liṅgamasya astīti pakṣadharmatajñānampi darśitam bhavati. Tat vyāpyavyāpakabhābapakṣadharmatājñāna-purvakamnumānmityanumānasamānayam lakṣitam."[14]

Now let us come to the types of Anumāna. Like Nyāya, Saṃkhya too admits three types of Anumāna. The writer of Juktidīpikā says - "Anumānam triprakaramācāryairākhyātam. Pūrvabat, Śeṣabat sāmānyatodṛṣṭam ca."[15] like the Naiyāyikas and the writer of Sāṃkhyatattvakaumūdī too is in favour of accepting three types of Anumāna, viz. Pūrvabat (as before), Śeṣabat (as after) and Sāmānyatodṛsta (seen as common/without exception) but with different examples.

As the characteristics of Anumāna the writer of Dīpikā says "Tatra pūrvamitikāranamucyate . Yasya hi yat kāraṇam sa loke tatpūrvakaṃ ityucyate."[16]. In this definition, by the word 'Pūrba' he means cause. Here the inflexion 'Matup' has been used in the sense of 'Asti' (to be/to exist). He produced its example " Yathā tantupūrvakaḥ pato, devadattapūrvako yajñadatta iti."[17] Etc.

The second type of Anumāna is 'Śeṣabat', In Dīpikā it has been described as "Śeṣabat yaḍa kāryanirvttim dṛstva kāraṇasadbhābam pratipādyate"[18]. In the expression 'Śeṣabat' the word 'Śeṣa' means effect. In the kind of Anumāna where the effect is placed after or at the end is known as 'śeṣabat' (śeśo'syastiti śeṣabat[19]. Here also the inflexion 'Mātup' has been used in the sense of 'Asti'. Its example given "Kumārakam dṛstva dvayasamāpattim"[20], from the viewing of a boy the co-habitation of its parents can be assumed.

The third type of Anumāna is Sāmānyatodṛṣta. Its character has been explained in Yuktidīpikā as "sāmānyatodṛṣtam nāma yatraikada'rthayorāvyabhicāramupalabhya deśantare kālāntare ca tajjatiyayoravyabhicāram pratipādyate."[21] After comprehending the exact relation between two things their constant correlation (abyābhicāra) can be established in different lands and different times, it is called Samānyatodṛṣta Anumāna. Its example is "yathā kvaciddhumānantarenagnyantrasyasti pratipādyate."[22] If we conclude the presence of five from seeing smoke at a different place after studying the existence of some and fire at a certain place, it may be called Samānyatodṛṣta Anumāna.

From the standpoint of application Anumāna can again be divided into two types -Bīta and Abīta. The writer of Dipika says - "tasya prayogamātrabhedatdvaividhyam. Bītaḥ abītaḥ iti. Tayorlakṣa-namāmānanti - yadā hetuḥ svarupena sādhyasiddhau prayujyate. Sa bīto'rthantraksepaditarah pariśeṣitaḥ."[23]

In his Tattvakaumdī Vācaspati Miśra included Pūrbabat and Sāmānyatodṛṣta in the case of Bīta Anumāna and Śeṣabat in the class of Abīta Anumāna. Here he explains the characteristics of Bīta and Abīta Anumāna as follows : "anvayamukhena pravarta-mānam viṣayakam bītam, vyātirekamukhena pravartamānam niṣedhakamābitam."[24]

But after these classifications of Anumāna there still remains more to be said about the types of Anumāna. In Nyāyavaiśeṣika philosophy Anumāna has been classified as Svarthānumāna and Parāthānumāna. The writer of Yuktidīpikā has accepted this classification indirectly. But Yuktidīpikā shows great difference of opinion in this field. In Tarkasaṃgraha, a philosophical treatise of the Nyāyavaiśeṣika school, Annaṃbhatta explains Svārthānumāna and Parārthanumāna as "tatra svārtham svānumihetuh"[25] and "yattu svayam dhūmādagnimnumāya paraṃ pratibodhayitum pancavāyabavakyam prajujyate tat parārthā-numānam."[26] respectively. But Yuktidīpikā differs as regards 'Panchābayabavākya'. In Vātsyayana's interpretation of Nyāyasūtra 'Panchābayaba' means 'jijñāsa', 'saṃśaya', 'śakyaprāpti', 'prayojana' and 'saṃśayābyudāsa'.[27] But Yuktidīpikā upholds Daśābayaba in place of Panchābayaba. Though Vātsyayana mentions Daśābayaba, only five of the ten Abayababas is named and information about veterans believing in Daśāvayaba is not available. The writer of Yuktidīpikā first divides the Avayaba into

'Vyākyaṇga' and 'Pratipadaṇga' and accepts five from the former and five from the latter - ten Abayabas in all. The five under Vyākyanga are 'jijñāsa', 'saṃśaya', 'śakyaprāpti', 'prayojana' and 'saṃśayabyudāsa'.[28] And the other five under Pratipādanga are 'pratijñā', 'hetu', 'dṛṣṭanta', 'upasaṃhāra', and 'nigamāna'[29].

In Nyāya or Vaiśeṣika philosophy these Avayabas have been taken as helpful to the knowledge of Parārthānumāna. The writer of Yuktidīpikā mentions the importance of these Abayaba(s) for the sake of knowledge of Bīta Anumāna.

Foot Note :

1. Nyāyasūtra 5, Nyāyadarśana, page 150.
2. Sāṃkhyakārikā 4, page 23.
3. Sāṃkhyakārikā 2, page 12
4. Sāṃkhyakārikā 4, page 23
5. Yuktidīpikā, page 75
6. Do.
7. Sāṃkhyakārikā 5, page 75.
8. Do.
9. Sāṃkhyatattvakaumudī, page 53
10. Yuktidīpikā, page 95.
11. Sāṃkhyatattvakaumudī, page 5
12. Sāṃkhyatattvakaumudī, page 52.
13. Yuktidīpikā, page 101
14. Sāṃkhyatattvakaumudī, page 52, 53.
15. Yuktidīpikā, page 97.
16. Do.
17. Do.
18. Yuktidīpikā, page 98.
19. Do.
20. Do.
21. Yuktidīpikā, page 100.
22. Do.
23. Yuktidīpikā, page 105.
24. Sāṃkhyatattvakaumudī, page 54.
25. Tarkasaṃgraha, page 92.
26. Tarkasaṃgraha, page 95.
27. Nyāyadarśana, page 291
28. Yuktidīpikā, page 106.
29. Do.

Reference Books:

1. Annaṃbhatta : Tarkasaṃgraha. Adhyapana- Shri Narayana Chandra Goswami. Kolkata, Sanskrit Pustak Bhander, 1390 (2nd Edn.)
2. Annaṃbhatta : Tarkasaṃgraha. Edited by Dr. Anamika Roychaudhury. Kolkata, Sanskrit Pustak Bhander, 1405 (Bangabda).
3. Iśvarkṛṣṇa : Sāṃkhyakārikā, Edited by Shri Purnachandra Vedantachanchu Sāṃkhyabhusana Sahityacharya. Kolkata, Paschimbanga Rajya Pustak Parshad, 2nd Rpt. 3b 2007, 1st edn. 1901.
4. Tarkavāgiśa Phanibhūṣaṇa : Nyāya Parichay, Kolkata, Paschimbanga Rajya Pustak Parshad, 2nd Rpt. March, 1986.
5. Nyāydarśana (Vātsāyana Bhāṣya) : Translation, Explanation And Edited by Pt. Sriyukta Phani-bhushana Tarkavāgisha. Kolkata, Paschimbanga Rajya Pustak Parshad, July, 1981.
6. Vācaspatimiśra : Sāṃkhyatattvakaumudī. Edited by Shri Narayana Chandra Goswami. Kolkata, Sanskrit Pustak Bhander, 1406 (Bangabda).
7. Bhattacharya Vidhubhushana : Sāṃkhyadarsaner Viavarana . Kolkata, Paschimbanga Rajya Pustak Parshad, 2nd rpt. August 2008/B, 1st Edn. August 1984/B.
8. Yuktidīpikā : Translated & Edited by Shri Yadu-pati Tripathi Shastri. Kolkata, Sanskrit Pustak Bhander, 1411 (Bangabda).

पञ्चामहायज्ञैर्मोक्षोपायनम्--वैज्ञानिकदृष्ट्यालोचनमेकम्

सुरजित् व्यानार्ज्जी

योजनार्थकस्य यज्धातोर्निष्पन्नस्य जज्ञशब्दस्यार्थन्तु आत्मना परमात्मनो मेलनमिति (communions between self with the supreme soul)। तर्हि एतेन एतत्प्रमीयते यन्मोक्षोसाधनोपायं हि यज्ञकर्म। वस्तुगत्या यज्ञकर्म हि संकीर्णस्वार्थपरित्यागद्वारेण आत्मनः सर्वेषाञ्च कल्याणार्थं स्वतस्फूर्तनिवेदनद्वारेण च आत्मोपलब्धेः मोक्षसहायकं वा। खल्विदं प्रचोदयति धर्माचरणाय यज्ञकर्म।

"यज्ञो वै श्रेष्ठतमं कर्म" (शतपथब्राह्मणम् १.७.३.५)। नित्यनैमित्तिककाम्यभेदेनेदं यज्ञकर्म तु त्रिधा विभक्तम्।

गार्हस्थ्याश्रम एव इतराणां ब्रह्मचर्याद्याश्रमाणां पोषकः। यथा प्राणाख्यवायोराश्रयेण जीविताः भवन्ति सर्वे प्राणिनः तद्वद्गृहमाश्रित्य हि सर्वे आश्रमाः वर्तन्ते इति मनुमतम्।

"यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थामाश्रित्य वर्तन्ते सर्व आश्रमाः॥" (३/७७)

अध्यापनाध्यनमाध्यमेन ज्ञानविस्तरेण अन्नादिभोजनद्वारेण च इतराणामाश्रमत्रयाणां जैवविकाकाङ्क्षापरिपूरणायालम् एव ज्येष्ठाश्रमोऽयं गार्हस्थ्याश्रमः। अस्मिन् गार्हस्थ्याश्रमे एव उद्वहानादनन्तरं वैवाहिकेऽग्नौ यथाविधि गृह्यकर्म, यत् खलु नित्यकर्मतयाख्यातम्, एव आचरणीयं येन याजको भवति ऋद्धः मोक्षमार्गानुसारी च। यानि खलु मोक्षफलप्रसिविनि गार्हपत्यर्दस्त्यग्नौ सम्पादयितव्यानि नित्यकर्म्माणि (protocol) एवोपदिष्टानि शास्त्रेषु तेषु अन्यतममिदं महायज्ञपञ्चकम्। जन्मन एव पञ्चकमस्माकम् आणृण्यम् (five fold debts) परिलक्ष्यते प्रकृतिपुरुषादिभ्यः ततः तेभ्यः सहसम्पर्केणात्मनिवेदनार्थमेव पञ्चमहायज्ञं (five fold sacrifice) नित्यमाचरणीयमस्माभिः।

ततः सांसारिकाः वयं प्रत्यहं पाकाश्रयेण शौचाश्रयेण वा तनोः परिपोषणं कुर्म्मः। ततः मयज्ञपञ्चकानामाचरणद्वारेणैव भूतहिंसाजनितपापाभाजः तनो आपतति ब्रह्मयोग्यता। शतपथब्राह्मणे एव पञ्चमहायज्ञानां नामानि तथा स्वरूपाणि एव स्पष्टितानि। कानि च-तानि नामानि इति जिज्ञासायाः निरसने तत्रैव आम्नातम्-

"पञ्चैव महायज्ञाः। तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति"

धर्मशास्त्रकारेण मनुना अहुत्याद्यभिधानैः अभिहितानि पञ्चमहासत्राणि।

"अहुतश्च हुतश्चैव तथा प्रहुतमेव च।
ब्राह्मं हुतं प्राशितञ्च पञ्चयज्ञान् प्रचक्षते॥" (३।७३)

पञ्चमहायज्ञानां स्वरूपविषये च प्रोक्तं मनुना-

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥" इति। (३/७०)

अध्यापनशब्देनात्रध्ययनमपि गृह्यते। 'जपोऽहुत'-इति वक्ष्यमाणत्वादतोऽध्यापनामध्ययनञ्च ब्रह्मयज्ञः। 'अन्नाद्येनोदकेन वा'-इति पितृतर्पणं वक्ष्यति। स पितृयज्ञः। अग्नौ होमो वक्ष्यमाणो देवयज्ञः। भूतवलिर्भुतयज्ञः। अतिथिपूजनं मनुष्ययज्ञः।

ननु वैज्ञानिकरीत्या नित्यकर्मत्वेनोपदिष्टं मोक्षफलप्रदं महायज्ञपञ्चकं प्रतिपादयितुं चेष्टयामि। तत्र आदौ ब्रह्मयज्ञ इति। अध्यापनाध्ययनञ्च ब्रह्मयज्ञ इति पूर्वैरव अस्माभिर्ज्ञातः।

'स्वाध्यायोऽध्येतव्यः'

सन्ध्यावन्दनादिकं वेदशाखाध्यनपूर्वकं वैदिकमन्त्रोच्चारणन्तु स्वाध्याय इति पदेन वोध्यते। संक्षेपेण 'अध्ययनम्'-इति पदेन तु विज्ञानधर्मदर्शनकला-इत्यादीनां सालोचनमुन्नयनमेव वोध्यते। (Study and development of Arts, Science, Philosophy, Religion etc.) अध्ययनस्य मुख्यमुद्देश्यन्तु ज्ञानद्वारेणात्मोपलब्धिः (self-realization)। मनोवैज्ञानिकस्य मास्लोमहोदयस्य आकाङ्क्षायाः उर्द्धक्रमतत्वे (higherarchical need) आत्मोपलब्धिः सर्वोच्चसोपानमारोहति, यस्याः भित्तिस्वरूपा तु जैविकाकाङ्क्षा (biological need)।

आत्मोपलब्धिद्वारेण
आत्मप्रतिष्ठाकाङ्क्षा
जैविकाकाङ्क्षा

अत आत्मनः देहमनसोर्मेलनस्वरूपम् अहंकारान्धकारम् अध्ययनमेव अपाकरोति, येन भवति आत्मोपलब्धिद्वारेण मोललाभः ब्रह्मज्ञानं वा। सा विद्या एव विमुक्तिस्वरूपा।

परमात्मा
(higher self)
स्वाध्यायः
जीवात्मा (lower self)

आत्मोपलब्धिः
attainment of self
अहंकारः body-mind complex

वौद्धिकं परिवर्तनम् (cognitive change)

न केवलमेतद् अधुना तु चिकित्साशास्त्रे तनुमनःसम्बन्धीनां गदानां निरामयार्थं (to cure psycho-somatic diseases) तथा जनमततत्वस्य (human psychology) उन्नतये YAGYOPATHY—इति विषयस्य चर्चाधिक्यं श्रूयते अस्माभिः। तत्रैव एतदालोचितं यत् वैदिकमन्त्राणां छन्दोबद्धोच्चारणद्वारेण उद्भूताः पूतध्वनितरङ्गाः (harmonious sonic waves) यदा एण्डोक्राइन्-इति ग्रन्थिं (endocrine gland) प्रविश्य सुक्ष्मां शारीरिकशक्तिं जनयति ततः मानसिकं प्राक्षोभिकं विकाशश्च (mental & emotional development) साधयति। अतः मोक्षप्राप्तौ स्वाध्यायजनिताः दैहिकी शुद्धिः मानसिकी शुद्धिश्च भवन्ति द्वारस्वरूपाः।

द्वितीयन्तु तावद् देवयज्ञः। यज्ञादिकरणेन देवयज्ञः। बोधायनेन विरचितम् तदीये धर्मसूत्रे-

"अहरहः स्वादाकुर्यादाकाष्ठात्तथैवत्तं देवयज्ञं समाप्नोति। - इति।

देवयज्ञेन देवेभ्यः श्रद्धानिवेदनमेव (gratitude to God) प्रकटितम्।। आस्तिकानाम् अस्माकं स्रष्टारः रक्षकाश्च। अतः नित्यम् अग्निहोत्रादिसत्रैः देवसन्तुष्टिः तथा आत्मनिवेदनद्वारात्मतुष्टि आवशियकी। स्त्रीपशुपुत्रादीन् अभिप्रेतान् भोगान् हि वि देवाः दास्यन्ति यज्ञैस्तोषिताः सन्तः। अतः अयन्तु स्वार्थरहितं विमिमयचक्रम् इति गीतं गीतायाम्-

"देवान् भावयतानेन ते देवा भावयन्तः वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथा।। - इति। (३/११)


याजकस्य स्वाभीष्टफलप्रदानं परिपोषणञ्च
देवः
परस्परभावनम्
याजकः
यागैः स्वार्थरहितं स्वात्मनिवेदनम्

यजमानेनाग्नावहुतिं सम्यक् क्षिप्ता रसाहरणकारित्वादित्यस्य आदित्यं प्रप्नोति। स चाहुतिरस आदित्याद्वृष्टिरूपेण जायते। ततोऽन्नम्। तदुपभोगेन जायन्ते प्रजाः। इदन्तु वैज्ञानिकं सत्यं यत् पार्थिवाः रसा एव पुनः वर्षणरूपेण धराधाम्नि पतिताः सन्तः शस्याद्युत्पत्तिद्वारेण पार्थिवतनोः परिपुष्टिं साधयति। अनेन जीविताः याजकाः पुनः आत्मनामानृण्यं देवेभ्यः यज्ञद्वारेण प्रदर्शयन्ति। देवोयज्ञोऽयं त्रिविधमुद्देश्यं साधयति-

प्रथमं तु तावत् (short term)	मानसिकं सत्त्वगुणरोपणम्।
(cultivation of savtik	
	mental qualities)

द्वितीयं तु तावत् (medium term) - चरितगठनम्। (character building)

अन्तिमन्तु तावत् (long term) - देवोपलब्धिः। (God-realization)

यज्ञाग्निना एव भवति याजकस्य देहशुद्धिः (purification of body) चित्तशुद्धिश्च (purification of mind)। यज्ञाग्नौ समर्पितानां हवनसम्पदां प्रज्वलनद्वारेण उद्भूतः धूमः यदा प्रश्वासरूपेण याजकस्य शरीरे प्रविशति तदा पञ्चभूतनिर्मितस्य शरीरस्य पुष्टिं वर्धयति, अपि च रुधिरशुद्धिद्वारेण तनोः प्रतिरोधक्षमयोग्यत्वं च वर्धयति। अतः देहशुद्धिर्भवति।

अग्नि एव संस्करोति सर्वं कलुषम्। ततः मरणात् परं पाञ्चभौतिकस्य देहस्य शुद्धीकरणाय दाहनमेव स्वीकृयते अस्माभिः। मनसः अज्ञानस्य अहंकारस्य च अग्नौ समर्पणद्वारेण भवति शुद्धिः। अतः देहशुद्धिद्वारेण चित्तशुद्धिद्वारेण वा पार्थिवस्य तनोः देवयोग्यत्वं भवति।

तृतीयन्तु तावत्पितृयज्ञः। पित्र्युद्देश्योदकतर्पणेन पितृपूजनन्तु पितृयज्ञ इति। मानवजातेर्जीवनावसरे सामाजिकधर्मरूपेण पितृदेवतोद्देश्येन पूजासाम्पानादिप्रदर्शनस्य एकं विशिष्टं स्थानमस्ति (gratitude to ancestors & elders)। तृप्धातोर्निष्पन्नस्य तर्पणम्-इति शब्दस्य अर्थं तु तृप्तिसम्पादनम्, ततो भवति आत्मतृप्तिः (satisfication of self), पुण्यस्वरूपेयं (virtue) मोक्षफलप्रदा।

अत्र पितृशब्देन पितामहमातामहादीनामपि ग्रहणं भवति पितृशब्दस्य वहुवचनसामर्थ्यत्वात्। जीवितयोः जनकजनन्योः अन्नोदकदानादिना पोषणद्वारेण प्रीतिमुत्पादयति। उपरतानां कृतेऽपि च पयोमूलफलैः अन्नाद्योनोदकेन वा अहरहः श्राद्धं कुर्यात्। श्रद्धासहितं दानमेव श्राद्धम्। तेन दानकर्तुः दानग्रहीतुः उभययोर्भवति सन्तुष्टिः।

पितृशक्तिः मातृशक्तितश्च मानवभ्रूणोत्पत्तिः।

Human embrio = Father power + Mother power

पितृरेतसा मातृजठरे एव सन्तानोद्भवः। मातृशरीरत एव संवेदनग्रहणात् भवति उत्पन्नस्य शरीरस्य संवेदनम्। गर्भोपनिषदि एतत् ष्पष्टतया बैज्ञानिकदृष्ट्यालोकितम् यत्-

"एतत्तु षट्कौषिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः।
अस्थिस्नायुमज्ञानः पितृतः तन्मांसरूधिराणि मातृतः॥" -इति

यतस्तयोः शरीरमात्रानुग्रहणेन पुत्रशरीरोत्पत्तिः ततः उपरतेऽपि पितरि तयोः शरीराश्रयणात् पितृभ्यामवश्यमेवानृण्यं वर्तते पुत्रस्य। मेण्डेल्-महाभागैराविष्कृते वंशगतितत्वविषये वंशगतेरेककरूपेणाभिहितस्य जिन्-इत्यस्य पुत्रशरीरे पितृपितामहोदयेभ्यः कुत्रापि म्प्राणाण प्रकटत्वं कुत्रापि प्रच्छन्नत्वश्चावलोक्यते। ततः पितृशरीरवधारणात् अवश्यमेव तेषां तासां वा सन्तोषर्जनयितव्यः।

मनोवैज्ञानिकदृष्ट्यापि तत्वमेतत् सुकरेणैव वयं प्रतिपादयितुं शक्नुमः यत् मृत्युलोकं तु जागतिकम् (material) पितृलोकन्तु आध्यात्मिकम् (spiritual)। शरीरान्तरग्रहणात् पूर्वं स्थूलबुद्धौ (gross mind) सञ्चितामासक्तिं शुभकामनाञ्च सदैव परित्यजन्ति पितृलोकवासिनः पितरः। इदं तु गौणसंवेदनोपरि प्रतिष्ठितम् (subtility of consciousness)। अतः पितृपितामहादीनां स्मरणद्वारेण भोजनद्वारेण वा समेताः संवेदनतरंगाः पुत्रप्रपौत्रादीनां कल्याणाय एव प्रवर्तन्ते। ततः श्रद्धया कालिकं भोज्यादिनिवेदनेन तर्पणेन वा तेषां सन्तुष्टिः जनयितव्या, यया एते तरंगाः सदा अस्मत्सु सञ्चारिताः स्युः। एते संवेदनतरंगा आत्मतुष्टिजनकाः मोक्षफलप्रसावश्च।

चतुर्थन्तु तावत् मनुष्ययज्ञः। वयं तु मानविकगुणसम्पन्नाः मनुष्याः। अतः अस्माकं सनातनधर्मन्तु जीवितदेववाचिनां मनुष्येतराणां सेवानम्। अतः सामाजिकसेवनन्तु (social service) मनुष्ययज्ञपदेनाभिधीयते। "अतिथिदेवो भव"-इति वेदवचनमनुस्मृत्य अनाहूतस्याकस्मात् अनाकाङ्क्षितस्य जनस्य अन्नोदकादानादिना तथा गुर्वादिनां पदसेवनद्वारेण सन्तुष्टिसाधनमेवालोचितमत्र। व्यष्टिस्वार्थं परित्यज्य सामाजिकीभवनं तु साध्यते अनेन। अन्नदानन्तु श्रेष्ठयज्ञमिति उच्यते शास्त्रकृद्भिः। जीवनविज्ञानं (science of living) हि केषाञ्चन मूल्यानामाश्रयभूतम्। तत्र तु अन्यतमानि पारस्परिकं सहसम्पर्कम् (corelation) परसेवनम् (service to others) सामाजिकीभावनम् (socialization)-इत्यादीनि। अनेन भवत्यात्मशुद्धिः, या खलु आत्मप्रतिष्ठायाः जनकभूताः। अनेन देवयोग्यत्वमस्मत्सु भवति अन्तर्भावितम्।

purification of self ——— establishment of self
attainment of moksha

अन्तिमं तु तावद्भूतयज्ञ इति। अत्र भूतपदेन अन्तः संज्ञाविशिष्टानां संज्ञारहितानाञ्च वोध आपतति। अतः भूतयज्ञेन चेतनाचेतनां प्रकृतिं प्रति संवेदकस्य याजकस्य श्रद्धा स्वजीनधारणाय प्रकृतिनिर्भरता च प्रकटिता। अतः संक्षेपेण इदं तु प्रकृतेः पुरुषस्य सहसम्पर्कस्य (mutual relations between man & nature) सूचकमिति वक्तुं शक्यते। अत्र मनुष्यातीतेभ्यः पशुभ्यः वलिनिवेदनमपि भूतयज्ञ इति पदेन वोध्यम्।

जीववैचित्र्यं (bio diversity) वास्तुतन्त्रञ्च (ecology) रक्षितं भवत्यनेन सत्रेण। प्रकृतेः संरक्षणद्वारेण आत्मरक्षणमपि साधारणानां कृते तु नीतिस्वरूपा। अधुनेदं तत्त्वन्तु ethico-eco-bio-anthropocentism-इति नाम्नाभिहितं मनोवैज्ञानिकैः। ये तु देवभावनया प्रकृतेः संरक्षणविषये भवति यतेताः आत्मसन्तुष्टास्ते वात्मोपलब्धिमात्मप्रतिष्ठां लभते। तत्वमिदं प्रकृतेश्वरपुरुषसहसम्पर्कादुपर्येव (nature-divine-human interaction) भवति प्रतिष्ठितम्। यज्ञाग्नौ सम्प्रदत्तैः धूमायितैः हवनद्रव्यैः प्रकृतेर्दूषणनियमनं शुद्धिकरणं वा भवति। अथर्ववेद इयं प्रकृतिस्तु चिकित्सकेन तुलिता या खलु ऋतसंरक्षणार्थं निरामयति प्रकृतिपुरुषसहसम्पर्कान्तरम्।

अथ वैज्ञानिकदृष्ट्या नित्यकर्मरूपाणि श्रेयस्कराणि महायज्ञानि एतानि आलोचितानि अस्माभिः यानि खलु आत्मसन्तुष्टिपूर्वकम् आत्मोपलब्धिद्वारेण देवस्वरूपप्रकाशकानि मोक्षसहायकानि।

साधूक्तं पाश्चात्यसमालोचकेनैकेन-

"Individualized expression of God and ever one with this perfect life, perfect love and perfect substance"-इति

॥ ओम् शान्तिः शान्तिः शान्तिः ॥

Referened Bibliography

1. Banerjee, S. and Swain, B.K., Sanskrit and Indian Culture, Anwesa—a journal of education, SBCE, Rahara, Kolkata, 2009, vol, 4, pp. 73-78,
2. Manu, Manusamhita, Ed. by Manavendu Bandyopadhyay, Sanskrit Pustak Bhander, 2004.
3. Mookerji, R.K., Ancient Indian Education, MLBD, Delhi, 2003 (Reprint).
4. Panchamukhi, A.R, Socio Economic ideas in Ancient Indian Literature, Rashtriya Sanskrit Sansthan, 1998.
5. Pandey, R. Hindu Samskaras, MLBD, Delhi, 2006 (Reprint).
6. Swain, B.K. Dharmasastra—A link between Tradition & Modernity, Chaukhambha Sanskrit Bhawan, Varanasi, 2003.
7. Swain, B.K., Smrtimimamsa, Akshaya Prakashan, Delhi, 2006.
8. Vyasdev, Shrimadbhagavadgita, Ed. by Pramathanath Tarkabhushan, Dev Sahitya Kutir Private Limited, Kolkata, 2001.

हेत्वाभासस्वरूपम्

शम्पा पालः

न्यायवैशेषिकसम्मतप्रमाणचतुष्टयमध्ये अनुमानमन्यतमम्। अनुमितिकरणमनुमानम्। किन्तु अनुमितिर्यथार्था न भवेच्चेत् यथार्थमनुमानप्रमाणं न स्यात्। यथार्थहेतुना पक्षे साध्यसाधनमेव यथार्थानुमानप्रमाणम्। अतो यथार्थानुमानं सद्धेतुनैव सम्भवति। स्वार्थपरार्थभेदादनुमानं द्विधा विभक्तम्। तत्र स्वार्थं स्वानुमानहेतुः यत्तु स्वयमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुज्यते, तत् परार्थानुमानम्। वस्तुतो, हेतुरेवानुमितेः जनकः। हेतुः लिङ्गशब्देन अभिधीयते। 'लिङ्ग्यते ज्ञायते येन तल्लिङ्गम्'। लिग्धातोरुत्तरम् अच्प्रत्ययेन लिङ्गशब्दः निष्पद्यते। व्याप्तिबलाद् वलीयान् सन् यः अर्थं ज्ञापयति स हि हेतुरिति। तथापि केशवमिश्रेण भणितम्-- 'व्याप्तिवलेनार्थगमकं लिङ्गम्।'[१] इति। अतः 'पर्वतो वह्निमान् धूमादित्यादौ धूमः अग्नेः लिङ्गम्। प्रशस्तपादभाष्ये लिङ्गलक्षणम् उक्तम्--

> "लिङ्गं पुनः यदनमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते ।
> तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्॥"[२] इति।

लिङ्गमिदं त्रिधा विभक्तं--केवलान्वयि, केवलव्यतिरेकि, चान्वयव्यतिरेकि इति। 'अन्वयमात्रव्याप्तिकं केवलान्वयि'[३] इति तर्कसंग्रहकृत्। अस्यादाहरणं यथा--'सर्वमभिधेयं प्रमेयत्वाद्' इति। अत्र प्रमेयत्वं हेतुः। अभिधेयत्वं साध्यम्। अतो, यत्र यत्र प्रमेयत्वं, तत्र तत्र अभिधेयत्वमिति अन्वयव्याप्तिना केवलं व्याप्तिग्रहो भवति। अतः प्रमेयत्वं केवलान्वयि लिङ्गम्।

'व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि'[४] इति अन्नंभट्टेन तर्कसंग्रहे उक्तं केवलव्यतिरेकिलिङ्गम्। अर्थात् यस्मिन् हेतौ केवलं व्यतिरेकसहचरेण व्याप्तिग्रहो भवति, तत्केवलव्यतिरेकि। यथा-पृथिवी इतराभिन्ना गन्धवत्त्वात्' इति। अत्र गन्धवत्त्वमिति हेतुः इतरभिन्नत्वं साध्यम्। यत्र यत्र पृथिवीतरभेदाभावः, तत्र तत्र गन्धवत्त्वाभावः इति व्यतिरेकव्याप्तिः। अतः गन्धवत्त्वमिति केवलव्यतिरेकि।

'अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि'[५] इति अन्नंभट्टः। अर्थात् अन्वयव्यतिरेकविशिष्टो हेतुरन्वयव्यतिरेकी। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमः तत्र अग्निरिति अन्वयव्याप्तिः। यत्र वह्निः नास्ति तत्र धूमोऽपि नास्ति, यथा महाह्रद इति व्यतिरकव्याप्तिः। अस्यापि हेतोः पञ्च रूपाणि। तानि यथा--पक्षसत्त्वं, सपक्षसत्त्वं, विपक्षासत्त्वम्, अवाधितत्वम्, असत्प्रतिपक्षश्चेति। पक्षसत्त्वादयो धर्मा हेतौ विद्यमानाः चेत्

तदन्वयव्यतिरेकिहेतुः सद्धेतुरित्युच्यते। केवलान्वयी केवलव्यतिरेकी चेति धर्मचतुष्टयोपेतौ भवतः चेत् सद्धेतुपदवाच्यौ भवतः। परं समेषां धर्माणां मध्ये कोऽपि धर्माभावः यदि स्यात्तर्हि सः असद्धेतुर्भवेत्। असद्धेतुरेव हेत्वाभासः।

परं हेतुरयमसत् सन् दोषमुक्तो भवेच्चेद् यथार्थानुमानं न सिद्धं भवति। अतो यथार्थानुमितिं ज्ञातुमिच्छतो जनस्य कृते दुष्टानां हेतूनां हेतोर्वा दोषानां ज्ञानमपेक्षितं वर्तते। तथापि तर्कसंग्रहतर्कभाषा-भाषापरिच्छेदादिग्रन्थेषु सद्धेतुनिरूपणचिकीर्षायां हेत्वाभासः पर्यालोचितः।

हेत्वाभासस्वरूपम्ः

आभासन्ते इति आभासः, हेतोराभासा हेत्वाभासाः इति व्युत्पत्त्या निष्पन्नो हेत्वाभासशब्दः हेतुदोषं विबोधयति। किञ्च, हेतुवदाभासन्ते ये ते हेत्वाभासा इति व्युत्पत्त्या यद्धेतुवत् प्रतीयते परं प्रकृततया न हेतुः, अर्थात् यस्मिन् हेतोर्धर्मा न लसन्ति, तद्धेत्वाभासपदवाच्यम्। अत्र हेत्वाभासो दुष्टहेतूनां बोधकः। प्राञ्चः नैयायिकाः द्वितीयार्थमेव गृह्णन्ति परमर्वाञ्चः उभयार्थमेव। तथाहि नव्यानां नैयायिकानां नये, दुष्टा हेतवस्तथा हेतोः दोषा इत्यतद्द्वयमेव हेत्वाभासपदवाच्यम्।

ननु हेत्वाभासेन समं हेतोः सादृश्यमस्तीति चेदुच्यते उद्योतकृता-प्रकृतवाक्यादुत्तरं यथा प्रकृतहेतोः प्रयोगो दृश्यते, तथैव हेत्वाथासस्यापि प्रयोगो भवतीत्येतदेव सादृश्यम्। तदुक्तं वरदराजेन--

"हेतोः केनापि रूपेण रहिताः कैश्चिदन्विताः।
हेत्वाभासाः पञ्चधा ते गौतमेन प्रपञ्चिताः॥"[६] इति।

अन्नंभट्टेन तर्कसंग्रहे हेत्वाभासशब्देनैव हेत्वाभासलक्षणं सूचितम्, अनुश्रित्य प्राचां मतानि। परं दीपिकायां नव्यनैयायिकमतमुपजीव्य हेत्वाभासलक्षणम् उक्तम्--

'अनुमितिप्रतिबन्धक यथार्थज्ञानविषयत्वं हेत्वाभासत्वम्।'[७] इति लक्षणमिदं हेतुगतदोषलक्षणपरम्। हेत्वाभासज्ञानमनुमितेः प्रतिबन्धकम्। प्रतिबन्धकशब्दस्य द्विविधोऽर्थः। कारणीभूताभावप्रतियोगित्वं प्रयोजकीभूताभावप्रतियोगित्वं वा प्रतिबन्धकम्। हेत्वाभास लक्षणोक्तप्रतिबन्धकशब्दार्थस्तावत् कारणीभूताभावप्रतियोगिष्टम्। अतो नव्यन्यायपरिभाषया परिष्कृतं हेत्वाभासलक्षणम्--

'अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्।' इति।

मुक्तावल्यां विश्वनाथेन उक्तम्--

"यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्।
तथाथि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमिति-
विरोधित्वात् ते दोषाः॥"[८] इति

लक्षणस्यास्य तात्पर्यमेतद् यत् हेतोर्ये व्यभिचारादयो शेषा अनुमितेः तथा नव्यमते व्याप्तिज्ञानस्य प्राचीनमते परामर्शस्य प्रतिबन्धकत्वम् उत्पादयन्ति, ते हेत्वाभासपदवाच्याः। तथा च, ‘पर्वतो धूमवान् वह्निमत्त्वाद्’ इत्यनुमितौ वारणस्य धूमाभाववकद्वृत्तिः वह्निरिति व्याप्तिज्ञानस्य प्रविबन्धको धूमाभाववद्वृत्तिः वह्निः इति निश्चयः। तादृशनिश्चयनिष्ठा प्रतिबन्धकता धूम्माभाववद्वृत्तिवह्निविषयकत्वावच्छिन्नेति धूमाभाववद्वृत्तिवह्निः व्यभिचारः।

परं हेत्वाभासलक्षणमिदं सद्धेतौ अतिव्याप्तं भति। यथा--‘पर्वतो वह्निमान्’ इत्यनुमितौ ‘वह्म्भाववान् पर्वत’ इति वाधभ्रमः प्रतिबन्धकः। सद्धेतुस्थले यथा लक्षणस्यास्यातिव्याप्तिः न स्यात्, तदर्थं ‘यद्विषकत्वेन’ इत्यत्र यादृशविशिष्टविषयकत्वमिति निवेशनीयम्। तथाथि मुक्तावल्ल्यान् उक्तं विश्वनाथेन--

> ‘यद्विषयकत्वञ्च यादृशविशिष्टविषयकत्वं बोध्यम्, तेन
> वाधभ्रमस्यानुमितिविरोधित्वऽपि न क्षतिः॥’’[१] इति।

तथाहि ‘पर्वतो वह्निमान्’ इत्यनुमितौ वह्यभाववान् पर्वत इति वाधभ्रमस्य अनुमितिप्रतिबन्धकत्वेऽपि तादृशप्रतिबन्धकता न वह्न्यभाबभत्पर्वतत्वावच्छिन्न-विषयकत्वावच्छिन्ना, वह्न्यभाववत्पर्वतस्य अप्रसिद्धत्वादिति सद्धेतुमात्रे वह्न्यभाववत्पर्वतादेः दोषत्वञ्च हेतोर्दुष्टत्वञ्च नास्ति इति भावः। एवञ्च ‘ज्ञाननिष्ठयद्रूपावच्छिन्नविषयकत्वा वच्छिन्नानुमितितत्करणान्यतरप्रतिबन्धकत्वं, तद्रूपावच्छिन्नविषयत्वं हेत्वाभासत्वमिति’ लक्षणं फलितम्।

अत्रेदमवेधयं यत्--हेत्वाभासा अनुमितेः प्रतिबन्धकत्वं द्विधा साधयन्ति--

१। साक्षात्साध्याभावप्रतिपादकवाधबुद्धिना

२। अनुमितेः करणरूपस्य व्याप्तिज्ञानस्य परामर्शस्य वा प्रतिवन्धकतया चेति।

परं सत्प्रतिपक्षस्य अनित्यदोषत्ववादी शङ्कते यत्--

‘वह्निव्याप्यधूमवान् पर्वत’ इति परामर्शकाले वह्न्यभावव्याप्यपाषाणमयत्ववान् पर्वत इति परामर्शे सति धूमहेतोः न सत्प्रतिपक्षत्वम्, पाषाणमयत्वे वह्न्यभावव्याप्यत्वाभावेन विशिष्टस्य वह्न्यभावव्याप्यपाषाणमयत्ववत् पर्वतस्य अप्रसिद्धत्वादिति भावः। सद्धेतुनां प्रतिपरामर्शेऽपि न दुष्टत्वमिति भावः। अन्यथा नाम प्रतिबन्धकीभूतभ्रमविषयस्यापि दोषत्वे वाधस्य अनित्यदोषापत्तिः। तस्मात्तथा वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्य न आभासत्वं, भ्रमाद् अनुमितिप्रतिबन्धकमात्रम्, हेतुस्तु न दुष्ट इति। अतः, यादृशविशिष्टविषयकत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं, तादृशविशिष्टदोषत्वे च साध्याभाववद्वृत्तिहेत्वादिकं दोषः, तद्वत्वञ्च ‘हेत्रौ येन कनापि’ सम्बन्धेनेति नव्याः दीधितिकृदः। प्राञ्चस्तु दुष्टानामेव हेतूनां विभाजनात् तेषां लक्षणं वक्तव्यम्, तदुपयोगितयेव

दोषस्वरूपनिर्वचनमिति वदन्ति, तन्मतम् उपन्यस्यति--परे तु यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वं, तद्वत्त्वं हेत्वाभासत्वम्।

ननु वह्निमान् इत्यनुमितिं प्रति वह्न्यभाववानिति बाधबुद्धिरेव प्रतिबन्धिका, न तु व्यभिचारबुद्धिरिति व्यभिचारे हेत्वाभासलक्षणस्य अतिव्याप्तिः भवतीति कृत्वाह--

'अनुमितिविरोधित्वञ्च अनुमितितत्कारणान्यतरविरोधित्वम्' इति। तथा च, व्यभिचारबुद्धेः अनुमितिकरणव्याप्तिज्ञानविरोधित्वात्र लक्षणसमन्वय इति भावः।

ननु 'पर्वतो वह्निमान द्रव्यत्वादिति अनुमितौ वह्न्यभाववद्वृत्तिद्रव्यत्वरूपव्यभिचारस्य दोषत्वे तेन दोषेण धूमोऽपि दुष्टः स्यादतः आह--'दोषज्ञानञ्च यद्धेतुविषयकं तद्धेतुकानुमितो प्रतिबन्धकम्। तेन एकहेतौ व्यभिचारज्ञाने सति अन्यहेतुना अनुमित्युत्पत्तेः इत्यस्य व्यभिचारज्ञानस्य अनुमितिविरोधित्वाभावेऽपि न क्षतिः इत्यनेन अन्वयः तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्य अनुमितिविरोधित्वाभावेऽपि न क्षतिरिति द्वितीयोऽन्वयः। अतो दीधितिका, राभिमतमनुमित्यघटितं हेत्वाभासलक्षणमुक्तं विश्वनाथन्यायपञ्चाननेन--

“यादृशसाध्यपक्षहेतो यावन्तो दोषाः तावदन्यान्यत्वं तत्र हेत्वाभासत्वमिति।”[१०]

सप्तपदार्थीकृता शिवादित्येन प्रोक्तं हेत्वाभासलक्षणम्--

'अङ्गवैकल्याभासत्वमिति'।[११] पक्षधर्मत्वादीनि हि अङ्गानि। तैः वैकल्यं तद्रहितत्वम् आभासत्वमिति।

प्रशस्तपादाचार्येण भाष्ये हेत्वाभासलक्षणं लक्षितम्--

“विपरीतमतो यत् स्यादेकेन द्वितयेन वा
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत्।”[१२] इति।

हेत्वाभासभेदः

हेत्वाभासः पञ्चधा प्रविभक्तः-

'अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा॥”[१३] इति विश्वनाथः।

सव्यभिचारी विरुद्धः प्रकरणसमः साध्यसमः कालातीतश्चेति पञ्च हेत्वाभासाः गौतमसम्मताः। काश्यपमते--हेत्वाभासाः त्रिधा विभक्ताः-असिद्धः विरुद्धः सन्दिग्धश्चेति। तथा चोक्तं भाष्ये--

'विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीद्' इति। अनध्यवसितो नाम अतिरिक्तश्चतुर्थो हेत्वाभास इति प्रशस्तपादाचार्याः। तथा चोक्तं--

'एतेनासिद्धविरुद्धसन्दिग्धानध्यवसतितवचनानामनपदेशत्वमुक्तं भवति' इति।

शिवादित्यनये, अङ्गवैकल्यरूपा। आभासाः षडेव--असिद्धः, विरुद्धः, अनैकान्तिकः, अनध्यवसितः कालात्ययादिष्टः, प्रकरणसमश्चेति। एषां षण्णां पञ्चानां वा हेत्वाभासानाम् अवान्तरभेदाङ्गीकारेण असंख्या हेत्वाभासा भवितुमर्हन्ति।

(i) अनैकान्तिकहेत्वाभासः--एकेन साध्यत्वेन अन्तः सहचारनिश्चयो न विद्यते, मस्यासौ अनैकान्तिकः तत्र अनेकान्तिकहेत्वाभासः त्रिविधः--साधारणः असाधारणः अनुपसंहारी चेति।

(क) साधारणः

'साध्यवदन्यवृत्तिः साधारणः।' अर्थात् साध्याधिकरणव्यतिरिक्ते स्थाने वर्तमानः साधारणः।

यथा--धूमवान् वह्नेः इत्यत्र धूमवत्त्वं साध्यम्, वह्निः हेतुः, स तु पर्वतरूपपक्षात् महानसरूपसपक्षाच्च भिन्ने तप्राय पिण्डि दृश्यते। परं तत्रापि धूमाभावः।

(ख)असाधारणः

'साध्यसमानाधिकरणो हेतुः असाधारणः।' यथा--शब्दो नित्यः शब्दत्वात्।' अत्र शब्दत्वं हेतुः न तु शब्दस्य नित्यत्वसाधकः, न वा अनित्यत्वबाधकः।

(ग) अनुपसंहारी

'अत्यन्ताभावप्रतियोगिसाध्यकादिः अनुपसंहारी।' यथा--'सर्वमनित्यं प्रमेयत्वात्' इति। अतः अन्वयव्यतिरेकदृष्टान्तरहितः अनुपसंहारी।

(ii) विरुद्धहेत्वाभासः

साध्याभावव्याप्तो हेतुः विरुद्धः। अर्थात् साध्यसाधनाय प्रयुक्तो हेतुः यदि तद्विपरीतं साधयति, तदा विरुद्धः। विश्वनाथेन तथाह्युक्तम्--'यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः।' इति। यथा--'शब्दो नित्यः कृतकत्वात्' इत। अत्र कृतकत्वं नित्यत्वाभावेन अनित्यत्वेन व्याप्तम्। अत्र साध्यभावेन व्याप्तत्वात् कृतकत्वं विरुद्धो। हेत्वाभासः।

(iii) असिद्धिहेत्वाभासः

असिद्धिमान् हेत्वाभासः असिद्धः। स च त्रिविधः--आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति। तदुक्तं भाषापरिच्छेदे

"आश्रयसिद्धिराद्या स्यात् स्वरूपसिद्धिरप्यथा।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा॥" इति।

(क) आश्रयासिद्धिः-

'आश्रयासिद्धिः पक्षे पक्षतावच्छेदकास्याभावः' इति। 'मणिमयः पर्वतो। वह्निमान् धूमात्' इत्यनुमितौ धूमरूपहेतोः पक्षः असिद्धः। अतः आश्रयासिद्धः पक्षासिद्धो हेत्वाभासः।

(ख) स्वरूपसिद्धिः

पक्षे हेत्वाभासः स्वरूपासिद्धः। 'ह्रदो द्रव्यं धूमाद्' इत्यनुमाने हेतोः धूमस्य पक्षे ह्रदे वृत्तित्वाभावात् स्वरूपासिद्धहेत्वाभासत्वम्।

शुद्ध-भाग-विशेष्य-विशेषणासिद्धभेदात् चतुर्धा स्वरूपासिद्धहेत्वाभासः। तत्र शुद्धासिद्धो। यथा--'शब्दो गुणः चाक्षुषत्वात् रूपवद्' इत्यत्र चाक्षुषत्वरूपहेतुः पक्षे शब्दे कथमपि नास्ति।

भागासिद्धो यथा-'उद्भूतरूपादिचतुष्टयो गुणो रूपत्वात्' इति। तत्र रूपत्वहेतोः पक्षैकदेशवृत्तित्वन तस्य पक्षस्य भागे असिद्धत्वम्। विशेष्यासिद्धो यथा--'शब्दो नित्योऽस्पर्शत्वे सति द्रव्यत्वाद्' इत्यत्र विशेष्याभावप्रयुक्तविशिष्टभावाद् विशेष्यासिद्धस्वरूपः स्वरूपासिद्धः। विशेषणासिद्धो यथा--'शब्दो नित्यः द्रव्यत्वे सत्यम[illegible]त्वाद्' इत्यत्र द्रव्यत्वविशिष्टमस्पर्शत्वञ्च हेतुर्नास्पर्शत्वमात्रम्। शब्दे च द्रव्यत्वं विशेषणं नास्ति, गृ[illegible] अतो विशषणासिद्धः।

(ग) व्याप्यत्वासिद्धः

व्यर्थविशेषणघटिते अनुमाने व्यापत्वासिद्धः हेत्वाभासो भवति। उक्तञ्च भाषापरिच्छेदे--

"व्यापत्वासिद्धिरपरा नीलधूमादिको भवेत्।' इति। पर्वतो वह्निमान् नीलधूमादित्यत्र धूमहेतोः नीलविशेषणमिदं व्यर्थम्। अतः तत्र व्यापत्वासिद्धः हेत्वाभासः।

तर्कसंग्रहे हेत्वाभासोऽयं बहुधालोचितः--'सोपाधिको हेतुर्व्याप्यत्वासिद्धः।' इति।

(iv) सत्प्रतिपक्षहेत्वाभासः

'विरुद्धयोः परमर्शे हेत्वोः सत्प्रतिपक्षता' इति। अर्थात् यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः। यथा--शब्दो नित्यः श्रावणत्वात् शब्दत्ववत्।' अत्र श्रावणत्वं हेतुः, नित्यत्वं साध्यम्, तत्प्रतिपक्षस्तु 'शब्दोऽनित्यः कार्यत्वाद् घटवत्' इति।

(v) कालात्ययापदिष्टहेत्वाभासः

'साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः' इति विश्वनाथः। अर्थात् बाधस्त पक्षे साध्याभावादिः। यथा--वह्निरनुष्णो द्रव्यत्वात् घटवद्' इति। अत्र द्रव्यत्वं हेतुः, अनुष्णत्वं साध्यम्, तत्तु प्रत्यक्षविरुद्धम्।

कालस्य अत्यपो नाम अपगते अपदिष्टो। नाम निर्दिष्टः इति कालात्ययापदिष्टः। असौ कालात्ययापदिष्ट एव वाधित इति कथ्यते। सप्तपदार्थीकारेण उक्तम्--

'उपजीव्यप्रमाणानिश्चितसाध्यविपरीतत्वं कालात्ययापदिष्टत्वमिति'।

केशवमिश्रेणापि कथितम्--

'पक्षे प्रमाणान्तरावधृतसाध्याभावो।
हेतुः वाधितविषयः कालात्ययापदिष्टहेत्वाभासः॥' इति।


हेत्वाभासः (भाषापरिच्छेदानुसारी)
अनैकान्तिककः
विरुद्धः (शब्दो नित्यः कृतकत्वात्)
असिद्धः
सत्प्रतिपक्षः (शब्दो नित्यः श्रावणत्वात्)
कालात्ययापदिष्टः (वह्निरनुष्णो द्रव्यत्वात्)
आश्रयासिद्धिः (काञ्चनमयो पर्वतो वह्निमान् धूमात्)
स्वरूपासिद्धिः (ह्रदो द्रव्यं धूमात्)
व्याप्यसिद्धिः (पर्वतो वह्निमान् नीलधूमात्)
साधारणः (धूमवान् वह्नेः)
असाधारणः (शब्दो नित्यः शब्दत्वात्)
अनुपसंहारी (सर्वमनित्यं प्रमेयत्वात्)

तथ्यसूत्राणि

१। तर्कभाषायाम् (पृ. १४२)
२। मेधाचैतन्यकृतप्रशस्तपादभाष्यव्याख्याया द्वितीये भागे गुणप्रकरणे (पृ. ३३७) (मूले भाष्ये पृ. ३३२)।
३। रवीन्द्रनाथशास्त्रिसम्पादितः तर्कसंग्रहः (अनुमानप्रकरणम्) (पृ. १५३)
४। तदेव
५। तदेव
६। गङ्गाधरकरसम्पादितायां तर्कभाषायाम् (पादटीका-१) (पृ. २२०)।
७। रवीन्द्रनाथशास्त्रिसम्पादितः तर्कसंग्रहः (अनुमानप्रकरणम्) (पृ. १६०)
८। श्रीपञ्चाननशास्त्रिसम्पादितः भाषापरिच्छेदः (अनुमानखण्डे) (पृ. १७५-१७६)
९। तदेव
१०। श्रीपञ्चाननशास्त्रिसम्पादितः भाषापरिच्छेदः (अनुमानखण्डे) (पृ. १७९)
११। सप्तपदार्थी (पृ. ३८)
१२। मेधाचैतन्यकृतप्रशस्तपादभाष्ये द्वितीयभागे (पृ. ३३२)
१३। श्रीपञ्चाननशास्त्रिसम्पादितः भाषापरिच्छेदः (अनुमानखण्डे) (पृ. १७४)।

सहायकग्रन्थनिर्देशः

१। तर्कसंग्रहः, रवीन्द्रनाथशास्त्रिसम्पादितः, संस्कृत पुस्तक भाण्डार, कोलकाता, २००७ वर्षे।
२। .....(सटीकः), श्रीनारायणचन्द्रगोस्वामिसम्पादितः, संस्कृत पुस्तक भाण्डार, कलकाता, १४१० (वङ्गाब्दे)।
३। तर्कभाषा, गङ्गाधरकरसम्पादिता, यादवपुरविद्यालय ओ महाबोधि बुक एजेन्सि, कलकाता, २००८ वर्षे।
४ ...., सर्वाणीगाङ्गुलीसम्पादिता, संस्कृत पुस्तक भाण्डार, कलकाता, २००५ वर्षे।
५। निबोधनी, तपनशङ्करभट्टाचार्यसम्पादिता, संस्कृत पुस्तक भाण्डार, कलकाता, २०१२ वर्षे।
६। भाषापरिच्छेदः, श्रीपञ्चाननशास्त्रिसम्पादितः, आगमानुसन्धानस-मितिः, १३५४ (वङ्गाब्दे)।
७। ...., रवीन्द्रनाथशास्त्रिसम्पादितः, संस्कृत पुस्तक भाण्डार, कलकाता, २००७ वर्षे।

SANSKRIT LANGUAGE AND GRAMMER LEARNING INCREDIBLE HELPS OF WEBSITE

BHASKAR MUKHERJEE

Sanskrit is indeed a fruitful & a wonderful language known as devabhāṣā (Debnagari) or language of Gods. And every name means "refined" or "Sculpted to perfections" Sanskrit in its manifold aspects is the perfection of its grammar, charm & beauty of its poetry, & we look at it is a source of upliftment & enlightment as a scared medium for expressing the highest spiritual truths & experiences. As a part of scientific research. Academy has attempted in mining the knowledge of Aviation Science in Ancient India with an Eye on future

৩। প্রৌঢ়মনোরমা, ভট্টোজিদীক্ষিত, চৌখম্বা সংস্কৃত পুস্তকালয়, বনারস সিটী।
৪। লঘুশব্দেন্দুশেখর, প. শ্রীগৌপালশাস্ত্রী নেনে, চৌখম্বা সংস্কৃত সীরীজ, বারাণসী, ১৯৫৪।
৫। ব্যাকরণমহাভাষ্যম্, ম.ম.প. শিবদত্ত শর্মা, চৌখম্বা সংস্কৃত প্রতিষ্ঠানম্, দিল্লী, ১৯৮৮।
৬। শব্দশক্তিপ্রকাশিকা, জগদীশ তর্কালঙ্কার, কৃষ্ণকান্ত টীকোপেতা।
৭। সিদ্ধান্তকৌমুদী, গোপালদত পাণ্ডেয়, চৌখম্বা সুরভারতী প্রকাশন, বারাণসী, ২০০১।

मातुः सरस्वत्याः वेदाश्रितस्वरूपम्

पार्थसारथिः शीलः

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।
आद्यं त्रयं ब्रह्मरूपं मायारूपं ततो द्वयम्॥"[१]

परमात्मनः परमकरुणावशाद् निःश्वासरूपेण वेदस्य स्थितिः प्रकटिताऽऽस्माभिर्ज्ञायते--"अस्य महतो भूतस्य निःश्वसितम्।"[२] अत्र स्वतःप्रमाणस्वरूपेषु वेदेषु प्राप्तं ज्ञानमृषीणां क्रान्तप्रज्ञायाः फलमिति। यतः हि "ऋषयः मन्त्रद्रष्टारः"। "जायमानो वै जायते सर्वाभ्य एताभ्य एव देवताभ्यः" इति श्रौतसिद्धान्तादुत्पन्नमुत्पद्यमानं वा निखिलवस्तुजातं देवतामयमित्यत्र नास्ति काचन विप्रतिपत्तिः। प्रश्नः जायते किमासीत् मातुः सरस्वत्याः स्वरूपम् वेदेषु? वाग्देव्याः सरस्वत्याः वर्णनं वेदेषु कुत्रापि देवतारूपेण कुत्रापि वा नदीरूपेण च समुपलभ्यते।

"अम्बितमे नदीतमे देवीतमे सरस्वति।
अप्रशस्ता इव स्मसि प्रशस्तिमम्बनस्कृधि॥[३]

तत्र सरस्वत्याः नामप्रसङ्गे यास्काचार्यस्य मतम्--

"तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति।
तद्यद्देवतावदुपरिष्टात्तद् व्याख्यास्यामः।"[४]

सायणमतेन तु "द्विविधा हि सरस्वती विग्रहवद्देवता नदीरूपा च।"[५]

निघण्टाऽवप्येषः द्विविधः अर्थः दृश्यते। "सरस्वत्याः नदीनामसु पठितम्"[६] उत "सरस्वती वाङ्नामसु पठितम्"[७] परवर्तिषु साहित्येषु पुराणादिषु च सरस्वत्याः वर्णनाः विविधरूपेण प्राप्यन्ते। यास्काचार्यमतेनेदमपि ज्ञायते यत्--"सरस्वतः सरस् इत्युदकनाम सतेर्स्तद्वती"[८]। परन्तु इतः विशेषनदीरूपेण उत सामान्यनदीरूपेण ग्रहणं न सम्यक् ज्ञायतेऽस्माभिः। वैदिकसाहित्यस्य विद्वद्भिः नाम्नः विशेषः अर्थ एव सुगृह्यते।[९] ऋग्वेदे त्रिंशतः नदीनामुल्लेखः प्राप्यते। तत्र एकत्र सर्वाधिकरूपेण १९ नदीनामुल्लेखः नदीसूक्तौ प्राप्यते।

"इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्णया।
असिक्न्या मरुद्वृधे वितस्तायाऽर्जीकीये शृणुह्या सुषोमया॥
तृष्टामया प्रथमं यातवे सजूः ससर्त्वा रसया श्वेत्या त्या।
तवं सिन्धो कुभया गोमतीं क्रुमुं सरथं याभिरीयसे॥[१०]

यद्यपि राथमहोदयेन सिन्धुमेव सरस्वतीति मन्यते[११] तथापि तस्य मतं न तथा समाद्रियते। अधुना शोधेभ्य एव उभयोः नद्योः भिन्नता परिस्फुटिता। भारतीयचिन्तनपरम्परायां जडवस्तुषु चेतना आरम्भतः परिकल्प्यते। एतदपि असम्भवं नास्ति यत् नद्याः प्राप्तलाभैः विभिन्नैः गुणैः च नद्याः प्रभावान्विताः तटवासिन आध्यात्मिकमाधिभौतिकमुन्नतिं च दृष्ट्वा सरस्वतीं देवीरूपेण कल्पन्ते स्म। भौतिकनदीरूपतः अदृश्यवाक्कल्पना आयाति इति परिस्फुर्टानि अनुमान्यतानुसारेण देवतारूपकल्पना एव पूर्वमभूत्। "सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्। वेद शब्दात्रेभ्य एवादो पृथक् संस्थाश्च निर्ममे।"[१२] ऋषेः अरविन्दस्य मतं तु भौतिकतः आध्यात्मिकप्रसङ्गमेव स्पष्टीकरोति। "सृ गतौ। गतेर्ज्ञानमप्यर्थः। सरति प्रवहति स्थानात् स्थानान्तरमिति सरो जलं यद्वा सरति प्रवहति गुरोः शिष्यं प्रतीति सरो ज्ञानम्। सर्वधातुभ्योऽसुन्।[१३] इत्यौणादिकोऽसुन्प्रत्ययः। सरो विद्यते यस्यां सा सरस्वती। तद्धिते मतुप्।"[१४] 'सरस्' शब्दादनन्तरं मतुप्-प्रत्यययोगेन स्त्रीलिङ्गे सरस्वती एवं पुंलिङ्गे सरस्वान् इति शब्दद्वयं निष्पन्नं भवति। ऋग्वेदे सूर्यस्य अपरं नाम सरस्वान् (ज्योतिष्मान्), तत्र सरस्वती च ज्योतिर्मयी देवीत्यस्माभिर्ज्ञायेते। वेदे स्वरस्वत्याः नद्या अवस्थानं शुतुद्रीयमुनयोः मध्ये (यमुने सरस्वति शुतुद्रि) एव उल्लिखितम्। परन्तु मेक्डोनेलमहोदयेन अफ्गनिस्थानस्य 'हरह्वैति' (अरंगदावनदी) रालसनमहोदयेन हेलमन्दं च सरस्वती मन्यते।[१५] ऋग्वेदे सरस्वत्याः पर्वततः उत्पन्ना भूत्वा समुद्रपर्यन्तं प्रवाहस्य वर्णना प्राप्यते। "एका चेतत सरस्वती नदीनां शुचिर्यती गिरिस्थ आ समुद्रात्।"[१६] ऋग्वेदे सरस्वत्या नानाविधानि विशेषणानि प्रयुक्तानि। सप्तनदीरूपिणी, सप्तभगिगनीसेविता, सप्तस्वसा, सप्तधातु इत्यादीनि, यानि सर्वाणि हरह्वैत्या उत हेलमन्दस्य विपरीतदिशायां दृश्यन्ते। प्राचीननवीनानां सूक्तानां तुलनामूलकदृष्ट्या प्राचीनसुक्तेषु सरस्वत्या माहात्म्यमधिकं प्राप्यते। नवीनेषु च सिन्धुनदस्य महत्त्वं सूचितम्। प्राचीनसूक्तेषु वारद्वयं सिन्धोरुल्लेखः प्राप्यते[१७] एतदुल्लेखद्वयं सायणेन नदीविशेषार्थे न स्वीकृतम्। तत्र उदकविशेपार्थे समुद्रार्थे च स्वीकृतम्।[१८] सरस्वत्याः प्रशंसातः ज्ञायते यद् ऋग्वैदिकसभ्यतायाः उद्भवः विकासः च सरस्वत्याः प्रभावस्य फलम्। अतः सारस्वतप्रदेशस्य सभ्यता इति। **"वाद में इसी सभ्यता का क्षेत्र विस्तार होता है एवं इस क्रम में यह मुख्यतः पश्चिम की और, कुछ दूर तक पूर्व की और वढ़ती है। सभ्यता का केन्द्र सरस्वती-तट से सिन्धु और सहायिकाओं के तट पर पहुंचता है और इस क्रम में इसकी व्यापारिक गतिविधियों का खासा विस्तार होता है।"**[१९] ऋग्वेदस्य मन्त्राणां संकलनकाले सरस्वती नदी पर्वततः (नाहनपर्वतस्य बदरीं निकषा)[२०] उत्पन्ना भूत्वा पंजाब-हरियाणा-राजस्थान (उत्तर-पश्चिम) इत्यादिभ्यः प्रदेशेभ्यः प्रवाहिता सती समुद्रं(प्रभासक्षेत्रे) मिलितवती।[२१] अस्याः स्थितिः यमुना-शुतुद्रि इत्यनयोः नद्योः मध्ये[२२] परन्तु दृषद्वत्याः (चितांग) पश्चिमदिशायां[२३] उत्पत्तिस्थलमिति ज्ञायते। अस्य उत्पत्तिः दैवीक्रमेण अभवद् इत्यपि ज्ञायते।[२४] ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु पुराणेषु च अस्याः उद्भवस्थानं "प्लक्ष-प्रास्रवणम्" इति सूचितम्।[२५] विश्वेश्वररेडमहोदयानुसारम् ऋग्वेदे सरस्वतीसम्बन्धिनां मन्त्राणां सङ्ख्या पञ्चत्रिंशतः अधिकाः येषु मन्त्रेषु स्तुतित्रयमधिकं माहात्म्यं द्योतयति।[२६] विभिन्नेषु मन्त्रेषु प्राप्तासु वर्णनासु सरस्वत्याः अपरिमितयः जलराशयः, सर्वदा परिवर्तनशीलाः प्रचण्डाः वेगान्विताः वारिधाराः भयङ्करगर्जनं तेभ्यः उत्पन्ना सम्भाविताऽऽशङ्का इत्यादयः

आलोचिताः। एषा भयङ्करी स्वोत्तालतरङ्गैः पर्वतशिखरान् चूर्णीकरोति स्म। “इयं शुष्मेभिः विसखा इव अरुजत् सानु गिरीणां तविषेभिः उर्मिभिः।”[२७] “यस्या अनन्तो अह्नुतस्त्वेषश्चरिष्णुवः। अमरश्चरति रोरुवत्।”[२८] प्लावनसमये एषा विस्तृता भवति स्म। “आपप्रुषी पार्थिवानी उरु रजः अन्तरीक्षम्।”[२९] एषा न केवलं प्रचण्डा वेगशालिनी अपि च सर्वापेक्षया अधिकजलधारिणी आसित्। “प्र आ महिम्ना महिनासु चेकिते द्युम्नेभिः अन्याः अपसां अप्सतमा।”[३०] स्वकूलानि विदीर्य बहुधा विभज्यते बृहन्नदीरूपेणापि प्राप्यते।[३१] तासु च सरित्यु सरस्वती एव प्रस्रविणीरूपेणाख्यांयते।[३२] अस्यां सप्तनदीनां स्म। “सरस्वती घोरा हिरण्यवर्तिनिः वृत्रघ्नी।”[३३] सरस्वती-सरयू-सिन्धवः इति नदीत्रयस्योल्लेखः सम्मिलनमपि सुस्पष्टं भवति। अतः एषा सप्तधातुः “त्रिषधस्था सप्तधातुः पञ्चजाता”[३४] “सप्तस्वसा उतः न प्रिया प्रियासु सप्तस्वसा सुजुष्टा”[३५] वा इति नाम्ना ज्ञायते। अनया सदैव कल्याणमेव क्रियते स्म। “भद्रं इत भद्रा कृणवत् सरस्वती।”[३६] अस्याः जलानि सदा पूतानि एव याभिः सर्वाणि पवित्राणि भवन्ति स्म। पूषवद् एषाऽपि पोषकान्नदात्री आसीत्। “रदा पूषेव इव नः सनिम्।”[३७] सखीभ्यः अपेक्षा एषा सरस्वती अधिकं धनधान्यप्रदायिनी आसीत्। “राया युजा चित् उत्तरा सखीभ्यः”[३८] जनाः धनलाभाय मातुः सरस्वत्याः आराधनां कुर्वन्ति स्म। “सरस्वत्यभि नो नेषि वश्यो”[३९] “एषा धनस्य मे स्फातिया दधातु सरस्वती।”[४०] “आ मे धनं सरस्वती पयस्फाति च धान्यम्”।[४१] वृत्रस्य संहारः सरस्वत्याः तटेऽभवत् अतः अस्याः अपरं नाम वृत्रघ्नी इति।[४२] यज्ञाग्रेः प्रज्वलनमपि सर्वप्रथमं सरस्वत्याः तटे एव अभवत्। सरस्वत्याः तटतः यज्ञाग्रेः क्रमशः विस्तारः भवति स्म। परिणामतः सरस्वत्या सह दृषद्वती अपाया इयनयोः तटयोरपि यज्ञसम्पादनस्य चर्चा शुभसम्पादिता अभवत्। “दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदाग्ने दिदीहि।”[४३] सरस्वत्या महत्स्तुतिगायनस्य कृते रहस्यम्--“बृहदु गायिषे वचोऽसूर्या नदीनां”[४४] इत्यपि श्रूयते। ते ऋषय अपि स्तुतिगायनं तेषां पूर्वजतः शिक्षितवन्तः।[४५] मैकडोनेलमतानुसारेण ज्ञायते सूर्यवंशीयानां प्राचीनवासभूमिः सरस्वतीतटे (सारस्वतप्रदेशः) आसीत्। विभिन्नैः कारणैः सरस्वत्याः प्रवाहः बहुधा विभाजितः भूत्वा ऋग्वैदिककालतः क्षीणः अभवत्--पूर्वमेव अस्याः धार्मिकाध्यात्मिकमहत्त्वयोः प्रतिफलनं तथा च ततः आधिभौतिकमाहात्म्यस्य हानिः अभवत्। लाट्यायनश्रौतसूत्रानुसारेण सरस्वती पश्चिमाभिमुखी भूत्वा प्रवाहिता भवति स्म। तस्याः उत्सस्थलम् अन्तिमस्थानं च दृश्यतेऽस्माभिः परन्तु मध्यभागः पृथिव्यां अन्तर्निहितः सोऽस्माकं दृष्ठेः अगोचर इति। “सरस्वती नाम नदी प्रत्येकस्रोता प्रवहति, तस्याः प्रागपरभागौ सर्वलोकप्रत्यक्षौ मध्यमभागः भूम्यन्त निमग्नः प्रवहति, नासौ केनचिद् दृश्यते तद्विनशनमुच्यते।”[४६] सरस्वत्याः मरुभूमौ समाहितकालस्य सम्बन्धे काणेमहोदयस्य मतं यत् ब्राह्मणग्रन्थानां काल एव इति, पुनः “ऐतरेय ब्राह्मण के कालं में अथवा उसके बहुत पहले सरस्वती सुख चुकी थी”[४७] इत्यपि मिलति। मनोः काले सरस्वतीदृषद्वत्योः मध्यप्रदेशः ब्रह्मावर्त-नाम्नाऽख्यायते स्म। “सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिमितं देशं ब्रह्मवर्तं विदुर्बुधाः॥”[४८] पुण्यसलिलायाः सरस्वयोः कृते ऋग्वेदे न तु केवलं “नदीतमे’ इति विशेषणं प्रयुक्तम् उत ‘देवीतमे’ इत्यपि प्रयुक्तम्। वेदः प्रतीकपरकः रूपकसंसिक्तः च। अतः रूपकधर्मान्विते वेदे सरस्वती नदी आध्यात्मिकप्रतीकरूपेण प्रयुक्ता इत्यपि स्वीक्रियते

विद्वद्भिः। यतः हि "दुर्बोधा वैदिकाः शब्दाः प्रकीर्णत्वाच्च तेऽखिलाः"। "वेदों में नदी या बहने वाली धारा के रूपक को सचेतन सत्ता के प्रवाह का प्रतीकात्मक वर्णन करने के लिए प्रयुक्त किया गया है"[४९] अत्र सरस्वती अन्तःप्रेरणायाः नदी या सत्यचेतनातः बहिर्गच्छति प्रवहति वा। सरः इत्यस्य ज्ञानार्थे परमात्मनः प्रतीकः।[५०] सरस्वत्याः स्वरूपनिर्णये ऋषिणा मधुच्छन्दसा साक्षात्कृतं मन्त्रत्रयम् अप्रतिमम्। "पावका नः सरस्वती वाजेभिर्वाजिनीवती। / यज्ञं वष्टु धियावसुः॥"[५१] "चोदयित्री सुनृतानां चेतन्ती सुमतीनाम्। / यज्ञं दधे सरस्वती।"[५२] महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति"[५३]। अत्र मन्त्रेषु यज्ञे आवाहनाय प्रयुक्ताः शब्दाः महतः अर्थान् धारयन्ति। सुमतेः आनयनकारिणी सुनृतानां प्रेरयत्री सुज्ञानप्रदायिनी एषा महर्षिभिः बहुधां व्याख्यायते। "पावका नः सरस्वती" "महो अर्णः सरस्वती" इत्यस्य मन्त्रद्वयस्य व्याख्यानकाले सायणाचार्येण सरस्वती माध्यमिकवाग्रूपेण स्वीक्रियते। तत्र चन्द्रमणिविद्यालङ्कारमहोदयः 'माध्यमिकवाक्' इत्यस्यार्थः 'वेदवाणी' इति मन्यते।[५४] सम्प्रति सरस्वत्याः मान्यता वाग्देवीरूपेण अस्माकं सकाशे दृष्टिगोचरा भवति। परन्तु ऋग्वेदे वाक्सूक्ते[५५] वाक् सर्वशक्तिमयी देवीरूपेण प्रस्फुटिता। सरस्वत्याः तु स्वतन्त्ररूपेण स्वरूपं दीयते। सूर्यकान्तमहोदयस्यानुसारं "माध्यामिका वाक् वाग्देवी के मानवीकरण का आरम्भबिन्दु कही जा सकती है।"[५६] वाग् इत्यस्य विषये निघण्टुकारस्य यास्कस्य मतेन तु वाग् अन्तरीक्षस्थानीया देवता, वाग् अत्र माध्यमिका वाग् इति नाम्ना ज्ञायते। "तस्मान्माध्यमिकां वाचं मन्यन्ते।"[५७] ऋग्वेदेषु प्राप्तेषु सूक्तेषु ज्ञायते यत् सरस्वती अन्तःप्रेरणायाः वाण्याः देवीति। यथा-"सरस्वती साधयन्ती धियः नः"[५८] अर्थात् सरस्वती अस्माकं प्रज्ञायाः निष्पादिका। "पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात्। ग्राभिरच्छिद्रं मजोषा दुराधर्षं गृणते शर्म यंसत्"[५९] अस्मात् मन्त्रात् ज्ञायते सर्वान् या पूतयति, या कामनायाः योग्या, या विद्वज्जनेभ्यः आयुः प्रददाति, तथा समृद्धं कारयति, वीराणां कृते या च सहायिका सा सरस्वती अस्मासु मुत्रुद्धिं धारयेत् इति प्रार्थना सूच्यते। "शं सरस्वती सह धीभिरस्तु"[६०] इत्यनेन उत्तमज्ञानानां धारयित्र्याः अन्तःप्रेरणास्वरूपायाः सरस्वत्याः सुखास्पदं रूपं याच्यते। "सुयमा सरस्वती"[६१] इत्यत्र सुनियमानां नियन्त्रिकारूपेण "धरणमायसी पूः"[६२] इत्यत्र च सद्विवेकिनी एषा वाणी लौहनिर्मितदुर्गसदृशी भूत्वा अस्मान् रक्षेत् इति प्रार्थना ततः "सरस्वती सह धीभिः पुरन्ध्या"[६३] धात्र्याः पोषकायाः प्रज्ञावत्याः सरस्वत्याः कृते वचनश्रवणरूपा प्रार्थना ध्वन्यते। सरस्वत्याः वाणीदेवतारूपं स्पष्टयितुम् प्रतिष्ठापयितुं यजुर्वेदतः अथर्ववेदतः च प्राप्ताः मन्त्राः लक्षणीयाः। यथा-"सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि।"[६४] अर्थात् अत्र वाचः नियमनकारिणी सरस्वती एव सूचिता। ततः "सरस्वत्या वाचमुप ह्वयामहे मनोयुजा"[६५] इत्यत्रापि उत्कृष्टायाः मनःसंयुक्तायाः सरस्वत्याः वाणीरूपीदेवीमाहात्म्यं प्रकटितमिति। ऋग्वेदे सरस्वत्याः नदीरूपेणोल्लेखः यथा अन्यनदीभिः सह अभवत् तथा देवतारूपेणापि इडा-भारती-होत्रा-वरुत्री-धिषणा-दक्षिणेत्यादिभिः देवताभिः सह अभवत्। एतास्वपि इडाभारतीभ्यां सह सरस्वत्या अधिकमाहात्म्यं दृश्यते। "आ नो यज्ञं भारती तूयमेतु इला मनुष्वदिह चेतयन्ती। / तिस्रो देवीर्बर्हिरिदं स्योनं सरस्वती स्वपशः सदन्तु॥"[६६] अस्य मन्त्रस्य भाष्ये महर्षिः दयानन्दः भारतयरूपेण प्रतिभायुक्तवाणी इडारूपेण वेदवाणी तथा सरस्वतीरूपेण विद्यादेवी इति अर्थत्रयं स्वीकरोति।[६७]

अन्यत्रापि एतासामुल्लेखाः समन्वितत्वेन प्राप्यन्ते। “सरस्वती साधयन्ति धियन्न इला देवी भारती विश्वतूर्त्तिः / तिस्रो देवीः स्वधया बर्हिरिसच्छिद्रं पान्तु शरणं निषद्य॥”[६८] “आ भारती भारतीभिः सजोषा इला देवैर्मनुष्येभिरग्निः। / सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीबर्हिदं सदन्तु॥[६९] “भारती पवमानस्य सरस्वतीला मही। / इमं नो यज्ञभागमन्तिस्रो देवी सुपेशसः॥”[७०] इत्यादयः मन्त्राः उल्लेखयोग्याः। अनन्तरम् “ईला सरस्वती मही तिस्रो देवीर्मयाभुवः। बर्हिः सीदन्त्वस्रिधः॥”[७१] अस्य मन्त्रस्य व्याख्यायां मही सायणमतेन भारतीति। दयानन्दाचार्यः ‘इडा’ इत्यस्यार्थे पठनाय प्रेरणादात्रीं सूचयति उत ‘सरस्वती’ इत्यस्यार्थे उपदेशरूपज्ञानस्य प्रकाशयित्रीं तथा ‘मही‘ इत्यस्यार्थे सर्वप्रशंसनीयां महद्‌गुणयुक्तां सूचयतीति। महर्षेः अरविन्दस्य मतं यदि सरस्वत्याः आध्यात्मिकव्याख्या भवितुमर्हति तर्हि अन्यासामपि तद्वत् स्यात्। अतः तेन सत्यचेतनायाः पञ्च शक्तयः स्वीकृताः। तत्र सरस्वती अन्तःप्रेरणाया वाणी, भारती तादृशी महती वाणी या सर्वाणि वस्तूनि दिव्यस्रोतसः दिव्यस्रोतसः अस्माकं कृते नयति, इडा च सत्यस्य आदिवाणी या अस्मभ्यं सक्रियदर्शनं प्रददाति। इला भारती सरस्वती इत्यासां परस्परं सहयोगिभावः दरीदृश्यते। शौनकाचार्येण[७२] एतासां कृते “त्रिविधवाक्” इति प्रयुक्ता। इडा अग्निसम्पर्कान्विता, सरस्वती मध्यस्थाना ऐन्द्री भारती द्युलोकाश्रिता च मन्यते। नदीत्रयाणां समन्वितमाह्वानं दृश्यते। “तिस्रो देवीबर्हिरेदं सदन्त्विडा सरस्वती भारती”[७३] सायणेन उक्तम्-“तिस्रः देव्योऽग्निमूर्तय”। सायणवद् महीधरयास्काचार्यादयः देवीत्रयम् अग्रेः आदित्यस्य वा रूपं मन्यन्ते। कालान्तरे एतासाम् ऐक्यस्थापनाय प्रयत्नः दृश्यते। “तिस्रः सरस्वतीरदुः”।[७४] पौराणिकसाहित्येषु सरस्वती भारती अभिन्नरूपेणैव प्रतिभाता। केषुचित् मन्त्रेषु अस्या उल्लेखः पुरुषदेवताभिः सह प्राप्यते। यथा ऋभुगणैः[७५] सह विश्वदेवैः[७६] सह, इन्द्रेण सह उत अग्निना[७७] सह वा प्राप्यते मरुद्भिः सह अस्या उल्लेखः बहुषु मन्त्रेषु उपलभ्यते। “सरस्वती मरुतो मादयन्ताम्”[७८] एवंरूपेण सरस्वती ‘मरुत्वती’ ‘मरुत्सखा’ इत्यादिभिः नामभिः ज्ञायते स्म। “सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून्।”[७९] सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम्।[८०] इतोऽपि यागादिषु यथा सौत्रामणीयागे तथा रक्षार्थं वेदे सरस्वत्याः वर्णनानि विभिन्नेषु मन्त्रेषु प्राप्यन्तेऽस्माभिः। एवंरूपेण वेदेषु नदीरूपिण्याः देवतारूपिण्याः च मातुः सरस्वत्याः स्वरूपं अस्माकं सकाशे प्रकटयतीत्यलम्।

सन्दर्भग्रन्थसूची

१। प्रसाद, कृष्णनारायण, वाग्देवी सरस्वती, राका प्रकाशन, ४०-ए, मोतीलाल नेहरु रोड, ईलाहाबाद-२।

२। रवाँ, मुहम्मद इसराइल, संस्कृत-साहित्य में सरस्वती की कतिपय झाँकियाँ, क्रीसेण्ट पब्लिशिंग हाउस, एफ/डी-५६, न्यू कविनगर, गाजियाबाद, भारत, दिल्ली-११० ०३२.

तथ्यसूत्रः

१। सरस्वतीरहस्योपनिषद, पृ. २०।

२। शतपथब्राह्मणम् १४.५.४.१०

३। ऋग्वेदः २.४१.१६

४। निरुक्तम्-२/३/२३

५। ऋक् १/३/१२

६। निघण्टु १/१३

७। निघण्डु १/११

८। निरुक्त १/३/२४

९। वाग्देवी सरस्वती पृ. ३

१०। ऋग्वेदः १०/७४/५, ६

११। वैदिक इन्डेक्स-, २, पृ. ४८१

१२। मनुस्मृतिः १/२१

१३। उणादि ४/१/८९

१४। वेदों के राजनैतिक सिद्धान्त, पृ. ४८४

१५। वाग्देवी सरस्वती, आक्षिप्तकी, पृ. ३

१६। ऋक् ७/९५/२

१७। (ऋग्वेदः ४/३३/६, ५/५६/९)

१८। वाग्देवी सरस्वती, आक्षिप्तकी, पृ. ४

१९। वाग्देवी सरस्वती, आक्षिप्तकी, पृ. ४

२०। वैदिक सरस्वती शोध अभियान की रिपोर्ट, अर्गानाइजर, फेरवरी, १९८६, लुप्त सरस्वती नदी शोध, संक्षिप्त वृत्तान्त

२१। ऋक् ७/९४/२

२२। ऋक् १०/७५/५

२३। ऋक् ७/९४/२

२४। ऋक् ७/९६/१

२५। वाग्देवी सरस्वती, आक्षिप्तकी, पृ. ५

२६। ऋक् ६/६१, ७/९४, ७/९६

२७। ऋक् ६/६१/८

२८। ऋक् ६/६१/८

२९। ऋक् ६/६१/१३

३०। ऋक् ६/६१/१३

३१। ऋक् १०/६४/९

३२। ऋक् ७/३६/६

३३। ऋक् ६/६१/२
३४। ऋक् ६/६१/१२
३५। ऋक् ६/६१/१०
३६। ऋक् ७/९६/३
३७। ऋक् ६/६१/६
३८। ऋक् ७/९४/४
३९। ऋक् ६/६१/१२
४०। अथर्व ११/४/३१/९
४१। अथर्व १९/३१/१०
४२। ऋक् ६ा/६१/७ (पूर्वपादटिप्पणी)
४३। ऋक् ३/२३/४
४४। ऋक् ७/९६/१
४५। ऋक् ६/६१/१०
४६। लाट्यायन, श्रोतसूत्रम्-१०/१५/१
४७। धर्मशास्त्र का इतिहास (३ खण्ड) पृ. १३०३, १३०४
४८। मनु-२/३, वामनपुराणम्-(स.म.- २/९)
४९। वेद-रहस्य पूर्वार्ध, पृ. १३५
५०। वेदों के राजनैतिक सिद्धान्त, प्र.ख. पृ. ४८४
५१। ऋक् १/३/१०, यजुः २०/८४
५२। ऋक् १/३/११, यजुः २०/८५
५३। ऋक् १/३/१२, यजुः २०/८५
५४। वाग्देवी सरस्वती पृ. २०
५५। ऋक् १०/१२५
५६ वैदिक देवशास्त्र पृ. ३२३
५७। निरुक्तम्-११/२७
५८। ऋक् २/३/८
५९। ऋक् ६/४९/७
६०। ऋक् ७/३५/११
६१। ऋक् ९/८१/४
६२। ऋक् ७/९५/१
६३। ऋक् १०/६५/१३
६४। यजुः ९/३०

६५। अथर्व. ५/१०/८
६६। ऋक् १०/११०/८
६७। वाग्देवी सरस्वती पृ. ५४ (पादटिप्पणी)
६८। ऋक् २/३/८
६९। ऋक् ३/१/८
७०। ऋक् ९/५/८
७१। ऋक् १/१३/९
७२। बृहद्देवता-३/१२-१४
७३। कृष्णयजु ४/४/१/८
७४। अथर्व ६/१०/१००१
७५। ऋक् ५/४२/१२
७६। ऋक् ७/३५/११
७७। ऋक् ८/३८/१०
७८। ऋक् ७/३९/५
७९। ऋक् २/३०/८
८०। ऋक् ७/९६/२

कर्तृत्वविचारः

स्वरूप सिंहेन

'डुकृञ् करणे' इत्यस्मात् उभयपदितनादिधातोः कर्तृवाच्ये 'ण्वुल्तृचौ'[१] इति सूत्रेण कर्तृवाचकतृच्प्रत्यये कृते कर्तृशब्दो निष्पन्नः। अस्यार्थो हि कार्यानुष्ठाता इति। व्युत्पत्तिदृष्ट्या कारक-कर्तृशब्दयोः समानार्थकत्वेऽपि पार्थक्यं तावत् सर्वेषां सुविदितमेव। समेषां कारकाणां निष्पादकत्वं सुप्रसिद्धम्।[२] तथापि 'प्राधान्येन व्यपदेशा भवन्ति' इति नियमेन कर्तुः सर्वकारकापेक्षया प्रधानता स्वीकृता वैयाकरणैः।

कर्तृस्वरूपं प्रतिपादयता पाणिनिना अष्टाध्याय्यां सूत्रितं--'स्वतन्त्रः कर्ता'[३] इति। अर्थात् क्रियासिद्धौ यः स्वतन्त्रः तस्यैव कर्तृत्वम्। तथाहि--'क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्'[४] इति दीक्षितः। उदाहरणं हि--'रामो गच्छति', 'रामेण गम्यते' इति। अभयत्रैव गमनक्रियासम्पादने रामस्य स्वतन्त्ररूपेणैव प्रवृत्तिः। अतः 'राम' इति कर्ता। वस्तुतः प्रथमोदाहरणे कर्ता रामः अभिहितः, द्वितीये तु अनभिहितः इति।

महाभाष्यकारेण महर्षिणा पतञ्जलिना कर्तृसंज्ञाविधायक--सूत्रस्य व्याख्यानावसरे स्वतन्त्रपदस्य व्याख्या सम्यक्कृता। तन्त्रशब्दः तन्धातोः ष्ट्रन्-प्रत्ययेन जायते। शब्दस्यास्य साधारणोऽर्थो भवति तन्तुवायः, अतः तस्यैव कर्तृसंज्ञा नान्यस्य। परन्तु तन्त्रशब्दस्य अन्यार्थोऽपि विद्यते। तद्धि-विस्तारः, प्रधानत्वम् इत्यादि महाभाष्यकारमते तन्त्रशब्दो प्रधानवाची। तद्यथा--

'अयं तन्त्रशब्दः अस्त्येव विताने वर्तते। तद्यथा आस्तीर्णं तन्त्रम्, प्रोतं तन्त्रमिति। वितानमिति गम्यते। अस्ति प्राधान्ये वर्तते। तद्यथा स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते। स्वप्रधान इति गम्यते। तद्यः प्रधाने वर्तते तन्त्रशब्दः तस्येयेदं ग्रहणम्'[५] इति। एतेन व्युत्पत्तिर्भवति तन्त्रशब्दस्य--स्व आत्मा तन्त्रं प्रधानं यस्य इति। तथाहि कैयटः--'स्वशब्दः आत्मवाची स्व आत्मा तन्त्रं प्रधानं यस्य स्वतन्त्र उच्यते'[६] इति। 'कारके'[७] इत्यस्याधिकारकत्वादेवात्र प्रधानत्वं स्वतन्त्रशब्दस्यार्थः। वस्तुतः क्रियासिद्धिः नैकेषां कारकाणां संयुक्तप्रयासेनैव सम्भवति। परन्तु तत्र यस्य स्वतत्रत्वं प्रधानत्वं वा तस्यैव कर्तृत्वमिति।

कस्यापि व्यापारस्य स्वतन्त्रता मुख्यतः विवक्षाधीना एव। कारणं प्रायः सर्वेषां कारकाणां स्वातन्त्र्ये विवक्षिते सति कर्तृत्वमुपपद्यते। पतञ्जलिना तु 'कारके'[८] इत्यस्य व्याख्यानावसरे स्थालीपुलाकन्यायानुसारं करणाधिकरणयोः कर्तृत्वं प्रदर्श्यते। कात्यायनस्य प्रमाण्यानुसारं पतञ्जलिः प्राह प्राकक्रिया नाम अधिश्रयणम्, उदकसेचनं, तण्डुलावपनम्, एधोऽपकर्षणम् इत्यादयः। अतो देवदत्तः पचतीत्यत्र देवदत्त एव चुल्यां जलं ददाति, जले तण्डुलावपनं करोति, मध्ये मध्ये दर्व्या विघट्टयति, पुनः यदा पाकः सम्पन्नः तदा चुल्लीतः स्थालीं

नीचैः स्थापयतीति। अत्र सर्वेषां अवान्तरक्रियाणां समष्टिरेव पाकक्रिया।[९] तत्र सर्वासु क्रियासु देवदत्त एव स्वतन्त्रो नाम प्रधानः। तं विहाय अन्यक्रियोत्पत्तिर्न सम्भवेत्। अतः तस्यैव प्रधानत्वात् कर्तृत्वमिति।

पुनः द्रोणं पचति, आढकं पचतीत्यादौ तत्तत्परिमाणेन युक्तानां तण्डुलानां ग्रहणं तथा धारणं बोध्यते। वस्तुतः रन्धनपात्रं (स्थाली) एव तत्तत्परिमाणास्य ग्रहणं तथा धारणं कृत्वा पाकक्रियां सम्पादयति। अतोऽस्यामवस्थायां सामान्यतया अधिकरणोद्दिष्टस्य रन्धनपात्रस्यैव कर्तृसंज्ञा जायते। तस्मात् 'स्थाली पचति' इति वाक्यं सिद्धम्।

एवं करणस्यापि कर्तृत्वं दृष्टम्। यथा एधाः पछन्ति इति। अत्र पाकक्रियाया अर्थो हि आ विक्लित्तेः ज्वलनम्। यद्यपि मुख्यपाकक्रियायां काष्ठानां करणत्वम्, तथापि विवक्षा भवति चेत् कर्तृत्वम्।

कर्मणः कर्तृत्वं स्वयं पाणिनिनैव निरूपितं--'कर्मवत् कर्मणा तुल्यक्रियः'[१०] इति सूत्रे। अनेन पाकक्रियायाः सुसाध्यता अर्थात् 'पच्यते ओदनः स्वयमेव' इति प्रयोगः प्रधान--कर्तृव्यापारस्यानुपस्थितौ भवति। एवं छेदनक्रियासिद्धौ उद्यमननिपतनस्य कर्ता देवदत्तादयः एव। यथा-देवदत्तश्छिनत्ति इति। पुनः 'परशुश्छिनत्ति' तथा छिद्यते काष्ठं स्वयमेव इत्यादौ करणस्य विवक्षावशादेव कर्तृसंज्ञा सिद्धा।

अपादान-सम्प्रदानयोः कर्तृत्वविवक्षायाः तथा प्रसिद्धिर्नास्ति। तथापि महाभाष्यकारेण अन्ततो गत्वा कारकाणां स्वातन्त्र्यं तथा पारतन्त्र्यं विवक्षितमिति प्रतिपादितम्।

'सर्वत्रैवात्र स्वातन्त्र्यं पारतन्त्र्यञ्च विवक्षितम्।...तद्यथा वलाहकाद् विद्योतते, वलाहके विघोतते। वलाहको विघोतते इति।''[११]

अत्र उदाहरणत्रयस्य विवक्षितमर्थभेदं प्रदर्शयति कैयटाचार्यः--

''निःसरणाङ्गे विघोतने द्युतिर्वर्तते पृथग्भावश्च विवक्षित इत्यपादानत्वम्। वलाइक इति। स्थित्यङ्गे द्योतनेऽत्र द्युतिर्वर्तते। वलाहके स्थित्वा ज्योतीरूपा विद्युत् विद्योतते इत्यर्थः। वलाहक इति। विद्युतो वलाहकस्य चाभेदविवक्षायामयं प्रयोगः।''[१२] इति। वस्तुतः अपादान-सम्प्रदानयोः कर्तृत्वविवक्षा तथा न भवति। 'ग्रामादागच्छति' इत्यस्य 'ग्राम आगच्छति' इति तथा 'ब्राह्मणाय ददाति' इत्यस्य 'ब्राह्मणो ददाति' इति विवक्षा न भवति। क्रियते चेत् सम्पूर्णभिन्नार्थस्य बोधो भवति। अत्र कैयटेन महाभाष्यप्रदीपे उक्तं--

''स्वव्यापारानुष्ठानमन्तरेण प्रधानक्रियायामुपयोगाभावात्।... शब्दशक्तिस्वाभाव्याच्चापादानसम्प्रदानव्यापारे धातुर्न वर्तत'' इति।[१३]

अतः क्रियासिद्धौ कर्मकरणादीनां स्वातन्त्र्ये विवक्षिते कर्तृत्वं क्वचित् सम्भवेत्। परन्तु प्रधानकर्तुः विद्यमाने सति अन्येषां कारकाणामप्रधानत्वमेव। यथा--'रामः स्थाली पचति' इति अशुद्धमेव। तथाहि पतञ्जलिः-- ''सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति''[१४] इति। वाक्यपदीयस्य टीकाकारः हेलाराजमहोदयोऽपि तृतीये काण्डे प्राह--''करणादीनां तु कर्तृविनियोगादेव स्वव्यापारे स्वातन्त्रयम्'' इति। एवं पतञ्जलिनापि दृष्टान्तमुखेनोच्यते--''एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा। तद्यथा अमात्यादीनां राज्ञा सह समवाये पारतन्त्र्यं व्यवाये स्वातन्त्र्यम्''[१५] इति।

भर्तृहरिणा कर्तुः स्वातन्त्र्ये अनेकाः युक्तयः उपन्यस्ताः। तद्यथा--कर्त्रा सर्वकारकापेक्षया पूर्वमेव शक्तिर्लभ्यते। कर्ता अन्यानि कारकाणि न्यग्भावयति। अन्येषां कारकाणाञ्च प्रवृत्तिनिवृत्ती कारकाधीने भवतः। कर्तुः कोऽपि प्रतिनिधिर्न भवति, एषां कारकाणाञ्च प्रतिनिधयो भवन्ति, सत्यामावश्यकतायां तेषां स्थाने प्रतिनिधयः उपस्थाप्यन्ते। एवञ्च, अन्यैरपि कारणैः कर्तुः अन्यकारकापेक्षया स्वातन्त्र्यं प्रतिपादितम्। उक्तञ्च--

"प्रागन्यतः शक्तिलाभात् न्यग्भावापादानादपि।
तदधीनं प्रवृत्तित्वात्, प्रवृत्तानां निवर्तनात्।
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्।
आरादप्युपकारित्वे, स्वातन्त्र्यं कर्तुरिष्यते॥" इति।[१६]

तस्मादन्येषां कारकाणां कर्त्राधीनप्रवृत्तिनिवृत्तिकत्वेन स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वरूपस्वातन्त्र्यस्वीकारे नातिव्याप्तिः।

प्रयोज्यस्य कर्तृत्वम्:--क्रियासिद्धौ यः स्वतन्त्ररूपेण विवक्षितो भवति तस्यैव कर्तृत्वं सिध्यति। अस्मिन्नेवावसरे भाष्यकारेण पतञ्जलिना काचन शङ्का उत्थाप्यते--वस्तुतः स्वतन्त्रस्य कर्तृत्वे प्रयोज्यव्यक्तेः अकर्तृत्वापत्तिः,स्वतन्त्रताभावात्। कारणं प्रयोज्यः प्रयोजकस्याधीने कर्म करोति। यथा--पाचयति ओदनं देवदत्तः सूपकारेण। अत्र देवदत्तः प्रयोजकः, सूपकारः प्रयोज्यः। पाचयतीति क्रियासिद्धौ देवदत्ताधीने एव सूपकारः। अतः सूपकारस्य (प्रयोज्यस्य) अप्रधानता इति। अत्र केचन वदन्ति प्रयोज्यस्य कर्तृसंज्ञासिद्धौ उपसंख्यानं कर्तव्यम्--'स्वतन्त्रःकर्ताः', "प्रयोज्यश्चेत्युपसंख्यानम्' इति। परन्तु एतन्न सत्यम्। प्रयोज्योऽपि स्वतन्त्रः। यदि प्रयोज्यः स्वतन्त्रः न स्यात्तर्हि अन्यकारकाणां विनियोगद्वारा क्रियासिद्धिर्न सम्भवति। अपि च प्रयोज्यद्वारा क्रियासिद्धिर्न-अस्यां स्थितौ 'प्रयोजकः कारयति' एवंप्रयोगापत्तिः।[१७] फलरूपेण 'कारयति' इति प्रयोगः प्रयोज्यस्य कार्यसम्पादनादनन्तरमेव भवति, येन तस्य स्वतन्त्रत्वं अक्षुण्णमेव। एतेनैतत्तु वक्तुं शक्यते यत् यदा प्रयोज्यः कर्म सम्पादयति तदा तस्य स्वतन्त्रत्वम्, यदा च कर्म न साधयति तदा तस्य परतन्त्रत्वम्। अतः प्रयोजकस्य सन्निधाने स्थित्वापि प्रयोज्यः स्वार्थसाधनं करोति तथा कर्मसम्पादनात् स्वतन्त्रोऽपि। कैयटेन सन्दर्भेऽस्मिन् भाष्यकारवचनमेव प्रमाणरूपेणोपस्थापयति--

"न हि कश्चित्परोऽनुग्रहीतव्य इति प्रवर्तते,
सर्व इमे स्वभूत्यर्थे यतन्ते"[१८] इति।

स्वतन्त्रस्य तथास्वतन्त्रस्य निश्चयः प्रयोज्यपुरुषेण क्रियां तथाक्रियां दृष्ट्वैव कृतः। कार्यं करोति चेत् स्वतन्त्रः, न करोति चेत् अस्वतन्त्रः इति। अस्यां स्थितौ 'कारयति' इति प्रयोगः भवितुमर्हति, न त्वन्यत्र। परन्तु पतञ्जलिना अन्ततो गत्वा निर्णयः दीयते यत् प्रेषितपुरुषः कार्यमकृत्वापि स्वतन्त्रः भवितुमर्हति, तथा 'कारयति' इति प्रयोगोऽपि भवेत्।[१९] वस्तुतः प्रयोजको यदा कमपि प्रेषयति तदा स हेतुमान् अर्थात्

प्रेषणादिव्यापारसाधनात् 'कारयति' इति प्रयोगं कृतवान्। प्रयोगोऽयं प्रयोज्यस्य सम्पूर्णं स्वेच्छाधीनम्। अतः स स्वतन्त्रस्तथा कर्ता एव।

प्रयोज्यस्य कर्तृत्वस्वीकारे स्वयं पाणिनिनैव संकेतितम्। तथाहि सूत्रितम्--"तत्प्रयोजको हेतुश्च"[२०] इति। अस्यार्थो हि--कर्तुः नाम स्वतन्त्रकर्तुः प्रयोजको यो भवति तस्य हेतुसंज्ञा तथा कर्तृसंज्ञापि भवति। सूत्रेणानेन प्रयोजकस्य, कर्तृत्वं तथा हेतुत्वं स्वीक्रियते। प्रयोजकस्तथा प्रयोज्यः परस्परं स्वापेक्षवाची शब्दः। प्रयोजकः यं, कर्मणि प्रेरयति स प्रयोज्यः। वस्तुतः सूत्रेऽस्मिन् 'तत्पदेन पूर्वसूत्रस्य स्वतन्त्रकर्तुरिव परामर्शः। तेन स्वतन्त्रकर्तुः प्रयोजकस्य हेतुसंज्ञा तथा कर्तृसंज्ञा विधीयते। एतेन वक्तुं शक्यते यद्यत्र यः प्रयोज्य स तु स्वतन्त्रकार्ता एव। तदर्थमनेन सह सम्बन्धादेव प्रयोजकस्य हेतुकर्ता इति संज्ञा वैयाकरणपरम्परायां दृश्यते।

इतःपरं पतञ्जलिना प्रयोज्यस्य स्वतन्त्रतस्वीकारे आक्षेपः क्रियते--"स्वतन्त्रत्वात् सिद्धमिति चेत् स्वतन्त्रपरतन्त्रत्वं विप्रतिसिद्धम्"[२१] इति। अस्य समाधानं वार्तिककारेण दीयते। तन्मतें प्रयोज्यः स्वतन्त्रां न भवति चेत् स क्रियां साधयितुं न समर्थः। तेन कार्यम् अकुर्वत्यपि 'कारयति' इति प्रयोगापत्तिः। तथाहि--

"न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि
कारयतीति स्यात्" इति।[२२]

वस्तुतः स्वतन्त्रकर्तुः प्रयोजकस्य हेतुसंज्ञा भवति। अतः हेतुस्थितप्रेषणादिव्यापारे द्योत्ये एव 'हेतुमति च'[२३] इत्यनेन णिचः प्रयोगः। एतेन सिध्यति यत् प्रयोज्यत्वसत्वेऽपि तस्य स्वतन्त्रत्वम् अक्षुण्णमेव।

अस्य द्वितीयं समाधानं हि--'हेतुमति च'[२४] इति सूत्रे 'आख्यानात्कृतस्तदाचष्टे' इति वार्तिकस्याक्षेपं कृत्वा स्वयं कात्यायनेन कथितं यत् 'कंसं घातयति' इत्यत्र णिचः प्रयोगः 'हेतुमति च' इत्यनेनैव सिध्यति, वार्तिकस्य आवश्यकता नास्ति। वास्तविकक्षेत्रे कंसवधस्य हेतुकर्ता भवति इन्द्र एव। तथाहि--'इन्द्रः कृष्णेन कंसं घांतयति' इत्यत्र प्रस्तुतसूत्रेणैव णिच् भवति। परन्तु तथ्यमिदं केनचित् नटेन अभिनयद्वारा रङ्गमञ्चे यदा प्रकाशयति तदा णिचः प्रयोगे वार्तिकस्य प्रयोजनं, 'कंसं घातयति' इति प्रयोगसिद्धये। तदनन्तरं कात्यायनेन कथितं यत् अभिनयात्मकं कंसवधं प्रति वास्तविकस्य कंसवधस्य आरोपः क्रियते चेत् उभयोर्मध्ये पार्थक्याम् एकेनैव 'हेतुमति च' इति सूत्रेण णिच् सम्भवेत्। समानं तथ्यं प्राप्यते तावत् शब्दकौस्तुभे--

"कंसं घातयतीति तावदारोपः। ये हि कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायाः ते कंसानुकारिणं नटं सामाजिकैः कंसबुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयतीव। ... तथा च स्पष्ट आरोपः"। इति। एवं प्रतिपाद्य अन्ते तावदुक्तं यत्--स्वतन्त्रस्य यः प्रयोजकः तस्य हेतुसंज्ञा तदैव भवति यदा प्रयोज्यस्य स्वतन्त्रता सिद्धा स्यात्। तथाहि--

"न वा सामान्यकृतत्वाद् हेतुतो ह्यविशिष्टम्।
तथा स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेत्
मुक्तसंशयेन तुल्यम्"[२५] इति।

अतः इन्द्रस्य हेतुकर्तृत्वं तदैव सिध्येत् तदा प्रयोज्ये कृष्णे स्वातन्त्र्यं स्यात्। अस्यारोपो भवति अभिनयेऽपि। एवं यथा अत्र अभेददर्शनं भवति तथैव प्रयोज्यकर्तुः तथा प्रयोजककर्तुः समानता अस्ति। 'यज्ञदत्तः देवदत्तेन कारयति' तथा 'देवदत्तः करोति' इति उभयत्रैव देवदत्तस्य समानस्वातन्त्र्यं विद्यते।

कर्तुः स्वतन्त्रताविषये इतः पूर्वं यदालोचितं तस्योपयोगः चेतनपदार्थेनैव कर्तुं शक्यते, न तु अचेतनपदार्थेन[२६] परन्तु 'रथो गच्छति, नदी वहति, अग्निर्दहति, स्थाली पचति' इत्यादौ उदाहरणे अचेतनपदार्था अपि कर्म कुर्वन्ति। एतेषाम् अचेतन पदार्थानां कर्तृत्वस्वीकारे भर्तृहरिणा कारिकैका उदाहृता--

> "धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि।
> कर्तुर्धर्मविवक्षायां शब्दात् कर्ता प्रतीयते॥" इति।[२७]

वस्तुतः कर्तुः स्वतन्त्रताविषये 'प्रागन्यतः शक्तिलाभात्--'इत्यादिकं यदुल्लिखितं तत्तु शब्दविषयस्यैव। तत्तद्वैशिष्ट्यं शब्दस्य स्यात् चेत्तस्य कर्तृत्वं सिद्धं स्यात्। तत्र वास्तविकी सत्यता अस्तु मास्तु वा। एतेनैव अचेतनपदार्थानामपि कर्तृत्वं सिध्यति। उपर्युक्तकारिकायाः व्याख्याने हेलाराजेनोक्तं--

"शब्देन यस्यैते धर्माः प्रत्याय्यन्ते स कर्ता बोधव्यः, न तु वस्तुविषयतया धर्माणामेषां सम्भवोऽन्वेषणीयः, येनाचेतनविषये 'अग्निर्दहति, एधाः पचन्ति, स्थाली पचति' इत्यादौ, 'कूलं पचति, नदी वहति' इत्यादौ च कर्तृत्वं न स्यात्। एते हि धर्मा यदा कर्तृलक्षणाय विवक्ष्यन्ते, शब्देन च यथाविवक्षं प्रत्याय्यन्ते, तदा शब्दात् कर्ता सुप्रतिष्ठितलक्षणः प्रतीयत इति करणमिव कर्तापि वैवक्षिकः प्रतिपादितः। एवं च कृत्वाचेतनेषूपचरितमपि न भवति कर्तृत्वम्, सर्वत्रास्खलद्वृत्तित्वात् प्रयोगस्य मुख्यतासम्भवात्।" इति।

करणादीनां कारकारणां वैवक्षिकं यत् कर्तृत्वं तत् प्रायः अचेतनपदार्थेष्वेव भवति। वस्तुतः मुख्यरूपतया स एव कर्ता यो हि शब्दतः अथवा प्रकारद्वये एव तद्धर्मं धारयतीति। तथाहि--'देवदत्तः पचति' इति।

नव्यन्याये कर्तृत्वविचारः

वैयाकरणानां प्रायः सर्वेषु मतवादेषु नैयायिकानां समालोचना तथा स्वमन्तव्यादिकं सुप्रसिद्धम्। यद्यपि मुनित्रयाणां तथा भर्तृहरेः कर्तृत्वविचारः व्यापकतरस्तथापि अभिनवशब्दावलीप्रयोगद्वारा अदृष्टपूर्वरीत्या कर्तृत्वविचारः नव्यन्यायग्रन्थादिषु तथा तत्प्रभावितव्याकरणग्रन्थादिष्वपि परिलक्ष्यते।

प्राचीननव्यन्याययोः सन्धिक्षणे नैयायिकसम्प्रदाये कर्तुः एतल्लक्षणं प्रसिद्धमासीत्--'कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षा--प्रयत्नाधारत्वम्'[२८] इति। अर्थात् कर्मकरणादिकारकैः अप्रयोजितो भूत्वापि योऽन्यान् कारकान् स्वयं प्रयोजयति स एव कर्तेति। पुनः ज्ञानेच्छाप्रयत्नानामाधारोऽपि कर्ता भवति। लक्षणेऽस्मिन् भागद्वयं वर्तते। प्रथमे कर्तुस्तथा कारकान्तराणां सम्बन्धं निर्धारयति, द्वितीये कर्तुः स्वरूपनिष्ठविशेषं निरूपयति।

लक्षणस्यास्य प्रथमो भागः व्याकरणदर्शने मुस्यतः पतञ्जलेस्तथा भर्तृहरेः विचारस्य संक्षिप्तं रूपम्। तद्धि-

सर्वे कर्मणि विद्यमानः सन् कर्ता स्वतन्त्रत पूर्वकं प्रवर्तयिता भवति। एवं कारकचक्रग्रन्थेऽपि भवानन्देन प्रायः समानमेवोक्तम्।[२१] अत्र पूर्वपक्षिरूपेण केचनोक्तवन्तः यत्--'कारकान्तरप्रयोजकत्वमिति कर्तृत्वलक्षणे सति अतिव्याप्तिदोषः आपतेत्। 'देवदत्तः कुठारेण वृक्षं छिनत्ति' इयत्र कुठारेऽपि कर्तृत्वापत्तिः। वस्तुतः कुठारभिन्नं वृक्षरूपं कर्मकारकम्। अतः छेदनात्मककार्यस्य अनुकूलः यो वृक्षकुठारसंयोगव्यापारः, तं कुठार एव प्रयोजयति। तेन कुठारस्य कर्तृत्वेऽतिव्याप्तिदोषः जायते। तदर्थमेव कर्तृत्वलक्षणे 'कारकान्तराप्रयोज्यत्वे सति' इति विशेषणं दीयते। अत्र भवानन्दाचार्येण आपत्तिः क्रियते यत्--यावन्तः संसारिप्राणिनः कर्तृरूपेण विवक्षिताः, तत्र ईश्वर एव विविधकर्मणि प्रयोजयति। अतः उपर्युक्ते उदाहरणे देवदत्तोऽपि ईश्वररूपकारकान्तरेण प्रयोज्यः। तेन कर्तृत्वं, तत्र न सङ्गच्छते, कारणं कर्तृलक्षणे कारकान्तराप्रयोज्यत्वमिति विशेषणं प्राप्यते

एवं नागेशभट्टेनापि अस्य लक्षणांशस्य खण्डनं क्रियते। तत्र खण्डनप्रक्रिया तु भिन्ना एव। तन्मते वैयाकरणसम्प्रदाये करणाद्यचेनतपदार्थानामपि विवक्षावशात् मुख्यकर्तृसंज्ञा भवति। यदि कर्तुः उपर्युक्तलक्षणं स्वीक्रियते तर्हि स्थाली पचति, असिश्छिनत्ति इत्यादिषु स्थाली प्रभृतीनां कर्तृसंज्ञा न भवति। कारणं तेषाम् अचेतनत्वे तं कारकान्तरं प्रयोजयितुं न समर्थाः, परन्तु कारकान्तरेभ्यः (चैत्रादिमुख्यैः) प्रयोज्याः।[३०]

लक्षणस्य द्वितीयांशे ज्ञानेच्छाप्रयत्नाधारत्वं यदुक्तं तत्तु केवलं नव्यन्यायसम्मतं न, अपि तु समस्तदर्शनसम्प्रदायसम्मतं कर्तृलक्षणम्। धर्माराजाध्वरीन्द्रेण वेदान्तपरिभाषायां ब्रह्मणः जगज्जन्मादिकारणत्वरूपं तटस्थलक्षणं निरूपितम्। अत्र कारणं नाम कर्ता। प्रसङ्गेऽस्मिन् कर्तृत्वलक्षणं प्राप्यते वेदान्त--परिभाषयाम्--

''तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वम्'' इति।

एतेन प्रतिपाद्यं ब्रह्म एव ईश्वर इति कथ्यते। ज्ञानेच्छाकृतियुक्तस्य ईश्वरस्य सत्ता उपनिषदादिषु प्राप्यते।[३१] नव्यन्यायानुसारं ज्ञानादिच्छा तथा इच्छया कृतिरुत्पद्यते। तथाहि न्यायसिद्धान्तमुक्तावल्याः वृत्तौ--

''फलेच्छां प्रति फलज्ञानमात्रं कारणम्। सुखज्ञानेनैव
सुखेच्छा उत्पद्यते'' इति।[३२]

भवानन्दाचार्येण तु पूर्वोक्तविषयमाधारीकृत्य एव कर्तृलक्षणं कृतं कारकचक्रे--'अनुकूलकृतिमत्त्वं कर्तृत्वम्'' इति। अर्थात् क्रियानुकूलकृतिं धारयति यः स एव कर्ता। वस्तुतः पृथक् पृथक् क्रियायाः अनुकूलकृतिरपि पृथक् पृथक् भवति। तदनुसारं तत्तत्क्रियाणां कर्तृत्वमपि उपपद्यते। लक्षणस्यास्य समर्थने भवानन्देन कर्तृशब्दस्य निर्वचनं क्रियते--योगार्थत्वसाधने सति कृताकृतविभागाद्वारा कृ-धातोः यत्नार्थकत्वं सिध्यति। उदाहरणेन स्पष्टीक्रियते यत्--ओदनपाकेन सह यदि अविच्छेदतया द्विदलस्यापि पाको भवेत् तर्हि पाककर्ता कथयति यत्-'मया द्विदलस्य पाको न कृतः', परन्तु स ओदनपाकस्यैव कर्ता। अतः प्रयत्नो भवति चेत् कृतः, न भवति चेत् अकृतः इति विभागः क्रियते। एतेनैतत् सिध्यति यत् कृ-धातुः यत्नार्थकः। तृच्-प्रत्ययः आश्रयार्थकः। अतः कर्ता नाम यत्नाश्रयः इत। यत्नाश्रयत्वं केवलं चेतने एव विद्यते--तेन मुख्यकर्तृत्वं चेतने तथा काष्टाद्यचेतने गौणं वा लाक्षणिकं कर्तृत्वं स्वीक्रियते सम्पूर्णे न्यायशास्त्रे।

उपर्युक्तस्थितौ गतार्थत्वसिद्धये 'साध्यत्वात् अभिन्नविषयत्वम्' इति विशेषणं मूललक्षणे निवेशनार्थं

लक्षणकारः परामृशति। तेन यथा ओदनपाकः कृतिसाध्यो भवति, तद्वत् तेन सह सम्बद्धं द्विदलपाकोऽपि कृतिसाध्यो भवेत्। वस्तुतः पिष्टकभोजनकाले यथा भोजनकर्ता केवलं पिष्टकं न भुक्त्वा तत्सम्बद्धं तदन्तःस्थं द्विदल-नारिकेयगुडादिकमपि भुङ्क्ते तद्वत् एकमेव कृतिसाध्यत्वम् अन्यसम्बद्धपदार्थस्थ कृतिसाध्यत्वमुत्पादयति।

गदाधराचार्येणापि व्युत्पत्तिवादग्रन्थे चेतन-पदार्थानां मुख्यकर्तृत्वं तथा अचेतनपदार्थानां गौणकर्तृत्वं स्वीकृतम्। तथाहि--

''कर्तृत्वञ्च मुख्यं क्रियानुकूलकृतिरेव। एवं कर्तृपदमपि व्यापारदिमत्यचेतनादौ भाक्तमेव। अचेतनादौ स्वरसत कर्तृपदाप्रयोगात्' इति।

एवं तेन विभक्तिविषयकाणां तथा आख्यातविषयकाणाम् आनुषङ्किकप्रश्नानां समाधानं दीयते तथा अचेत्नस्यापि कर्तृत्वं विविच्यते। कृ-धातोः यत्नवाचकत्वात् प्रयत्नवान् पदार्थ एव कर्ता। तथापि काष्टाद्यचेतनपदार्थानां स्वतन्त्ररूपेण विवक्षां कृत्वा कर्तृत्वमुपपद्यते। स्वतन्त्रविषये गदाधराचार्येण किञ्चित् नुतनत्वं प्रतिपाद्यते। तथाहि--

'स्वतन्त्रत्वं च कारकान्तव्यापाराधीनव्यापारक्त्वे सति कारकत्वम्'' इत।[३३]

स्वतन्त्रत्वं तत्प्रकारव्यापारेण सह युक्तं कारकं यत् खलु अन्य-कारकाणां व्यापाराधीनं न।[२४] काष्ठादौ पुरुषव्यापाराधीन--क्रियानुकूलत्वं व्यापारत्वमस्ति, न तु अन्यव्यापराधीनक्रियानुकुलत्वम्। अतः काष्ठानां स्वतन्त्रता सिद्धैव।

जयकृष्णेन सारमञ्जरीग्रन्थे कर्तृलक्षणं दीयते--''क्रियानुकूलकृतिमत्त्वं कतृत्वम्', कर्तृपदस्य यत्नार्थकतृजन्तकृधातुव्युत्पन्नत्वात्। अतोऽन्यत्राचेतनादौ कर्तृत्वं भाक्तमिति''[३४] इति। एवं जगदीशाचार्येणाप्युक्तं सविकरणेन यद्धातुना उपस्थाप्यः यादृशार्थस्तदुत्तरतिङा स्वोपस्थाप्ययादृशार्थेऽनुभावयितुं शक्यः तद्धातुपस्थाप्यस्य तस्य तदेव कर्तृत्वं कारकमित्यर्थः। तथाहि--

''तिङा विकरणात्तस्य धातोरर्थस्तु यादृशः।
स्वार्थे यादृशि बोध्यस्तत् कर्तृत्वं तदिहोच्यते।।[३६] इति।

नव्यव्याकरणे कर्तृत्वविचारः--नव्यन्याये यथा

कृत्याश्रयमाश्रित्य कर्तृलक्षणं क्रियते तद्वत् नव्यव्याकरणे व्यापारमाश्रित्य एव तल्लक्षणं दृश्यते। भट्टोजिदोक्षित-कौण्डभट्ट-नागेशादय एवात्र समानं मतं पोषयन्ति। दीक्षितेन सिद्धान्तकारिकायां कर्तृविभक्तेः आश्रम एवार्थः इति स्वीकृत्य शब्दकौस्तुथे कथ्यते क्रियासाधने स्वतन्त्ररूपेण विवक्षितोऽर्थः कर्ता भवतीति। अत्र सवतन्त्र्यं किमिति पृच्छायामाह--'धातुपात्तव्यापाराश्रयत्वं स्वातन्त्र्यम्'[३७] इति। अर्थात् केनापि धातुना यस्य व्यापारस्य ग्रहण भवति, तस्य व्यापारस्य आश्रयत्वं स्वतन्त्रत्वमिति। वस्तुतः कर्तृलक्षणे कर्तुः विश्लेषणं न कृत्वा प्रायः नव्यवैयाकरणैः स्वतन्त्रपदस्य लक्षणं निर्धारितम्, येन स्वतन्त्ररूपकर्तृ--लक्षणस्य विश्लेषणे सति लक्ष्यलक्षणयोः व्याख्यानं भवेत्। दीक्षिताचार्येणान्यत्र पुनः स्वतन्त्रपदस्माशयः स्पष्टीक्रियते--

''प्रधानीभूतधावर्थत्वं प्रत्याश्रयत्वं स्वातन्त्र्यम्''[३८] इति।

वस्तुतः धातोः प्रधानर्थस्य आश्रयत्वं हि स्वतन्त्रत्वम्। दीक्षितमतेन अत्र धातोः प्रधानार्थे व्यापारत्वमेवाभिप्रेतम्। किञ्च, तेन सिद्धान्तकारिकायां व्यापारस्यैव प्रधानता स्वीकृता[३९]। अतएव धातोः प्रधानोऽर्थः यः तेनोपात्तः व्यापारः समान एव। अस्मिन् प्रसङ्गे भर्तृहरेः नाम्ना प्रसिद्धः एकः कारिकांश प्राप्यते दीक्षितस्य वैयाकरणभूषणे--

“धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते” इति।[४०]

भट्टोजिदीक्षितमते नैयायिकैर्यथा गौणमुख्यरूपाभ्यां कर्तृभेदं स्वीकृत्य ‘देवदत्तः पचति’ तथा ‘स्थाली पचति’ इत्यनयोर्मध्ये पार्थक्यं निरूप्यते तत्तु वस्तुतः नास्ति। तन्मते क्रियासम्पादने वक्तुः इच्छा एव प्रधानत्वाप्रधानत्वनिरूपणे नियामकः[४१]। अन्तपाकसमये विक्लित्तिरूपफलसम्पादनात् पूर्वं ये काष्ठस्थाल्यादयः व्यापाराः सन्ति तेषामपि विवक्षातः प्रधानत्वं स्वीकर्तुं शक्यते। तेनैव तेषां कर्तृत्वं सिध्यति।

‘प्रधानीभूतधात्वर्थाश्रयत्वं स्वातन्त्र्यम्’ इति दीक्षितमतोपरि शङ्का आपतेत्। ‘देवदत्तेनोदनः पच्यते’ इति कर्मवाच्यप्रयोगे कर्मणः प्रधानत्वे स्वीकृते वैयाकरणमते फलमुख्यविशेष्यकशाब्दबोधः स्वीकृतः। परन्तु लकारः साक्षात् कर्मणः अभिधानं करोति। तेन देवदत्ते वर्तमानः धात्वर्थव्यापारः कर्तृद्वारा व्याप्तो न भवति। अस्य दोषस्य निराकरणार्थं शब्दरत्नाकरः हरिदीक्षितः तथा नागेशभट्टः स्वातन्त्र्यपरिष्कारे ‘कर्तृप्रत्ययसमभिव्याहारे’ इति विशेषणं योजयति[४२]।

कौण्डभट्टोऽपि दीक्षितमतस्य मान्यतां स्वीकृत्य धातूपात्तव्यापारस्य आश्रयकतारमेव स्वतन्त्रस्तथा कर्तेति कथयति। तस्माद् यदा स्थात्याद्यचेतनपदार्थानां व्यापारोऽपि धातुना अभिहितो भवति, तदा तस्मिन्नपि कर्तृत्वशक्तेः प्राप्तिः भवति। अत्रापि ‘कर्तृप्रत्ययसमभिव्याहारे’ इति विशेषणस्य योगः कर्तव्यः। अत्र दीक्षितवत् कौण्डभट्टोऽपि मौनतामालम्वते परन्तु टकाकारैः तत्पक्षमाश्रित्य सर्वं परिष्कृतम्।[४३]

इतःपरम् अन्तिमे वैयाकरणभूषणे नव्यनैयायिकानां मतमनुघ खण्डनं क्रियते। किञ्च, कौण्डभट्टः तथा नागेशभट्टः उभयौ तावत् धात्वर्थविवेचनकाले कृतिरपि धात्वर्थः इति स्वीकृतवन्तौ। यदि कृरिपि तृतीयार्थः स्यात्तर्हि ‘रथेन गम्यते’ इति अचेतनरथादौ कृतेः व्यवस्था कथं भवेत्? नागेशेन कथ्यते यत् अत्राचेतनादौ लक्षणास्वीकारोऽपि अनुचितः। केवलं कृतिरपि कृ-धातोरर्थो न। कृतेरर्थः यत्नः। अत्र कृ-धातोरकर्मकापत्तिः आपतेत।

अत्र तावत् ज्ञातव्यं यत् केचन धात्वर्थसत्तां चेतनमात्रे एव स्वीकरोति। अचेतने कर्तृत्वव्यवस्था प्रकारद्वयेन भवति। प्रथमतः चेतनत्वस्यारोपेण, द्वितीयतः चेतननिष्ठक्रियायाः आरोपेण। अस्य विवेचनं यास्काचार्येण निरुक्ते तथा पतञ्जलिना महाभाष्ये कृतम्। नैयायिकैः अचेतनादौ गौणकर्तृत्वं स्वीकृतम्। परन्तु वैयाकरणानां तत्र गौणतास्वीकारे आवश्यकता नास्ति। कारणं तेषां मते धातूपात्तव्यापाराश्रयत्वं कर्तृत्वमिति। द्वितीयतः नैयायिकैः कृतेराश्रयरूपे कर्तृलक्षणं स्वीक्रियते। येन अचेतन--कर्तृत्वादौ लक्षणास्वीकारः आवश्यकः। कारणं कृतिर्नाम प्रयत्न, यत्तु चेतनादौ एवास्ति। पुनः व्यापारो नाम तत्तदवयवभूतक्रियासमष्टिः। येन क्रमानुसारमेकस्याः एव क्रियायाः उत्पत्तिर्घटते।[४४] नागेशभट्टेन लघुमञ्जूषायां कर्तृत्वशक्तेः विचारः स्वविस्तरं कृतः। तथाहि--

> "सा शक्तिश्च कर्तृप्रत्ययसमभिव्याहारे व्यापारतावच्छेदकसम्बन्धेन तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रये वर्तते" इति।[४५]

इतः परं पतञ्जले प्रामाण्यमनुसृत्य नागेशेनापि स्वतन्त्रलक्षणं परिष्कृतम्--

१) 'तद्धात्वर्थीयकारकचक्रप्रयोकृत्वं स्वातन्त्र्यम्'

२) 'स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं स्वातन्त्र्यम्, इति।[४६]

कर्तृभेदाः--कर्तुः भेदत्रयं स्वीकृतं कौण्डभट्टैः। शुद्धः, प्रयोजको हेतुः, कर्मकर्ता च। तद्यथा--रामो गच्छतीत्यत्र रामः शुद्धकर्ता, रामः पाचयतीत्यत्र रामः प्रयोजककर्ता, देवदत्तः यज्ञदत्तं गमयतीत्यत्र यज्ञदत्तादेः कर्मकर्तृत्वञ्च। यद्यपि तत्र यज्ञदत्तादीनां 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ'[४७] इति सूत्रेण कर्मसंज्ञा भवति, तया च संज्ञया कर्तृसंज्ञायाः बाधोऽपि भवति, किंतु णिच्प्रकृतिधात्वर्थव्यापाराश्रयत्वेन तस्य कर्तृत्वलक्षणाक्रान्तत्वात् यज्ञदत्तः कर्मकर्तेति व्यवहारः दुर्गसिंहेन कातन्त्रवृत्तौ कर्मकर्तुः लक्षणं क्षीयते--

'क्रियमाणान्तु यत्कर्म स्वयमेव प्रसिद्ध्यति।
सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदुः॥ इति।

वस्तुतस्तु मुख्यरूपेण कर्तुः द्वैविध्यमेव स्वीकृतं वैयाकरणैः। तत्र प्रथमः स्वतन्त्रः कर्ता, यः पाणिनिना स्वतन्त्रः कर्ता'[४८] इति सूत्रेण प्रतिपादितः। द्वितीयस्तु हेतुकर्ता यः 'तत्प्रयोजको हेतुश्च'[४९] इति सूत्रेण प्रतिपादितः। स्वीकृतश्चायं भेदः हरिनामामृतव्याकरणस्य वृत्तौ--

"यस्यैव व्यापारतया क्रिया विवक्ष्यते, तत् स्वतन्त्रम्, यच्च तस्यापि प्रेरकतया तत् प्रयोजकम्, तच्च कारकं कर्तृसंज्ञं स्यात्" इति।

प्रयोजकहेतुकर्तुः स्वरूपं प्रतिपादयता भर्तृहरिणोक्तं--

"प्रेषणाध्येषणे कुर्वन् तत्समर्थानिवाचरन्।
कर्तैव विहितां शास्त्रे, हेतुसंज्ञां प्रपद्यते॥" इति।[५०]

तत्र स्वतन्त्रकर्ता त्रिविधः-अभिहितोऽनभिहितः कर्मकर्ता च। तत्र प्रथमस्तावत्-देवदत्तः पचति, द्वितीयः-देवदत्तेन गम्यते, तृतीयस्तु तत्र भवति यत्र कर्मणः एव कर्तृत्वेन विवक्षा--यथा ओदनः पच्यते इत्यत्र ओदनः कर्मकर्ता। किञ्च, प्रयोजकहेतुकर्ता च द्विविधः। चेतनरूपः अचेतनरूपश्च[५१]। तद्यथा--'पाचयति ओदनः गोपेन कृष्णः, भिक्षा वासयति' इत्यादिक्रमेणेति शम्।

पादटीका

१। पा.सू. ३।१।१३७

२। 'करोतीति कारकमिति' कारकस्यान्वर्थसंज्ञकत्वात्-महाभाष्ये (१।४।२३)

३। पा. सू. १।४।५४।

४। वैयाकरणसिद्धान्तकौमुदी-कारकप्रकरणम्।

५। महाभाष्यम्-१।४।४५।

६। महाभाष्यप्रदीपः-१।४।४५

७। पा. सू. १।४।२३

८। तदेव।

९। क. गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपादिश्यते॥
वा. प. तृतीयकाण्डम्

ख. पूर्वापरीभूतं भावमाख्यदेनाचष्टे व्रजातिपचतीत्युप्रकम्--
प्रभृत्यपवर्गपर्यन्तम्--निरुक्तम्--१।१०

१०। पा. सू. ३।१।८७

११। महाभाष्यम्-१।४।२३।

१२। महाभाष्यप्रदीपः १।४।२३।

१३। तत्रैव

१४। महाभाष्यम्-१४।२३

१५। तत्रैव

१६। वाक्यपदीपस्य तृतीयकाण्डे साधनसमुद्देशे

१७। 'यदि प्रयोज्यस्य स्वातन्त्र्यं न स्यान्नैवासौ साधनान्तरविनियोगादिनां क्रियां कुर्यात्। तथा चाकुर्वत्यपि प्रयोज्ये प्रयोजकः कारयतीति व्यपदिश्यते--कैयटः, म. भा. प्र.

१८। महाभाष्यम्

१९। 'यदि न प्रेषितोऽसौ न करोति, स्वतन्त्रोऽसौ भवति'-म. भा. १।४।५४

२०। पा. सू. १।४।५५।

२१। तत्रैव।

२२। क. तत्रैव।

ख. 'तथा यो हि मन्यते, नासौ स्वतन्त्रः, अकुर्वत्यपि कारयतीत्येतत्स्यात्'--म. भा. १।४।५४।

२३। पा. सू. ३।१।२६

२४। तदेव।

२५। महाभाष्यम्-३।१।२६।

२६। "अचेतनेषु तर्हि एवंविधकर्मकलापाभावात् कर्तृता न प्राप्नोति-इत्याशंक्याह"--वाक्यपदीयस्य ३।७।१०९ संख्यकायां हेलाराजव्याख्यायाम्

२७। वाक्यपदीयम्--३।७।१०३।

२८। सर्वदर्शनसंग्रहे अक्षपाददर्शनम्।

२९। "यत्तु कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वम् इति। ... तदप्यसत्। ईश्वरप्रयोज्यमानां संसारिणां तत्तत्क्रियास्वकर्तृतापत्तेः"--कारकचक्रम्

३०। परमलघुमञ्जूषायां कारकप्रकरणे।

३१। ज्ञानसत्ता-'यः सर्वज्ञः सर्ववित्'-मुण्डकोपनिषद्-१।१।९

इच्छासत्ता-'सोऽकामयत बहु स्यां प्रजायेय' तैत्तिरीयोपनिषद २।६

कृतिसत्ता-'तन्मनोऽकुरुत'-वृहदारण्यकोपनिषद्-१।२।१

३२। क. न्यायसिद्धान्तमुक्तावल्याः (१४७ कारिकायाः) वृत्तौ।

ख. "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया॥" इति। या. कौ.

३३। व्युत्पत्तिवादः

३४। "क्रिया क्वापि न कर्तृविनाकृतेति कारकान्तराणां कर्तृसापेक्षत्वनियमः। कर्तुश्चापादानादिविनाकृताया अपि सम्बन्ध इति न कारकान्तरापेक्षानियमः" इति विभक्त्यर्थविचारः।

३५। सारमञ्जरी (कारकविचारः)

३६। शब्दशक्तिप्रकाशिका

३७। शब्दकौस्तुभः

३८। प्रौढमनोरमा

३९। 'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥"- भूषणकारिका।

४०। वस्तुतः कारिकांशोऽयं श्लोकावर्त्तिकस्य। अस्यापरांशः गुरुपदहालदारमहोदयेनोक्तं--'व्यापारे च प्रधानत्वात् स्वतन्त्र इति चोच्यते।' इति।

४१। तुलनीयः सिद्धान्तकौमुधाः 'क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्' इत्यंशेन सह।

४२। क. प्राधान्यञ्च कर्तृप्रत्ययसमथिव्याहारे धात्वर्थनिष्ठविशेषता--निरूपितानिरूपितप्रकारतानाश्रयधालर्थत्वम्'--शब्दरत्ने।

ख. 'कर्तृप्रत्यसमथिव्याहारे इत्यने 'पम्वस्तण्डुलो देवदत्तेन' इत्यादौ फलस्य विशेष्यत्वेऽपि देवदत्तस्य कर्तृत्वअसिद्धिः'--लघुमञ्जूषा।

४३। 'पक्वस्तण्डुलो देवदत्तेनेत्यत्र व्यापारस्य फलं प्रति विशेषणत्वाद् देवदत्तस्य कर्तृत्वानापत्तिरिति कर्तृप्रत्ययसमभिव्याहार इति"--वैयाकरणभूषणसारस्य दर्पणटीकायाम्।

४४। वाक्यपदीयस्य तृतीयकाण्डम्

४५। लघुमञ्जूषा

४६। तत्रैव

४७। पा. सू. १।४।५२

४८। पा. सू. १।४।५४

४९। पो. सू. १।४।५५

५०। वाक्यपदीये साधनसमुद्देशः

५१। व्याकरण दर्शनेर इतिहास।

सहायकग्रन्थावली

१। अष्टाध्यायीसूत्रपाठः--पाणिनिः, चौखम्बा संस्कृत सीरिज्, १९५०।

२। कारकचक्रम्--भवानन्दसिद्धान्तवागीशः, व्या. श्रीमन्माधवतर्कालङ्कारः, छात्रपुस्तकालयः, १९३७।

३। काशिकावृत्तिः-जयादित्यवामनौ, न्यासपदमञ्जरीसहिता, प्राच्यभारतीप्रकाशन्, १९३५-३६।

४। निरुक्तम्--यास्कप्रणीतम्, व्या. मेधाचैतन्यः, दक्षिणेश्वर आद्यापीठम्-द्वितीयसंस्करणम्-२००२।

५. परमलघुमञ्जुषा-नागोशभट्टः, व्या-लोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, प्रथमसंस्करणम्।

६। परमलधुमञ्जूषा, नागेशभय्टः, व्या-जयशङ्करलालत्रिपाठी, कृष्णदास अकादमी, वाराणसी, प्रथमसंस्करणम्।

७। पाणिनीयम्-प्रबोधचन्द्र लाहिडी हृषीकेशशास्त्री च, दि ढाका स्टुडेन्स् लाइब्रेरी, २००६।

८. प्रौढमनोरमा (अव्ययीभावान्तभागः)-भट्टोजिदीक्षितः, टीकाकाराः हरिदीक्षित-भैरवमिश्र-वैध्यनाथपण्डित-गोपालशास्त्रनेनेमहोदयाः, चौखम्बा संस्कृत संस्थान, वाराणसी, तृतीयविशेषसंस्करणम्।

९। लघुशब्देन्दुशेखरः (अव्ययीभावान्तः)-नागेशभट्टः, व्या-श्रीनित्यान्दपवैतीयः, चौखम्बा संस्कृत संस्थान, वाराणसी, दशमसंस्करणम्।

१०। वाक्यपदीयम्-भर्तृहरिः (ईराजाम्बाकर्तृव्याख्याद्वयोपेतम्), तृतीयकाण्डम्, द्वितीयभागः, सम्पा-पण्डितरघुनाथ-शर्मा, सम्पूर्णानन्द संस्कृत-विश्वविद्यालयः, वारणसी।

११। वैयाकरणभूषणसारः-कौण्डभट्टः, टीकाकाराः-बालकृष्णपञ्चोली-हरिवल्लभशास्त्रीमहोदयाः, चौखम्वा संस्कृतं संस्थान, तृतीयसंस्करणम्।

१२। वैयाकरणभूषणसारः (धात्वर्थनिर्णयान्तः), व्या. भीमसेन-शास्त्री, भैमीप्रकाशन्, द्वितीयसंस्करणम्, १९९२।

१३। वैयाकरणसिद्धान्तकौमुदी (१-४) भट्टोजिदीक्षितः, टीकाकारौ-वासुदेवदीक्षित-ज्ञानेन्द्रसरस्वतीमहोदयौ, मोतीलालवनारसीदास।

१४। वैयाकरणसिद्धान्तकौमुदी (कारकविभक्तिप्रकरणम्), व्या-अयोध्या-नाथ-सन्न्याल-शास्त्री, संस्कृत पुस्तक भाण्डार, कोलकाता, द्वितीयसंस्करणम्।

१५। व्याकरण दर्शनेर् इतिहास-गुरुपद हालदारः, संस्कृत वुक डिपो, कोलकाता, २००६।

१७। व्याकरणमहाभाष्यम्-पतञ्जलिः, टीकाकारौ कैयटनागेशौ, निर्णयशागर प्रेस, वम्वइ, १९५१

१८। युत्पत्तिवादः-गदाधरः, सम्पा.-सच्चिदानन्दमिश्रः, भारतीय विद्या प्रकाशन्।

१९। भूषणसार-लघुमञ्जूषयोः सिद्धान्तानां समीक्षा-रामपदोहरमिश्रः-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वारणसी।

२०। शब्दाकौस्तुभः--भट्टोजिदीक्षितः (द्वितीयभागः), सम्पादकौ--विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री च, राष्ट्रिय-संस्कृत-संस्थानम्, २००६।

२१। शब्दशक्तिप्रकाशिका--(कृष्णकान्ती-टीकोपेता)-जगदीशतर्कालङ्कारः, चौखम्बा संस्कृत संस्थान, वाराणसी।

२२। शाब्दबोधमीमांस (सुबर्थविचारात्मकद्वितीय भागः), --एन्. एस्. रामानुजताताचार्यः, राष्ट्रिय-संस्कृत-संस्थानम्।

२३। सर्वदर्शनसंग्रहः-वासुदेवशास्त्री अभ्यङ्करः, भाण्डारकर अरियेन्टाल रिसार्च इन्सटिटियुट्, पुणा, १९७८।

२४। सारमञ्जरी-(सारदीटीकोपेता)--कालिपदतर्काचार्यः, सम्पा-अशोककुमार-वन्धोपाध्यायः, सदेश, कोलकाता।

२५। संस्कृत व्याकरण मे कारकतत्त्वानुशीलन-उमाशङ्करशर्मा चौखम्बा सुरभारती प्रकाशन, प्रथमसंस्करणम्, १९९४।

CAUSAL RELATION IN INDIAN PHILOSOHY

Sampriti Biswas

India has a rich and diverse philosophical tradition dating back to the composition of the Upaniṣads in the later Vedic period. According to Radhakrishnan, the oldest of these constitute "... the earliest philosophical compositions of the world." Philosophy is the study of general and fundamental problems, such as those connected with reality, existence, knowledge, values, reason, and mind.

Since the late medieval age (ca.1000-1500) various schools of Indian philosophy ((Darshanas) are identified as orthodox (āstika) or non-orthodox (nāstika) depending on whether they regard the Veda as an infallible source of knowledge. There are six schools of orthodox Hindu philosophy and three heterodox schools. The orthodox are Nyāya, Vaiśeṣika, Sāṃkhya, Yoga, Pūrva Mīmāṃsā and Vedānta. The Heterodox are Jain, Buddhist and Materialist (Cārvāka).

There are so many controversies in Indian philosophical thought we can see. Controversy has varied from time to time. In this paper I want to highlight what is the relation between the cause and the effect. Does the cause contain the effect in its implicit form or is the effect a new thing altogether? What is the relation between creation and creator? There is a lot of answer can be given to these question from different point of view. Those who answer this question negatively are called Asatkāryavadins. While those are answering it in positive are called Satkāryavadins. In this matter Nyāya, Vaiśeṣika and Mimāṃsaka hold the view of Asatkāryavāda and Sāṃkhya philosopher are Satkāryavadins.

Philosophers of Nyāya, Vaiśeṣika and Mimāṃsaka think that effect doesn't pre-exist in its material cause but is a new creation, a real beginning. They explain that if pot is already exists in mud, then why should not the mud serve the purpose of pot? They think that before production and after destruction effect does not exist. This theory is technically known as prāgabhāva and praddhvasābhāva in Nyāya system.

A cause is defined as an unconditional and invariable consequent of a cause. .The same cause produces the same effect and the same effect is produced by the same cause. Plurality of causes is ruled out. The essential characteristics of a cause are its

1. Antecedence: the fact that it should precede the effect,
2. Invariability: it must invariably precede the effect and
3. Unconditionality

Antecedence is immediate and direct antecedence and excludes the fallacy or remote cause.

Thus, the Nyāya definition of a cause appears to be the same as that in western inductive logic. Hume defines a cause as an invariable antecedent. Carveth Read points out that unconditionally includes immediacy. A cause, therefore, is an unconditional, immediate and invariable antecedent of an effect. Nyāya recognizes five kinds of accidental antecedents which are not real causes,

1) The qualities of a cause are mere accidental antecedents. The colour of a potter's staff is not the cause of a pot.

2) The cause of a cause or a remote cause is not unconditional. The potter's father is not the cause of a pot.

3) The co-effect of a cause is they not causally related. The sound produced by the potter's staff is not the cause of a pot, though if may invariably precede the pot. Night and day are not causally related.

4) Unnecessary things like the potter's ass are not unconditional antecedents; though the potter's ass may be invariably present when the potter is making a pot, yet it is not the cause of the pot. A cause must be an unconditional and necessary antecedent. Nyāya emphasizes the sequence view of causality. Cause and effect are never simultaneous.

5) Plurality of causes is also wrong because causal relation is reciprocal. The same effect cannot be produced by the other cause. Each effect has its distinctive features and has only one specific cause.

Like Western logic, the Nyāya regards a cause as the sum-total of the conditions, positive and negative, taken together. The cause is an aggregate of the unconditional or necessary and in variable antecedent conditions which are called kāranasāmagrī. The absence of negative counteracting conditions is called pratibandhaka bhāva. An effect is defined as the counter-entity of its own prior non-existence. It is the negation of its own prior-negation. It comes into being and destroys its prior non-existence. It was non-existent before its production. It did not pre-exist in its cause. It is a fresh beginning, .a new creation.

Thus, Nyāya-Vaiśeṣika view of causation is directly opposed to the Sāṃkhya-Yoga and Vedānta view of Satkāryavāda. It is called Asatkāryavāda or Ārambhavāda. The effect is non-existent before its creation and is a new beginning (ārambha), a fresh creation, an epigenesist. It is distinct from its cause and can never be identical with it. It is neither an appearance nor a transformation of the cause. It is newly brought into existence by the operation of the cause. There are three kinds of causes - Samavāyi, Asamavāyi and Nimitta.

1. **Samavāyi or the Inherent cause:** It is the substance out of which the effect is produced. For example, the threads are the inherent cause of the cloth and the clay is the inherent cause of a pot. The effect inheres in its material cause. The cloth inheres in the threads. The effect cannot exist separately from its material cause, though the cause can exist independently of its effect. The material cause is always a substance, Upādāna or the material cause.

2. **Asamavāvi or Non-Inherent cause:** It inheres in the material cause and helps the production of the effect. The conjunction of the threads which inheres in the threads is the non-inherent cause of the cloth of which the threads are the material or the inherent cause. The colour of the threads is the non-inherent cause both co-inhere in the material cause. The non-inherent cause is always a quality or an action.

3. **Nimitta of efficient cause:** It is the power which helps the material cause is nimitta of efficient. It is the power which helps the material cause to produce the effect. The weaver is the efficient cause of the cloth. The efficient cause includes the accessories, e.g., the loom and shuttle of the weaver or the staff and wheel of the porter. The efficient cause may be a substance, a quality or an action.

Sometimes a distinction is made between a general or an ordinary and a peculiar or an extra ordinary cause.

Space, time, God's knowledge, God's will, merit, demerit, prior non-existence and absence of counteracting factors are the eight general causes.

The extraordinary cause is called the Karma or the instrumental cause and is included in the efficient cause. It is the motive power which immediately produces the effect, e.g., the staff of the potter. The modern Nyāya (Navya-Nyāya) regards the efficiency itself which inheres in this cause as the real instrumental cause.

The inherent cause, the non-inherent cause, the efficient cause and the purpose seem to correspond to Aristotle's material, formal efficient and final causes.

'Causes' or 'Kāranas' are divided into two categories by all: 'Nimitta' and 'Upādāna'. You need earth or clay as a material to make a pot. So earth is the Upādāna for the pot. But how does it become a pot? Does it become a pot by itself? It has to be shaped by a potter. So the potter is the cause- he is the nimitta.

In this paper I shall first very briefly refer to the classification of causal relation as found in the 'Abhidharmakoṣa' of Vasubandhu. Author used two different terms hetu as cause and pratyaya as effect. There are six types of hetu and four types of pratyaya. Six types of hetu first one are karana hetu. The definition of a karana-hetu reflects the attitude of the Abhidharma School toward the general notion of cause. In fact, to be a cause in this sense means to exist without being a 'hind- range' (vighna) to the production of the effect in question. Thus, if x is a dharma that originates then any dharma other than the 'own-being' svabhiva of it may be called its karana-hetu.

There is four type of Pratyaya. (1) Hetu-pratyaya, (2) Ālambana-pratyaya, (3) Samānantara-pratyaya, and (4) Adhipati-pratyaya. Of these, the first includes the 'remaining' five hetus in the foregoing classification while the last includes the 'prototype', that is, the karana-hetu. The second and the third are found useful only with regard to the states of consciousness. The ālambana is the 'causal basis', that is, the object, of a particular state of consciousness which is regarded as an effect or event. The samanantarà is the 'causal precedent' that is, the preceding moment of consciousness conditioning the succeeding moment. It should also be mentioned that in the remaining five hetus (a discussion of which I will skip here) of the six types mentioned earlier are included hetus like a sahabhu hetu, where two dharmas originating simultaneously are said to mutually condition each other. In the Vaiśeṣika system means to be its immediate (and 'unconditional') antecedent. The Vaiśeṣikas speak of a causal substrate or a 'substantial' cause (Samavāyi karana) which is the substance where the effect occurs (through the relation of inherence). Ordinarily, this is the material cause of an effect, even comparable to the 'material' cause in the fourfold division of Aristotle. But strictly speaking, this is a wider notion in the Vaiśeṣika system, since such 'nonmaterial' substances as the soul and the physical space are said to be causal substrates of suitable effects. For example, a state of consciousness as an event is said to occur in the soul (that is, the person) which is its causal substrate.

Satkarvavādins:

Sāṃkhya philosophers hold the view of Satkāryavāda. They established that the effect is real in cause. Effect is pre-existent in the cause. There is only an illusory change, not a material one when cause becomes effect. Prakṛti is an original cause of all things. Sāṃkhya philosophers fallow the parkṛti-parināmavāda. Nothing can really be created from or destroyed into nothingness - all evolution is simply the transformation of primal Nature from one form to another.

In this point of view Sāṃkhya philosophers produce a set of five arguments to establish Satkāryavāda in their text books.

1. If the effect does not pre-exist in its cause, then it is a mere non-entity like sky-flower and can never be produced. If the effect were a non entity before the operation of the cause, it could never be brought into existence by anybody. Yellow can never be made as blue even by the hard work of thousand of artist. The fact is that unreal never been produced.

2. Effect is only a manifestation of its material cause because it is invariably connected with it. Every material is not capable to produce all type of effect. In that case mud cannot produce cloth. So we can find there is a relation between cause and effect and that is effects are pre-existing at cause. As example cloud can produce rain, nothing other than that.

3. Everything cannot be produced out of everything. If the effect disconnected with the cause could be produced (by that cause), then every effect would arise from every cause. There is no restriction between cause and effect. In that case pot will be produced by thread. But such is not the case. Hence a connected effect only can be produced by a connected cause and not an unconnected effect by an unrelated one.

4. Only efficient cause can produce that for which it is potent. Production is only actualization of what is potential e.g. curd could be produced from milk and not water. Whatever we start out with determines the nature of what we wind up with - if one starts with clay one will wind up only with things that clay can make.

5. The effect is the essence of its material cause, and as such identical with it. The effect is not different from the cause; and the cause is an entity. The

effect is essentially identical with its material cause, and so it has many of its qualities (a pot is still clay, and thus consists of the primary attributes of clay). This last argument is utilized to determine the basic attributes of the imperceptible metaphysical causes of the empirical world: the substrate must have the same fundamental attributes and abilities as the manifest world.

The theory of Satkāryavāda means that the universe, with an infinite number of cosmic systems belonging to it, always exists in Prakṛti as its aspects. The evolution of a universe out of void has no meaning. Cause of all creation is Prakṛti. In this point of view Sāṃkhya philosophers described this evolution as fallowing way-



What is the really means and how far it is justified that's may be debatable. At the end of this paper we can summaries that the doctrine of Satkāryavāda affirms that the effect inheres in the cause in some way. The effect is thus either a real or apparent modification of the cause. The doctrine of Asatkāryavāda affirms that the effect does not in here in the cause, but is a new arising. In this way Indian philosophers have described the causal relation between cause and effects.

Bibliography

Bhartiya, Mahesh Chandra. '*Causation in Indian Philosophy: (with Special Reference to Nyāya-Vaiśeṣika)*'. Kolkata:Vimal Prakashan, 1973. Print.

Ganguly, Sarbani. '*A Critique of Causality: with special reference to Nyāya-Vaiśeṣika, Mimāṃsaka, and Buddhist theories*'. Kolkata: Sanskrit Book Depot, 2002. Print.

Kumar, Shiv: '*Sāṃkhya Thought in the Brahmanical Systems of Indian Philosophy*'. Delhi: Eastern Book Linkers, 1983. Print.

Larson, Gerald James, and Ram Shankar Bhattacharya, eds. '*Sāṃkhya: A Dualist Tradition in Indian Philosophy*'. Princeton: Princeton University Press, 1987. Print.

सप्तदशशतकीयो रघुदेवः तत्समकालिकाः नैयायिकाश्च

शुभाशिस-भट्टाचार्यः

भारतीयास्तिकदर्शनेषु न्यायस्य कस्मात् कालात् आरम्भो जातम्, तद्विषयजातं संशयान्वितम्। अर्थात् निर्दिष्टकालनिर्णये समस्या प्रकटिता। भिन्न-भिन्नसमयेषु भिन्न-भिन्ननैयायिकाः आविर्भूताः, अपि च ते स्वस्वकार्याणि प्रतिस्थापितवन्तः। यद्भवतु, भारतीयन्यायशास्त्रस्य प्राचीन-नव्यभेदेन विभागद्वयं पण्डितसमाजे तथा दार्शनिकसमाजे खलु सुविदितम्।

प्राचीनन्यायस्य उत्तराधिकारिरूपेण नव्यन्यायः खलु कदा आत्मप्रकाशितः, निश्चितरूपेण तस्मिन् विषये न निर्धारिते अपि प्रायशः खीष्टीय-चतुर्दशशतके मिथिलासु गङ्गेशोपाध्यायस्य आविर्भविण समं नव्यन्यायः स्वमहिम्ना निःसन्देहेन सुप्रतिष्ठितः। गङ्गेशेन *"तत्त्वचिन्तामणिः"*नामाभिनवग्रन्थम् अवलम्ब्य मैथिलगौडौ इति नव्यन्यायस्य द्विविधौ सम्प्रदायौ संघठितौ। अतः सन्दर्भेऽस्मिन् सप्तदशशतके ये ये नव्यनैयायिकाः आसन्, ते नैयायिकाश्चापि तेषां प्रणितानि प्रकाशितानि अप्रकाशितानि च यानि यानि पुस्तकानि सन्ति, तानि अवलम्ब्य मया केवलं संक्षेपेण परिचयप्रदातुं चेष्टितम्। एतेषु सप्तदशशतके नव्यनैयायिकरूपेण रघुदेवन्यायालङ्कारो भवति अन्यतमः। इतोऽपि अन्येषां नैयायिकानां परिचयः संक्षेपेण मया क्षीणबुद्ध्या वर्ण्यते।

■ रघुदेवन्यायालङ्कारः

भारतीयदर्शनशास्त्रेषु नव्यन्यायचर्चा अन्यतमप्रधानविषयीभूता। अस्य नव्यन्यायस्य परम्परा मिथिला गौडीयधारायामेव च प्रायः पञ्चाशतवत्सरं यावत् प्रवर्तिता। किन्तु *'खण्डनखण्डखाद्यम्'* इति ग्रथस्य प्रणेता महातार्किक-श्रीहर्षात् आरभ्य अद्यापि बहवः पण्डिताः अस्मात् बङ्गदेशात् काशीधामं गत्वा तेषां सारस्वतजीवनं अतिवाहिताः। एषु पण्डितेषु उल्लेखयोग्यनैयायिकाः खलु रघुदेव-न्यायालङ्कारभट्टाचार्य-महाभागाः।

रघुदेवस्य कालनिर्णयविषये गुरुशिष्यपरम्परैव प्रमाणीभूता। अतो प्रसिद्धछात्रस्य चिरञ्जीव-भट्टाचार्यस्य कालः प्रथमे निर्णयार्थम् ऐतिहासिक-तथ्यावली विशेषरूपेण उल्लेखयोग्या। तेषु १३०४ संवत् (१६४७ खीष्टीयाब्दः)। तत्कालीन गौडराजकृपारामस्य राजसभायां वाङ्गालिपण्डितः शतावधान-भट्टाचार्यः *'रामप्रकाश'* इति नाम स्मृतिग्रन्थ विरचितः। कृष्णदास-सार्वभौमः (१५७५ खीष्टियाब्दः) आसीत् शतावधानस्य गुरुः। तस्याध्यापक आसीत् प्रख्यात-नैयायिकः भवानन्द-सिद्धान्तवागीशः (१६२५ खीष्टीयाब्दः) परं सिद्धान्तवागीशोऽयं महाशय एव शिष्यं शतावधानं नीत्वा प्रायः १६०० खीष्टीयाब्दे काशीनगरम् जगाम। तेन सह अस्य शतावधानस्य पुत्र एवासीत् चिरञ्जीव-भट्टाचार्यः। रांजा कृपारामः १६४७ खीष्टीयाब्दस्य

समसामयिककाले मृतः। मुघलसम्राट-जाहाङ्गीर-शाहजाहानयोश्च समसामयिकः (१६०५-१७०० खीष्टीयाब्दः)। कृपारामोऽयं पुनः वङ्गस्य शासकः सुजा-उद्-दोल्लायाः नायेव देओयानः यशवन्तसिंह अस्य समसामयिक आसीत्। राघवेन्द्रः अथवा शतावधानपुत्रः चिरञ्जीव तस्य बहुभिः रचनया यशवन्तसिंह-सम्बन्धे श्लोकं रचितमिति। अर्थात् समयकारस्य चिरञ्जीव-भट्टाचार्यः तस्य एकाधिकग्रन्थस्यान्तिमे 'शिव' इति देवस्य स्तुतिं कृतवान्। यद् परोक्षभावेन पितरमेव स्मृतम्। चिरञ्जीवस्य *'काव्यविलासः'* इति ग्रन्थे एव तस्य गुरुरूपेण रघुदेवस्य नाम व्यक्तम्--"इमौ भट्टाचार्यप्रवररघुदेवस्य चरणौ..." इति। अर्थात् प्रकृतग्रन्थकारस्य रघुदेवस्य छात्ररूपेण चिरञ्जीव-भट्टाचार्यस्य परिचयः वयं प्राप्तवन्तः, तत्र तस्य समयः खीष्टीयः १६५० इत्यस्य समसामयिकः, गदाधर-भट्टाचार्यस्यापि समसामयिक आसीत्। पुनः रघुदेवः स्वयं परिष्कारभावेन तस्य आत्मपरिचयः यद्यपि न प्रकाशितवान् तथापि तस्य असंख्यरचनायाः बहुषु स्थलेषु गुरोर्नामोल्लेखः। स भवति तत्कालिनविख्यातनैयायिकः हरिरामतर्कवागीश इति रघुदेवस्य स्वकीयरचनया *'नञ्वादव्याख्या'* इत्यस्मिन् ग्रन्थे उक्तम्--

> शिवं प्रणम्य तत्पश्चात् तर्कवागीश्वरं गुरुम्।
> क्रियते रघुदेवेन नञ्वादे सुविवेचनम्॥ इति।

पुनश्च १६५७ खीष्टाब्दस्य कस्मिन्नेकनिर्णयपत्रे (चितेल्भट्ट-प्रकरण ७९ पृ.) रघुदेवस्य स्वाक्षरं प्राप्तम्। तथा तस्य *'अनुमितिपरामर्शवादः'* इति मातृकानुलिखनम् समयकालः १६७६ खीः इति मन्यते। अर्थात् सर्वस्मात् तथ्यात् इदमेव स्पष्टं यत्--रघुदेवः काशीनगर्यां सप्तदशशतकस्य मध्यभागे नैयायिकस्य प्रसिद्धपदवीं लब्धवान्। यत् तस्य निकटे समग्रभारतवर्षस्य पण्डितसमाजः आलाप-आलोचनायां रतमासीत्।

रघुदेवीयाः ग्रन्थाः

रघुदेवन्यायालंकारः न केवलमासीत् नैयायिकाः धर्मशास्त्र-अलंकारशास्त्रादिषु अपि तस्य अगाध-विचरणं परिलक्षितमस्ति। तस्य प्रायः चत्वारिंशदधिकस्य ग्रन्थस्य उल्लेखं प्राप्तम्, येषां प्रायः सर्वे एव अप्रकाशितरूपेण निबन्धम्। एतेषु ग्रन्थेषु तस्य स्वतन्त्रग्रन्थाः अधिकमस्ति, ते भवन्ति--

१. *अनुमितिपरामर्शविचारः*, २. *अवयवग्रन्थः*, ३. *आकाङ्क्षावादः*, ४. *ईश्वरवादः*, ५. *उपसर्गद्द्योतकत्वविचारः*, ६. *कारणवादार्थः*, ७. *कार्यकारणभावविचारः*, ८. *चित्ररूपवादः*, ९. *ज्ञानाद्वयवादः*, १०. *ज्ञानलक्षणविचारः*, ११. *तर्कविचारः*, १२. *दण्डकारणत्वविचारः*, १३. *दिनसंग्रहः*, १४. *द्रव्यसारसंग्रहः*, १५. *धर्मतावच्छेदकप्रत्यासत्तिनिरूपणम्*, १६. *नवीननिर्माणम्*, १७. *निश्चयत्वनिरुक्तिः*, १८. *निश्चयवादः*, १९. *पक्षता* , २०. *प्रतियोगिज्ञानकारणताविचारः*, २१. *मनोवादः*, २२. *लक्षणावादः*, २४. *लौकिकविषयतावादः*, २४. *विशिष्टवैशिष्ट्यबोधविचारः*, २५. *विषयतावादः*, २६. *सामग्रीवादः* इत्यादयः।

अपि च टीकाग्रन्थाः भवन्ति--

१. आख्यातवादटीका on रघुनाथ's *आख्यातवादः*, २. *कणादसूत्रव्याख्या*, ३. *तत्त्वचिन्तामणिव्याख्या*

(गुढार्थदीपिका) यद् *'रघुदेवी'*इति नाम्ना परिचीयते, ४. *नञ्वादटीका* ५. *निरुक्तिप्रकाशः*, ६. *न्यायकुसुमाञ्जलिकारिकाव्याख्या*, ७. *काव्यप्रकाशकारिकार्थप्रकाशिका*, ८. *पदार्थखण्डविवरणम्* on रघुनाथ's *पदार्थखण्डः* इत्यादयः ग्रन्थाः तेन विरचिताः।

उपर्युक्तेषु प्राप्तग्रन्थसमूहेषु क्वचित् क्वचित् क्षेत्रेषु सन्देहः जातः। कारणं कतिपयानि ग्रन्थाः सन्ति यानि खलु रघुदेवेन सह अन्येषां नामानि अपि प्राप्तानि। यथा--१. *विषयतावादः* (हरिराम-गदाधरेणकृतः), २. *मुक्तिवादः* (गदाधरकृतः), ३. *कुसुमाञ्जलिव्याख्या* (जयराम-न्यायपञ्चाननः) ४. *नञ्वादव्याख्या* (गदाधरकृतः) इत्यादयः। एतेषु सर्वापेक्षा अधिको वितर्कितग्रन्थः खलु वर्तमाने *'विषयतावादः'* इति। ग्रन्थोऽयं रघुदेव-हरिराम-गदाधरस्य च नाम्ना प्रचलितः।

रघुदेवकृतग्रन्थ-समूहेषु अधिकांशमेव मातृकारूपेण एव निबद्धास्ति तत्पूर्वमेवोक्तम्। साम्प्रतिककाले भारतवर्षस्य कतिपय-ग्रन्थकारगवेषकैश्च सम्पादनप्रकाशयोश्च कार्यमपि कृतम्। एषु ग्रन्थेषु *पक्षतावादः, आकाङ्क्षावादः, ईश्वरवादः, मुक्तिवादः, प्रागभावविचारः, द्रव्यसारसंग्रहः, कुसुमाञ्जलिकारिकाव्याख्या, अुनमितिपरामर्शविचारः* इत्यादयः।

अतः प्रसिद्ध-नैयायिकः गदाधरः यत् विख्यातमभवत्, किन्तु तस्य सतीर्थः रघुदेवः इदानीमपि कथं न सुपरिचितमभवत्, तत् नीत्वा एव सन्देहः मम मनसं वारं वारं पीडयति भावयति च।

सप्तदशशतके रघुदेवन्यायालंकारात् ऋते अपि अनेके ये ये प्रसिद्धाः नैयायिकाः सन्ति, ते भवन्ति--

■ जगदीशतर्कालंकार-भट्टाचार्यः

वङ्गप्रान्ते लब्धजन्मायं तार्किकाग्रगण्यो जगदीशभट्टाचार्यः सप्तदशशतकस्य प्रथमदशके एव भुवनमलञ्चकार। पण्डितोऽयं खलु विविधान् ग्रन्थान् विरच्य न्यायशास्त्रस्य ग्रन्थभाण्डारमवर्धयत्। न्यायाचार्यः जगदीशः बहूनां ग्रन्थानामुपरि टीकारचनां कृतवान्, अनुमानदीधितेः सुप्रसिद्धटीकामन्तरेण सर्वा *'जागदीशी'*-व्याख्या एव अधुना दुष्प्राप्या। अनेन विरचिताः ग्रन्थाः भवन्तीमे रघुनाथेन चिन्तामणि-ग्रन्थस्योपरि *'तत्त्वचिन्तामणि-दीधिति-प्रकाशिका'*, यश्च *'जागदीशी'*इति नाम्ना विद्वत्सु प्रसिद्धतां गतः। अपि च तेन मूलतत्त्वचिन्तामणेरुपरि चत्वारखण्डविशिष्टा एव *'मयूख'* इति नाम्ना टीका विरचिता। यथा--प्रत्यक्षमयूखादयः। एतेषु मयूखेषु *"अनुमानमयूखः"* इति ग्रन्थः माद्राजे मातृकाशालायामस्ति (R. 4029) अपि च Tanjore Catalogue, pp. 4607-8.

एतदतिरिक्ततया *प्रत्यक्षदीधितिटीका, अनुमानदीधितिटीका* (ग्रन्थोऽयं नव्यन्यायस्य खलु श्रेष्ठः इति दार्शनिकसमाजे विवेचितः)। अस्य टीकाग्रन्थस्यान्तिमे ग्रन्थकारेण जगदीशेनोक्तं यत्-

कुर्वन्ति नित्यमनुमानमणेरनेके प्रायः प्रयासमधिदीधितिनीतिभाजः।
एषा पुनस्तदपि नैव निजं निगूढं भावं प्रकाशयति तेन ममैष यत्नः॥ इति।

लीलावतीदीधितिटीका (Mitra's Notices, No. 1203), वैशेषिकभाष्योपरि टीका *द्रव्यसूक्ति, गुणसूक्ति,* च, *न्यायादर्शः* अथवा *न्यायसारवली, पदार्थतत्त्वनिर्णयः* अथवा *द्रव्यभाषटीका* नामकः ग्रन्थश्चायं विरचितवान्। इतोऽपि तार्किकप्रवरेणानेन *'तर्कामृत'* नाम न्यायवैशेषिकसम्प्रदायेषु जिज्ञासूनां प्रवेशक-ग्रन्थः, शब्दशक्तिविषयकः *'शब्दशक्तिप्रकाशिका'* (काश्याम् मातृकारूपेणास्ति) नाम व्याकरणविषयमवलब्य ग्रन्थश्च विरचितः। अस्मिन् *'शब्दशक्तिप्रकाशिका'*-विषये श्रुयते खल्वेषा सूक्तिः--"जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका" इति। अपि च तेन जगदीशतर्कालंकारेण *'आनन्दलहरी', 'भगवद्गीता', 'महिमस्तवः'* इत्यदेः ग्रन्थस्योपरि व्याख्याग्रन्थः रचितः।

प्राच्याध्यापकः तस्य जीवनस्य सर्वोत्तममर्यादा 'जगद्गुरु' इति उपाधिना भूषितः। अयञ्च दीधितिकृतो रघुनाथशिरोमणेः गुरोः वासुदेवसार्वभौमस्य भवानन्दसिद्धान्तवागीशस्य च शिष्य आसीत्।

■ रामभद्रसिद्धान्तवागीशभट्टाचार्यः

नैयायिकजगदीशतर्कालंकारस्य शिष्यरूपेण रामभद्रसिद्धान्तवागीशः सप्तदशशतकस्य प्रथमार्धे एव आविर्बभूव। तस्य ग्रन्थो भवति जगदीशतर्कालंकारस्य *'शब्दशक्तिप्रकाशिका'* इति ग्रन्थस्योपरि *'शब्दशक्तिप्रकाशिकाप्रबोधिनी'* अथवा *'सुबोधिनी'* इति नाम्ना विरचिता। अपि च उल्लेखनीय कतिपया ग्रन्था भवन्ति--१. *'न्यायरहस्य'* इति ग्रन्थोऽयं अक्षपादेन गौतमेन *'न्यायसूत्र'*स्योपरि रचितः (काशी, पुणा एशियाटिक-सोशाइटि च मध्ये मातृका रूपेणास्ति)। २. 'गुणरहस्य' इति प्रकरणरूपेण विवेचितम्। (Tanjore Catalogue, p. 4447)। ३. *'सिद्धान्तसारः'*।४. 'समासवादः'। (Mitra's Notices, No. 2252)। ५. *'शब्दनित्यतावादः'*। (काशी सरस्वती भवने अस्ति)। ६. 'सुवर्णतैजसत्ववादः'। (Asiatic Society, Kolkata. Fol. 9268)[१]। ७. *'पदार्थतत्त्वविवेचनप्रकाशः'* (Asiatic Society, Kolkata, Vol. III, G. 148)। ८. *'सिद्धान्तरहस्यः'*। ९. 'नञ्वादटीका'। १०. *'कुसुमाञ्जलिकारिकाव्याख्या'* इत्यादयः। एतद्विना रामभद्रेण प्रणीतं 'समयरहस्य' नाम एक स्मृतिनिबन्धः खलु प्राप्तः।

■ मथुरानाथतर्कवागीशः

सप्तदशशतकीय अपर एकः नव्यनैयायिकः खलु मथुरानाथतर्कवागीशः। अस्य प्रसिद्धेषु उल्लेखनीयाः ग्रन्था भवन्ति--१. *तत्त्वचिन्तामणिरहस्यम्,* २. *गुणदीधितिमाथुरी,* ३. *'बौद्धाधिकारदीधितिमाथुरी,* ४. *लीलावतीदीधितिमाथुरी,* ५. *आख्यातवादटीका,* ६. *द्रव्यप्रकाशटीका* इत्यादयः। तेन 'तत्त्वचिन्तामणे'रुपरि प्रसिद्धटीका खलु *'माथुरी'* इति नाम्ना अभिधीयते। प्रसंगतः उल्लेख्य यत्, नैयायिकस्यास्य विषये सर्वे किञ्चिदपि जानन्ति एव।

■ जयरामन्यायपञ्चाननभट्टाचार्यः

सप्तदशशतके भारतीयदर्शनाकाशे जयरामन्यायपञ्चाननो भवति अन्यतमः। तेन रचिताः ग्रन्थाः भवन्ति

यद् *न्यायस्योपरि*--१. रघुनाथशिरोमणेः *'दीधिति'*इति ग्रन्थस्योपरि *'तत्त्वचिन्तामणिदीधितिगुढार्थविद्योतन'* इति ग्रन्थः। २. जयदेवस्य *'आलोक'* इति ग्रन्थस्योपरि *'तत्त्वचिन्तामण्यालोकविवेक'* इति। ३. गौतमस्य न्यायसूत्रस्योपरि *'न्यायसिद्धान्तमाला'*इति टीका प्रणीता। अपि च *वैशेषिकदर्शनस्योपरि*- १. उदयनाचार्यस्य *'न्यायकुसुमाञ्जलि'*ग्रन्थस्य उपरि *'न्यायकुसुमाञ्जलिकारिकाव्याख्या'*इति टीका। २. *'पदार्थमणिमाला'*अथवा *'पदार्थमाला'* इति स्वतन्त्रग्रन्थः। अन्यत् च मम्मटस्य *'काव्यप्रकाश'*स्योपरि *'काव्यप्रकाशतिलक'* नाम दार्शनिकनिबन्धटीका प्रणीता।

जयरामन्यायपञ्चाननः आसीत् रामभद्रसार्वभौमस्य शिष्यः। यतः सः रामभद्रस्य शिष्य आसीत्, तदर्थम् जयरामपञ्चाननः आसीत् संवत् १७१६ अथवा १६५९ खीष्टाब्दे, कारणं *'पदार्थतत्त्वमाला'*इति मातृकायाम् (MS) वर्णितमस्ति। तदनुसारेण मया एतदुक्तम्।

■ गौरीकान्तसार्वभौमभट्टाचार्यः

वङ्गे न्यायदर्शने गौरीकान्तसार्वभौमभट्टाचार्यः भवति अपर एकः नैयायिकः। तेन *न्याददर्शनस्योपरि* रचितः ग्रन्थः यथा--१. केशवमिश्रस्य 'तर्कभाषा' इति ग्रन्थस्योपरि *'भावार्थदीपिका'* इति टीका। अन्यदेकः २. 'सद्युक्तिमुक्तावलि' इति टीका ग्रन्थः। अस्य ग्रन्थस्य मातृका न प्राप्ता।

अन्ये ग्रन्थाः खलु--३. शङ्कराचार्यस्य *'शक्ति'*-कवितायारुपरि *'आनन्दलहरीतरी'* इति टीका, ४. धर्मशास्त्रस्योपरि *'विदग्धमुखमण्डणविथिका'* इत्यादयः टीका प्रणीता। गौरीकान्तः उत्तरगौडस्य गौडीय-राढ इति वंशे जातः। स अवश्यमेव संवत् १७७१ अथवा १७१४ खीष्टाब्दे आविर्बभूव।

■ भवानन्दसिद्धान्तवागीशभट्टाचार्यः

सप्तदशशतकस्य प्रथमार्धे एव भवानन्दसिद्धान्तवागीश-भट्टाचार्य उल्लेखनीयः। प्राच्यार्योऽयं 'भवानन्दी' इति नाम्ना अपि प्रख्यातः। भवानन्देन रचितः ग्रन्थः यत्--१. जयदेवस्य *'आलोक'* इति ग्रन्थस्योपरि *'प्रत्यक्षालोकमञ्जरी'*इति टीका। २. गङ्गेशस्य *'तत्त्वचिन्तामणे'*उपरि *'तत्त्वचिन्तामणिटीका'*, व्याकरणविषयकः 'कारकाद्यर्थनिणर्यः' अथवा *'कारकार्थविवेचन'*, *'शब्दखण्डसारमञ्जरी'* इत्यादयः ग्रन्थाः।

■ रुद्रन्यायवाचस्पतिभट्टाचार्यः

मिथिलाधिपतिः विद्यानिवास-भट्टाचार्यस्य पुत्ररूपेण रुद्रन्यायवाचस्पतिः नव्यन्यायस्य असाधारणपण्डितोऽयमासीत्। एतेन नव्यनैयायिकेन न्यायशास्त्रमलंम्ब्य बहूनि प्रसिद्धानि स्वतन्त्रपुस्तकानि टीकाश्च विरचिताः। तत्प्रणीता टीका "रौद्री"[२] नाम्ना सुप्रसिद्धा। तस्य पुत्र तथा छात्रः खलु गोविन्द-भट्टाचार्यः। तेन *'पद्यमुक्तावली'* इति ग्रन्थसमापनकाले एवं पितृपरिचयः प्रदत्तः--"इति श्रीरुद्रन्यायवाचस्पतिभट्टाचार्यात्मज-श्रीगोविन्द-भट्टाचार्यविरचिता पद्यमुक्तावली समाप्ता"।

रुद्रन्यायवाचस्पतिप्रवरेण नैयायिकेन *न्यायदर्शनस्योपरि* ग्रन्था भवन्ति यत्-१. रघुनाथस्य *'दीधितेः'* उपरि *'तत्त्वचिन्तामणिदीधितिप्रकाशिका'* इति उपटीका। *अन्यत् वैशेषिकदर्शनस्योपरि* यत्-- २. रघुनाथस्य उपटीकायारुपरि *'किरणावलीप्रकाशवृत्तिपरीक्षा'* अथवा *'भावप्रकाशकः'* इति उप-उपटीका (sub-sub-comm.)। ३. *'पदार्थखण्डव्याख्या'*, ४. *'कुसुमाञ्जलिकारिकाव्याख्या'* (काश्यामस्ति), ५. *'लीलावतीप्रकाशटीका'* (काश्यामस्ति), ६. *'शब्दपरीक्षा'* (जम्मौ अस्ति) Stain's Cat., p. 144, p. 98. इत्यादयः टीका-ग्रन्थाः। स्वतन्त्रग्रन्थेषु उल्लेखनीयाः भवन्ति--१. *'शब्दपरिच्छेदः'* (A Descriptive Cat. Asiatic Society, Kolkata, G-1231, p. 258, Pune, Mss. No. 248)। २. *'वादपरिच्छेदः'* (Hall, index, p. 43)। ३. *'कारकपरिच्छेदः'* (Jammu, p. 135, p. 21, Tanjore, p. 44, 88-89)। ५. *'नियोज्यान्वयविवरणम्'* (Pune)[3] इत्यादयः। अपि च काव्यसाहित्ये तेन 'भावविलास', *'भ्रमरदूतम्', 'वृन्दावनविनोदकाव्यम्'* इत्यादीनि पुस्तकानि प्रणीतानि।

रुद्रन्यायवाचस्पतिः विद्यानिवासभट्टाचार्यस्य पुत्र आसीत्, तथा च विद्यावाचस्पतेः पौत्र आसीत्, तस्य अनुज आसीत् विश्वनाथ-न्यायपञ्चाननः। *'प्रत्यक्षमणिदीधितिव्याख्या'* इति मातृकानुसारेण रुद्रः संवत् १६७० अथवा १६१३ खीष्टाब्दे स अवश्यमेवासीत्।

■ विश्वनाथसिद्धान्तपञ्चाननभट्टाचार्यः

अयं खलु वङ्गदेशीय विद्वान् सप्तदशशतकीयः नैयायिकः। पण्डितेनानेन *न्यायदर्शनस्योपरि* ग्रन्थाः, यथा--१. अलंकारस्य स्वतन्त्रः ग्रन्थः *'अलंकारपरिस्कार'* इति। २. रघुनाथस्य टीकोपरि *'नञ्वादटीका'*। ३. अक्षपादगौतमस्य *'न्यायसूत्रो'*परि *'न्यायसूत्रवृत्तिः'* इत्यादयः।

अपि च *वैशेषिकदर्शनस्योपरि*- ४. *'न्यायतन्त्रबोधिनी'* अथवा *'न्यायबोधिनी'* ५. रघुनाथस्य *'पदार्थखण्ड'*स्योपरि 'पदार्थतत्त्वालोकः'। ६. *'भाषापरिच्छेदः'* इति ग्रन्थस्योपरि *'न्यायसिद्धान्तमुक्तावली'* अथवा *'सिद्धान्तमुक्तावली'* अथवा केवलं *'मुक्तावली'* इति नाम्ना टीका विरचिता। अपि च अन्यद् व्याकरणविषयकः ७. 'कारकचक्रं', छन्दःशास्त्रस्योपरि ८. *'पिङ्गलप्रकाश'* इत्यादयः ग्रन्थाः।

विश्वनाथन्यायपञ्चाननस्य पिता आसीत् विद्यानिवासभट्टाचार्यः, अपि च रुद्रनारायण-भट्टाचार्यस्य अनुज आसीत् 'विश्वनाथः' इति। स वृन्दावने शकाब्दः १५५६ अथवा १६३४ खीष्टाब्दे आविर्बभूव।

■ गोविन्दशर्माः

नवद्वीपाधिवासी न्यायाचार्यः महामहोपाध्यायः गोविन्दशर्मा (भट्टाचार्यः) सप्तदशशतके अपर एकः पण्डितप्रवरः आसीत्। तेन *न्यायदर्शनस्योपरि*-- रचितः ग्रन्थः-- १. *'न्यायसंक्षेपणः'* इति, व्याकरणविषयस्योपरि- २. *'समासवादः'* 'समासतत्त्व' वेति, वैशेषिकदर्शनस्योपरि- ३. रघुनाथस्य टीकायाः उपरि *'पदार्थखण्डनव्याख्या'* इत्यादयः ग्रन्थाः।

■ रघुनाथभट्टाचार्यः

रघुनाथभट्टाचार्यः खलु जगदीशन्यायालंकारस्य पुत्रः। अस्य ग्रन्थ भवति *‘तत्त्वचिन्तामणि-पक्षता-निगूढार्थः’* इति (University of Madras, p. 354)।

■ रामकृष्ण-अध्वरीः

नैयायिकोऽयं’ *‘वेदान्तपरिभाषा’*कारस्य धर्मराजध्वरीन्द्रस्य पुत्रः। एतेन प्रणीतः ग्रन्थः—१. *तत्त्वचिन्तामणिः* इति ग्रन्थस्य टीका *‘न्यायशिखामणिः’*, २. *वेदान्तपरिभाषायाः* टीका *‘वेदान्तशिखामणिः’* इति, ३. जैमिनिसूत्रस्य व्याख्या *‘न्यायदर्पणः’* इत्यादयः।

■ हरिरामतर्कवागीशभट्टाचार्यः

प्रख्यातनैयायिकः गदाधरस्य गुरुरूपेण हरिरामतर्कवागीशस्य नामोल्लेखनीयः। एषः निःसन्देहे वङ्गीयः आसीत्। मूलशब्दखण्डस्य टीकायां गदाधरेण स्वकीयगुरोः नामोल्लेखं कृत्वा ‘भूमीसमुदितभास्कर’ पदे तस्य स्तुतिः कृतम्। प्रत्यक्षदीधितेः टीकारम्भेऽपि गदाधरेण गुरोः प्रसङ्गे उक्तम्--

नत्वा नन्दतनूजसुन्दरपदं स्मृत्वा गुरोरादरात्।
उर्व्वीमण्डलमण्डनायितयशोराशेरशेष गिरः॥ इति।

हरिरामतर्कवागीशेन विरचितेषु विख्यातग्रन्थेषु-- १. चिन्तामणिग्रन्थस्योपरि *‘तत्त्वचिन्तामणिटीका’* इति। एतदतिरिक्ततया २. *‘आचार्यमतरहस्य’*, ३. *‘रत्नकोषवादः’*, ३. ‘स्वप्रकाशरहस्य’ इत्यादयः ग्रन्थाः उल्लेखनीयाः। सः ‘वादबुद्धिविचारानुसारेण वङ्गदेशे संवत् १७११ अथवा १६४४ खीष्टाब्दे आविर्बभूव।

■ गदाधरभट्टाचार्यः

जगदीशात् किञ्चिदर्वाचीनः प्रायशस्तु समकालिको गदाधरभट्टाचार्यः नव्यन्यायसम्प्रदाये महता समादरेणाधीयते। सप्तदशशतकीयो नवद्वीपनिवासी गदाधरभट्टाचार्यः ‘दीधिति’ इति सम्प्रदायस्य सर्वश्रेष्ठग्रन्थकर्ता। तेन *‘गादाधरी’* इति नाम्ना प्रसिद्धा टीका प्रणीता। तदतिरिक्ततया स्वीये जन्मनि अनेनानेके ग्रन्थाः विरचिताः तेषु प्रामुख्यं भजन्ते *‘अनुमानालोक’*स्य टीका, पक्षधरमिश्रप्रणीतस्य टीका, *‘शब्दमण्यालोक’*स्य टीका, *प्रत्यक्षालोकटीका, अनुमानालोकटीका, मूलचिन्तामणेः* टीका, *‘तत्त्वचिन्तामणिदीधितिप्रकाशिका’*, मूलग्रन्थेषु *‘व्युत्पत्तिवादः’*, *‘शक्तिवादः’*, *‘मुक्तिवादः’*, *‘नञ्वादव्याख्या’*, *‘बौद्धाधिकारदीधितिटीका’*, *‘कुसुमाञ्जलिटीका’* इत्यादय उल्लेखनीयाः।

गदाधरः यद्यपि प्रायशः न्यायशास्त्रमेव आधरीकृत्य ग्रन्थान् विनिर्मितवान्, तथापि काश्चन ग्रन्थान् तदतिरिक्तानपि विनिर्मितः। यथा-- *‘ऋग्वेदोक्तदशकर्मपद्धतिः’*, *‘चण्डटीका’* च। अपि च तेन अलंकारग्रन्थरूपेण चतुर्थोल्लासपर्यन्तम् *‘काव्यप्रकाशटीका’* इति प्रणीता। तथापि नायं केवलं न्यायशास्त्रे न्यायशास्त्राभिज्ञ एव,

रुद्रन्यायवाचस्पतिप्रवरेण नैयायिकेन *न्यायदर्शनस्योपरि* ग्रन्था भवन्ति यत्-१. रघुनाथस्य 'दीधितेः' उपरि '*तत्त्वचिन्तामणिदीधितिप्रकाशिका*' इति उपटीका। *अन्यत् वैशेषिकदर्शनस्योपरि* यत्-- २. रघुनाथस्य उपटीकायारुपरि '*किरणावलीप्रकाशवृत्तिपरीक्षा*' अथवा '*भावप्रकाशकः*' इति उप-उपटीका (sub-sub. comm.)। ३. '*पदार्थखण्डव्याख्या*', ४. '*कुसुमाञ्जलिकारिकाव्याख्या*' (काश्यामस्ति), ५. '*लीलावतीप्रकाशटीका*' (काश्यामस्ति), ६. '*शब्दपरीक्षा*' (जम्मौ अस्ति) Stain's Cat., p. 144, p. 98. इत्यादयः टीका-ग्रन्थाः। स्वतन्त्रग्रन्थेषु उल्लेखनीयाः भवन्ति--१. '*शब्दपरिच्छेदः*' (A Descriptive Cat. Asiatic Society, Kolkata, G-1231, p. 258, Pune, Mss. No. 248)। २. '*वादपरिच्छेदः*' (Hall, index, p. 43)। ३. '*कारकपरिच्छेदः*' (Jammu, p. 135, p. 21, Tanjore, p. 44, 88-89)। ५. '*नियोज्यान्वयविवरणम्*' (Pune)[३] इत्यादयः। अपि च काव्यसाहित्ये तेन 'भावविलास', '*भ्रमरदूतम्*', '*वृन्दावनविनोदकाव्यम्*' इत्यादीनि पुस्तकानि प्रणीतानि।

रुद्रन्यायवाचस्पतिः विद्यानिवासभट्टाचार्यस्य पुत्र आसीत्, तथा च विद्यावाचस्पतेः पौत्र आसीत्, तस्य अनुज आसीत् विश्वनाथ-न्यायपञ्चाननः। '*प्रत्यक्षमणिदीधितिव्याख्या*' इति मातृकानुसारेण रुद्रः संवत् १६७० अथवा १६१३ खीष्टाब्दे स अवश्यमेवासीत्।

विश्वनाथसिद्धान्तपञ्चाननभट्टाचार्यः

अयं खलु वङ्गदेशीय विद्वान् सप्तदशशतकीयः नैयायिकः। पण्डितेनानेन *न्यायदर्शनस्योपरि* ग्रन्थाः, यथा--१. अलंकारस्य स्वतन्त्रः ग्रन्थः '*अलंकारपरिस्कार*' इति। २. रघुनाथस्य टीकोपरि '*नञ्वादटीका*'। ३. अक्षपादगौतमस्य '*न्यायसूत्रो*'परि '*न्यायसूत्रवृत्तिः*' इत्यादयः।

अपि च *वैशेषिकदर्शनस्योपरि*- ४. '*न्यायतन्त्रबोधिनी*' अथवा '*न्यायबोधिनी*' ५. रघुनाथस्य '*पदार्थखण्ड*'स्योपरि 'पदार्थतत्त्वालोकः'। ६. '*भाषापरिच्छेदः*' इति ग्रन्थस्योपरि '*न्यायसिद्धान्तमुक्तावली*' अथवा '*सिद्धान्तमुक्तावली*' अथवा केवलं '*मुक्तावली*' इति नाम्ना टीका विरचिता। अपि च अन्यद् व्याकरणविषयकः ७. 'कारकचक्र', छन्दःशास्त्रस्योपरि ८. '*पिङ्गलप्रकाश*' इत्यादयः ग्रन्थाः।

विश्वनाथन्यायपञ्चाननस्य पिता आसीत् विद्यानिवासभट्टाचार्यः, अपि च रुद्रनारायण-भट्टाचार्यस्य अनुज आसीत् 'विश्वनाथः' इति। स वृन्दावने शकाब्दः १५५६ अथवा १६३४ खीष्टाब्दे आविर्बभूव।

गोविन्दशर्माः

नवद्वीपाधिवासी न्यायाचार्यः महामहोपाध्यायः गोविन्दशर्मा (भट्टाचार्यः) सप्तदशशतके अपर एकः पण्डितप्रवरः आसीत्। तेन *न्यायदर्शनस्योपरि*-- रचितः ग्रन्थः-- १. '*न्यायसंक्षेपणः*' इति, व्याकरणविषयस्योपरि- २. '*समासवादः*' 'समासतत्त्व' वेति, वैशेषिकदर्शनस्योपरि- ३. रघुनाथस्य टीकायाः उपरि '*पदार्थखण्डनव्याख्या*' इत्यादयः ग्रन्थाः।

रघुनाथभट्टाचार्यः

रघुनाथभट्टाचार्यः खलु जगदीशन्यायालंकारस्य पुत्रः। अस्य ग्रन्थ भवति *'तत्त्वचिन्तामणि-पक्षता-निगूढार्थः'* इति (University of Madras, p. 354)।

रामकृष्ण-अध्वरीः

नैयायिकोऽयं' *'वेदान्तपरिभाषा'*कारस्य धर्मराजध्वरीन्द्रस्य पुत्रः। एतेन प्रणीतः ग्रन्थः--१. *तत्त्वचिन्तामणिः* इति ग्रन्थस्य टीका *'न्यायशिखामणिः'*, २. *वेदान्तपरिभाषायाः* टीका *'वेदान्तशिखामणिः'* इति, ३. जैमिनिसूत्रस्य व्याख्या *'न्यायदर्पणः'* इत्यादयः।

हरिरामतर्कवागीशभट्टाचार्यः

प्रख्यातनैयायिकः गदाधरस्य गुरुरूपेण हरिरामतर्कवागीशस्य नामोल्लेखनीयः। एषः निःसन्देहे वङ्गीयः आसीत्। मूलशब्दखण्डस्य टीकायां गदाधरेण स्वकीयगुरोः नामोल्लेखं कृत्वा 'भूमीसमुदितभास्कर' पदे तस्य स्तुतिः कृतम्। प्रत्यक्षदीधितेः टीकारम्भेऽपि गदाधरेण गुरोः प्रसङ्गे उक्तम्--

नत्वा नन्दतनूजसुन्दरपदं स्मृत्वा गुरोरादरात्।
उर्व्वीमण्डलमण्डनायितयशोराशेरशेष गिरः॥ इति।

हरिरामतर्कवागीशेन विरचितेषु विख्यातग्रन्थेषु-- १. चिन्तामणिग्रन्थस्योपरि *'तत्त्वचिन्तामणिटीका'* इति। एतदतिरिक्ततया २. *'आचार्यमतरहस्य'*, ३. *'रत्नकोषवादः'*, ३. 'स्वप्रकाशरहस्य' इत्यादयः ग्रन्थाः उल्लेखनीयाः। सः 'वादबुद्धिविचारानुसारेण वङ्गदेशे संवत् १७११ अथवा १६४४ खीष्टाब्दे आविर्बभूव।

गदाधरभट्टाचार्यः

जगदीशात् किञ्चिदर्वाचीनः प्रायशस्तु समकालिको गदाधरभट्टाचार्यः नव्यन्यायसम्प्रदाये महता समादरेणाधीयते। सप्तदशशतकीयो नवद्वीपनिवासी गदाधरभट्टाचार्यः 'दीधिति' इति सम्प्रदायस्य सर्वश्रेष्ठग्रन्थकर्ता। तेन *'गादाधरी'* इति नाम्ना प्रसिद्धा टीका प्रणीता। तदतिरिक्ततया स्वीये जन्मनि अनेनानेके ग्रन्थाः विरचिताः तेषु प्रामुख्यं भजन्ते *'अनुमानालोक'*स्य टीका, पक्षधरमिश्रप्रणीतस्य टीका, *'शब्दमण्यालोक'*स्य टीका, *प्रत्यक्षालोकटीका, अनुमानालोकटीका, मूलचिन्तामणेः* टीका, *'तत्त्वचिन्तामणिदीधितिप्रकाशिका'*, मूलग्रन्थेषु *'व्युत्पत्तिवादः'*, *'शक्तिवादः'*, *'मुक्तिवादः'*, *'नञ्वादव्याख्या'*, *'बौद्धाधिकारदीधितिटीका'*, *'कुसुमाञ्जलिटीका'* इत्यादय उल्लेखनीयाः।

गदाधरः यद्यपि प्रायशः न्यायशास्त्रमेव आधरीकृत्य ग्रन्थान् विनिर्मितवान्, तथापि काश्चन ग्रन्थान् तदतिरिक्तानपि विनिर्मितः। यथा-- *'ऋग्वेदोक्तदशकर्मपद्धतिः'*, *'चण्डटीका'* च। अपि च तेन अलंकारग्रन्थरूपेण चतुर्थोल्लासपर्यन्तम् *'काव्यप्रकाशटीका'* इति प्रणीता। तथापि नायं केवलं न्यायशास्त्रे न्यायशास्त्राभिज्ञ एव,

अपि तु तन्त्रे, ज्योतिःशास्त्रे, कर्मकाण्डे मीमांसायाम्, पुराणादावपि चास्य वैदुष्यं सुप्रसिद्धम्, सुप्रसिद्धा चास्य एतेषु विषयेषु अबाधिता मतिः, गदाधरभट्टाचार्योऽयं रघुदेवस्य समसामयिक आसीदिति।

■ नृसिंहपञ्चाननभट्टाचार्यः

सप्तदशशतकस्य शेषार्धे वङ्गे नैयायिकरूपेण नृसिंहपञ्चाननभट्टाचार्यः आविर्बभूव। तेन जानकीनाथस्योपरि न्यायदर्शनविषयकः *'न्यायसिद्धान्तमञ्जरी'* इति टीका विरचिता। नृसिंहपञ्चाननः अवश्यमेव संवत् १७३० अथवा १६७३ खीष्टाब्दे आसीत् तस्य 'भूषा' इति मातृकानुसारेण। नृसिंहस्य पिता आसीत् गोविन्दशर्मा इति।

■ रामदेवचिरञ्जीवभट्टाचार्यः

अयमपि सप्तदशशतकस्य शेषार्धे आसीत्। न्यायाचार्य-प्रवरेणानेन ग्रन्थः लिखितः यत्--*न्यायदर्शनस्योपरि*--१. 'विद्वानमोदतरङ्गिणी' इति। स केवलं न्यायदर्शनेषु पण्डिता न, अपि तु अलंकारशास्त्रे- २. *'काव्यविलास'*, ३. *'माधवचम्पू'*, ४. *'वृत्तरत्नावली'* इत्यादयः ग्रन्थाः। चिरञ्जीवभट्टाचार्योऽयं रघुदेवन्यायालंकारस्य छात्र आसीत्।

■ रामरुद्रतर्कवागीशभट्टाचार्यः

वङ्गे न्यायदर्शने सप्तदशशतकस्य अन्तिमन्यायाचार्य-रूपेण रामरुद्रतर्कवागीश-भट्टाचार्यमहाशय आसीत्। तस्य *न्यायदर्शनस्योपरि* ग्रन्था भवन्तीमे--१. रघुनाथस्य *'दीधिति'* टीकायाः उपरि *'तत्त्वचिन्तामणिदीधितिटीका'* इति उपटीका, २ *'व्युत्पत्तिवादव्याख्या'* इति टीका, ३. 'कारकाद्यर्थनिर्णयटीका' इत्यादयः ग्रन्थाः।

अपि च *वैशेषिकदर्शनस्योपरि*-- ४. *'दीनकरी'* टीकायाः उपरि *'दीनकरीप्रकाशतरङ्गीन'* इति उपटीका तस्य टीका इति प्रणीता।

■ **एतद्व्यतिरिक्तकतिपयनैयायिकाः सन्ति ये खलु तदपेक्षा अल्पप्रसिद्धाः, तेषां ग्रन्थेषु बहुविधाः ग्रन्थाः अद्यतनकालपर्यन्तम् बहुषु ग्रन्थालयेषु अप्रकाशितरूपेण विद्यन्ते। ते(नैयायिकाः) भवन्ति- गोपीकान्तन्यायालंकारस्य--** *'अनुमानदीधितिः'*। **रामनाथविध्यावाचस्पतेः -** *'शब्दार्थरहस्यम्'*, २. *'लीलावतीविवृतिरहस्यम्'*, ४. *'शब्दमणिरहस्यम्'*--एतानि सर्वाणि पुस्तकानि अद्यापि अनाविस्कृतानि अप्रकाशितानि च। **रामचन्द्रन्यायवागीशस्य--** *'आख्यातवादटीका'*, २. *'नञ्वादटीका'*, ३. वादतत्त्वम् इत्यादयः। **रामगोपालसिद्धान्तपञ्चाननः --** *'विवाहतत्त्वम्'*, २. *'वाक्यतत्त्वम्'*, ३. *'निर्धारणतत्त्वम्'*, ४. *'विधितत्त्वम्'*, ५. *'कारकतत्त्वम्'* इत्यादयः।

अतो नव्यनैयायिकेषु ये ये सुप्रसिद्धाः पण्डिताः आसन्, तेषु अधिकांश एव सप्तदशशतकीयाः नैयायिकाः एवम् अहं मन्ये। कारणं सप्तदशशतकीय-रघुदेवन्यायालंकारः, तेन सह अन्ये गदाधरादयः सुप्रसिद्धाः नैयायिकगणाः अपि नव्यन्यायाकाशे उज्ज्वलनक्षत्ररूपेण खलु विराजन्ते। एतेषां ग्रन्था अपि जिज्ञासूनां निकटे अतीव समादरनीयाः

प्रसिद्धाश्च। किन्तु मम मनसि एकः संशयः संजायन्ते यत्, एतेषां नैयायिकानां बहवः ग्रन्थाः अद्यापि यत् विभिन्नेषु ग्रन्थालयेषु अप्रकाशितरूपेण सन्ति, तेषां किं वा भविष्यति? अतो आशासे, एतादृशसन्दर्भस्य अध्ययनेन दर्शनशास्त्रानुरागिणां महान् उपकारो भविष्यतीति॥

तथ्यसूत्राणिः

१. ***संस्कृत साहित्ये वाङ्गालीर दान,*** सुरेश-चन्द्र-वन्दोपाध्यायः, पृ ३०३।
२. ***नावद्वीप-महिमा,*** यज्ञेश्वर-चौधुरी (सम्पा.), पृ. ९९।
३. ***वङ्गे नव्यन्याय चर्च्चा,*** पृ. २७३।
४. ***एनसाइक्लोपिडीया अफ् इन्डियान फिलोसफि*** (न्याय-वैशेषिक फिलोसफि), पृ. ५०३।

सहायकग्रन्थसूचीः

१. तर्कवागीशः, कामाख्यानाथः, ***तत्त्वचिन्तामणिः,*** (प्रत्यक्षादिचत्वार-खण्डः), चौखाम्बा संस्कृतं प्रतिष्ठानम्, दिल्ली, १९९० खीष्टोयाब्दे।
२. भट्टाचार्यः, दीनेश-चन्द्रः, ***वङ्गे नव्यन्यायचर्च्चा,*** वङ्गीय-साहित्य-परिषद्, कोलकाता, १९५१ खीष्टीयाब्दे।
३. भट्टाचार्यः, श्रीमोहनः, ***भारतीय-दर्शन-कोषः*** (प्रथम-खण्डः), संस्कृत कलेज, कोलकाता, १९७८ खीष्टीयाब्दे।
४. भट्टाचार्यः, शिवजीवनः एवं पोट्टार, कार्ल. एइच् (सम्पा.), ***एनसाइक्लोपिडीया अफ् इन्डियान फिलोसफि*** (न्याय-वैशेषिक फिलोसफि, १५१५-१६६०), मोतिलाल बेनारसिदास पावलिशार्स प्राइभेट् लिमिटेड्, दील्ली, २०११ खीष्टीयाब्दे।
५. मिश्रः, सच्चिदानन्दः, ***तत्त्वचिन्तामणिप्रभा*** (अनुमानखण्डः), कामेश्वरसिंह दारभाङ्गा संस्कृत विश्वविद्यालयः, दारभाङ्गा, २००५ खीष्टीयाब्दे।
६. मुखोपाध्यायः, गोविन्दगोपालः एवं भट्टाचार्यः, गोपिकामोहनः, ***ए ट्राइ लिङ्गुयाल डिक्शनारी,*** संस्कृत कलेज, कोलकता, १९६६ खीष्टीयाब्दे।
७. राढी, कान्तिचन्द्रः, नवद्वीप महिमा, यज्ञेश्वर-चौधुरी (सम्पा.), नवद्वीप पुरातत्त्व परिषद्, नवद्वीप (नदीया), २००४ खीष्टीयाब्दे (परिबर्धित-संस्करणम्)।
८. वन्दोपाध्यायः, सुरेश-चन्द्रः ***संस्कृत साहित्ये वाङ्गालीर दान,*** संस्कृत पुस्तक भाण्डार, कोलकाता।

श्रुत्युपशमितः परमाणुवादः

प्रलय ब्यानार्जी

अखिलशास्त्रमूलत्वेन वेदस्यैव परामर्श इत्यस्माकं परम्पराराद्धान्तः। चराचरेऽस्मिन् विश्वे स्थावरजङ्गमात्मकानि यानि वस्तूनि प्रत्यक्षीक्रियन्ते तेषां सर्वेषां वस्तूनां विषयाणाञ्च प्रकाशः सर्वादावेव वेदषु समजनीति विद्वांसोऽभिप्रयन्ति। मन्त्रब्राह्मणारण्यकोपनिषदात्मकस्य वदेस्य यद्यपि वैदत्वमुररीक्रियते तथापि मन्त्रब्राह्मणयोरेव केवलं वेदत्वं स्वीकुर्वन्ति परम्पराविदः। तयोर्मन्त्रब्राह्मणयोः उपनिबद्धा अङ्कुरिताः विषया आरण्यकोपनिषदंतु पुष्पिताः पल्लविताः फलभारनमिताश्च सन्तः विदुषां वादनिदानानि भवन्ति। एवं समग्रस्यास्य पञ्चभूतात्मकजगतः निदानरूपेण परमाणव इति नैयायिकाः वैशेषिकाश्चारम्भवादिनोऽभिप्रयन्ति। परमाणवो भवन्ति कस्यापि स्थूलविषयस्य द्रव्यस्य वा सूक्ष्मतमांशः। किन्त्वेषां परमाणूनां अभिहितार्थविषये स्वार्थप्रतिपादने प्रयोगो वेदगतेषु मन्त्रभागेषु ब्राह्मणग्रन्थेषु वोपलभ्यत इति चेत् उच्यते परमाणुपदार्थस्य कस्यापि पदार्थस्य सुक्ष्मतमांशाभिधायकस्य प्रयोगो वेदेष्वसकृदुपलभ्यन्ते नाम। परन्तु प्रायशः ऋग्वेदस्य सर्वत्रैव पतत्रशब्दस्यार्थरूपेण किञ्चिदपि पतनशीलं वस्तु किञ्चिदपि पक्षिजातं उत वा पक्षोपेतमित्यदीनि पदकदम्बान्युपलभ्यन्ते नाम। सूक्ष्मतमांशस्य प्रकाशोऽपि सुसूक्ष्मतया भाव्यमिति कृत्वा दाशतय्यां दशममण्डले परमाणुपर्य्यायान्तरेण केनचित् पतत्रशब्देन परमाणूनां परमाणुत्वं परमन्वीयते तत्रभवता क्रान्तप्रज्ञैः ऋषिभिरार्षदर्शिभिः।[१]

पतत्रशब्दोऽयमृग्वेदे चतुर्दशधोपलभ्यते। चतुर्दशसु तेषु पतत्रशब्देषु अर्थचतुष्टयमेव तेषां वाचकत्वेनास्माकं प्रतीतिपदवीमध्यारोहति। तेष्वार्थचतुष्टयेषु अणुपतनशीलपक्षिजातपक्षोपेता अन्तर्भवन्ति। ऋग्वेदे प्रथममण्डले दृश्यते पतत्रशब्दस्योल्लेखस्तत्र त्रिषष्ठ्यधिकैकशतसूक्तान्तर्गतस्य षष्ठे मन्त्रे पतत्रि-पदस्योल्लेखः--शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ तत्र पतत्रिशब्देन पतनवदित्यर्थः प्राप्यते।[२] ऊनपञ्चाशत्तमसूक्तस्य तृतीये मन्त्रे पतत्रिशब्दस्योल्लेखो दृश्यते--वयश्चित्ते पत्रत्रिणो द्विपच्चतुष्पदर्जुनि। पतत्यनेनेति पतत्रम्। पतत्रवन्तः पक्षोपेताः वासीदत्रा पतत्रिणः समार्थकशब्दाः।[३] अष्टपञ्चाशत्सूक्तान्तर्गते पञ्चमे मन्त्रे पतत्रिपदस्य प्रयोगः लक्ष्यते--अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः। अत्रापि पतत्रिणः पदस्यार्थरूपेण पतनवदित्यर्थः प्राप्यते।[४]

चतुर्नवतितमसूक्तस्य एकादशमन्त्रे पतत्रिशब्दः महर्षिणाम्नातम्: 'अध स्वतादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन्। अत्र पतत्रिणः पक्षिणोः' इति।[५] पञ्चपञ्चाशदधिकेकशत्सूक्तान्तर्गतस्य पञ्चमे मन्त्रे पतत्रिशब्दस्योल्लेखः--तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः॥ अत्रास्यार्थः पतनशीला।[६]

अष्टपञ्चाशदधिकैकशतसूक्तस्य चतुर्थमन्त्राम्नातपतत्रिणीपदस्यार्थरूपेणापि पतनशीले पुनरावर्तनशीले वा इत्यर्थः समुपलभ्यते। तत्रोक्तमार्षवाक्यमिदम्--उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धाम्।[७] तृतीयमण्डले चतुर्पञ्चाशत्सूक्तस्य अष्टमे मन्त्रे पतत्रिशब्दस्य प्रयोगः दृश्यते--एजद्ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम्। अत्र पतत्रिशब्देन पक्षिजातं इत्यर्थः लभ्यते।[८] चतुर्थमण्डलान्तर्गतस्य सप्तविंशतिसूक्तस्य चतुर्थमन्त्रे ऋषिणा पतत्रिशब्दस्य प्रयोगः कृतः--अन्तः पतत्पतत्र्यस्य पर्णमध्य यामानि प्रसितस्य तद्वेः।। अत्र पतत्रिशब्दस्यार्थरूपेण पतनशीलं इत्यर्थःप्राप्तः।[९] षष्ठमण्डलान्तर्गतस्य द्विषष्टितमसूक्तस्य षष्ठमन्त्रे पतत्रिभिः इति पदमाम्नातम्--अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो तिरुपस्थात्।। पतनवदित्यर्थः पतत्रशब्दस्यार्थरूपेणात्र विविच्यते सायणाचार्यैः।[१०] सप्तमे मण्डले नसप्ततिसूक्तान्तर्गतस्य सप्तममन्त्रेऽपि पतत्रिशब्दस्योल्लेखः--पतत्रिभिरश्रमैरव्यथिभिर्दसनाभिरश्विना पारयन्ता--अत्रापि पतनवदित्यर्थः ज्ञायते।[११] दशममण्डलो वारत्रयं पतत्रिशब्दस्य प्रयोगः प्राप्यते तत्र अष्टाशीतिसूक्ते, सप्तनवतिसूक्ते, त्रिचत्वारिंशदधिकैकशतसूक्ते च। आद्यस्य चतुर्थमन्त्रे मध्यस्य नवमे मन्त्रे अन्त्यस्य पञ्चममन्त्रे च-स पतत्रीत्वरं स्थाजगद्यच्छ्वात्रमग्निकृणो-ज्ञातवेदाः,[१२] सीराः पतत्रिणीः स्थन यदामयति निष्कृथ,[१३] यातमच्छा पतत्रिभिर्नासत्या सातये कृतम्,[१४] तत्राद्यस्य पतनशीलं, मध्यस्य पतनवत्, अन्त्यस्य पक्षोपेता चेति पतत्रिशब्दस्यार्थ-त्वेनाधिगम्यन्ते।[१५]

शुक्लयजुर्वेदेऽपि एवम् अण्वर्थाभिधायी पतत्रशब्दउपलभ्यते।[१६] सेयमृगत्रापि दृश्यते यत्र खलु जनिकर्त्ता देवः एको द्यावाभूमीर्जनयन् तत्रैव विलसति तत् सृष्ट्वा तदेवानुप्राविशदिति न्यायात्। तत्र भाष्यकारा महीधरभट्टा इत्थं व्याचिख्याषवो वर्त्तन्ते-सर्वतश्चक्षुः सर्वतोमुखः सर्वतोबाहुः सर्वगश्च विश्वकर्मा देवः द्यावापृथिव्यौ उत्पादयन् धर्माधर्माभ्यां भूतैश्च जीवान् सङ्गमयति। तत्र धर्माधर्मरूपैर्निमित्तैः पञ्चभूतोपादानैः पतत्रिणः सङ्गच्छन्ते।[१७]

काण्वसंहितायामष्टादशाध्यायान्तर्गतस्य द्वितीयानुवाक्यस्य चतुर्थमन्त्रे आम्नातस्य[१८]पतत्रशब्दस्यार्थनिर्णयकाले सायणाचार्येणापि तस्याणोः पञ्चभूतस्योपादानकारणत्वं सूचितम्।[१९] काण्वसंहितायामणुशब्दस्य प्रयोगोऽपि लक्ष्यते। अणुपदेनात्र क्षुद्र इत्यर्थबोधो भवति मतमिदं सायणभाष्ये आनन्दबोधीयभाष्ये चाङ्गीकृतम्।[२०] कृष्णयजुर्वेदस्य मैत्रायणीयसंहितायां, तैत्तिरय संहितायाम्, कपिष्टलसंहितायां च पतत्रशब्दस्य व्यवहारो दृश्यते। काठकसंहितायामपि दृश्यते पतत्रशब्दस्योल्लेखः।[२१] शौनकीयायर्ववेदेष्वपि पतत्रपदमाम्नातम्[२२], तत्र एकादशकाण्डस्य नवमाणुवाकस्य दशमसूक्ते अणूनि-पदस्य यः प्रयोगः प्राप्यते तस्यार्थस्तु सूक्ष्मरूपाणीति। आरण्यकेष्वपि कृष्णयजुर्वेदीय-तैत्तिरीयारण्यके क्रान्तप्रज्ञैः ऋषिभिः पतत्रै-रिति पदस्य प्रयोगः क्रियते।[२३] परमेश्वरो ब्रह्माण्डरूपं देहं धृत्वा सर्वप्राणिनः सृष्टवान्। स परमेश्वरः सर्वज्ञः, विश्वतः सर्वतः चक्षूंषि विद्यमानत्वात् सः विश्वतश्चक्षुः, विश्वतः सर्वतस्तस्य मुखानीति तस्मात् विश्वतोमुखः। परमेश्वरस्य विश्वतः सर्वतः बाहवः तस्मात् स विश्वतोबाहुः। विश्वतः पादा इति विश्वतस्पात्। स एकोऽद्वितीयः सन् जगदुत्पादयन्नास्त इति भावः।[२४] उपनिषद्यपि बहुत्र अणु-शब्दस्य व्यवहारो दृश्यते। वेदान्तदर्शने द्वितीयाध्यायस्य चतुर्थपादान्तर्गतं

सप्तमं सूत्रमपि अण्वर्थं वाचयति--अणवश्च इति सूत्रे[२५]। अत्राणुशब्दः सूक्ष्मार्थमभिधीयते।[२६] बृहदारण्यकोपनिषदि अणुशब्दस्य व्यवहारः परिलक्ष्यते-

तत्रेमे श्लोका आम्नाता दृश्यन्ते--

> अणुः पन्था विततः पुराणो मां स्पृष्टोऽणुवित्तो मयैव।
> तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥
>
> (४/४/८)॥

तत्र स्थितस्याणुशब्दस्यापि सूक्ष्मार्थबोधो भवति।[२७] कठोपनिषदि प्रथमाध्याये अयमणुशब्दः असकृदुपलभ्यते नाम। तत्र प्रथमवल्ल्याम् आत्मतत्त्वस्य दुर्बोध्यत्वविषये यमराजस्य इयमुक्तिः--देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः।[२८] अत्राणुशब्दः सूक्ष्मार्थाभिधायी।[२९] द्वितीयवल्ल्याम् त्रयोदशमन्त्रे विंशतितममन्त्रे चाणुशब्दस्योपस्थितिः परिलक्ष्यते। शाङ्करभाष्यानुसारं उभावेवाण्वर्थवाचिनौ।[३०] मुण्डकोपनिषदि अपि अणुशब्दस्य व्यवहारः परिलक्ष्यते। द्वितीयमुण्डके द्वितीयकाण्डान्तर्गतस्य द्वितीये मन्त्रे उपोद्वलिताणुशब्दस्यार्थस्तु सूक्ष्मः एव, तत्र परमात्मनः स्वरूपवर्णनावसरे अणुभ्योऽणु इति पदमुपन्यस्तम्।[३१] तृतीयमुण्डकान्तर्गतस्य प्रथमकाण्डस्य नवमे मन्त्रे एषोऽणुरात्मा इति गीयते, तत्र पञ्चप्राणात्मको विशुद्धात्मा सुक्ष्मस्वभावः, अधिकारिपुरुषैः वैदितव्य इत्याशा ऋषीणाम्। तत्रोक्ताणुशब्दः सूक्ष्मार्थवाचकः, मतमिदं शाङ्करभाष्ये स्पष्टीकृतम्।[३२] श्वेताश्वतरोपनिषदि तृतीयाध्यायस्य तृतीये मन्त्रे दृश्यते पतत्रशब्दस्योल्लेखः।[३३] मैत्रायण्युपनिषदि, कैवल्योपनिषदि, बृहज्जाबलोपनिषदि, नारदपरिव्राजकोपनिषदि, पारमात्मिकोपनिषदि चाणुशब्दस्य बहुत्र प्रयोगउलभ्यते।[३४]

वेदाङ्गेष्वपि बहुत्र अणुपदस्य तद्वाचकशब्दस्य च प्रयोगाः दृश्यन्ते, किन्तु प्रायः सर्वत्रैव तेषामर्थसाम्यं नोपलभ्यते। शुक्लयजुर्वेदप्रातिशाख्ये व्यञ्जनान्यर्धमात्रकाणि भवन्ति, तदर्धपरिमिता अणवोऽपि च तदर्धार्धपरिमिताश्च परमाणवः इति न्यगादि।[३५] तत्र सूत्राणामर्थनिरूपणावसरे उवटेन कथितम् अर्धमात्रार्धम् अणुसंज्ञमिति पुनः अर्धाणुमात्रा परमाणुसंज्ञा भवतीति नियमः।

श्रुतिसमयविलसितानां नैकविधानामार्षसम्प्रदायानां ज्ञानवुभुत्सानुप्राणिताः उत्तरपुरुषाश्चान्तेवासिनोऽप्यद्यत्वेऽपि विद्वत्परिषदि राज्यन्तो शास्त्राणि च जञ्चपन्त आत्मज्ञानमपि विवर्धयन्तो दृश्यन्ते। तेषामेव ज्ञानजिज्ञासाफलं नाम वेदानुवर्तिनो दर्शनसम्प्रदायाः। वेदानुगतानीमानि दर्शनप्रस्थानानि पञ्चभूतात्मकस्याखिलसंसारस्य उद्भवविकाशयोरितिवृत्तमावर्त्तनञ्च पर्यालोचयन्ति, विद्वद्धौरेयानाह्लादयन्ति, जीवितरसेन चावेजयन्ति च। इमे दर्शनसम्प्रदायाः आस्तिकनास्तिकभेदेन द्वैधीभूय पुनस्तेषां सिद्धान्तानुसारं त्रेधा विभज्यन्ते--आरम्भवादः, परिणामावादः विवर्तवादश्च। आरम्भवादे परमाणुतः द्व्यणुकादिक्रमेण जगदुत्पत्तिः स्वीकृता। सिद्धान्तोऽयं न्यायवैशेषिकैरङ्गीकृतः। परिणामवादे जगदिदं ब्रह्मणः परिणामस्वरूपमिति सांख्ययोगाचार्यैरुरीकृतम्। विवर्तवादे च जगदिदं ब्रह्मणो विवर्तमात्रमेव। वैयासिकसम्प्रदायाः मतमिदमभ्युपेत्य

तेषां स्वसमयं प्रतिष्ठापयामासुः। प्रस्थानत्रयेणानेन सममपरे त्रयः प्रधाननास्तिकदर्शनसम्प्रदायाः बोद्ध-जैन-चार्वाकाः अपि पूर्वपक्षिरूपेण भारतीयचिन्तापरम्परायां यथेष्टं गुरुत्वपूर्णस्थानमधिचक्रिरे। अपरतः अस्याः समग्रजडात्मकपृथिव्या उत्पत्तिविकाशयोः व्याख्यामहिकीं ये खलु पदार्थततइवदः इदानीं स्वीकुर्वन्ति ते हि सुप्राचीनार्षपरम्परायाः धारकाः वाहकाश्च। यतो हि पृथिव्याः क्षोदिष्ठांशरूपेणाणुमेव प्रथमं स्वीचक्रे महर्षिः कणादः ततस्तस्य प्रथमपदार्थविदित्याख्या विंपश्चिल्लसितास्वाद्यते। अतएव प्रथमपदार्थविदोत्तरपदार्थतत्वज्ञेषु च तौलमेकाध्ययनमत्र सूचीकटाहन्यायेनोपस्थापितमिति शम्॥

परिशीलिताः ग्रन्थाः

अथर्ववेदः (शौनकीयः), विश्वबन्धुः, विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्, १९६१।

ईशादिदशोपनिषदः, दिल्लि वाराणसी पाटना बंगलौर प्रद्रासः मोतिलील बनारसीदास, १९९२।

उपनिषत्संग्रहः, पण्डितजगदीशशास्त्री, दिल्लि वाराणसी पटना बंगलौर मद्रासः मोतिलाल वनारसीदास, १९८४।

ऋग्वेदसंहिता, दामोदर सातवलेकर, पारडीः स्वाध्याय मण्डल, nd.

काठकगृह्यसूत्रम्, विलेम कालण्डः, लाहौरः अध्यक्ष अनुसन्धान-विभाग दयानन्द महाविद्यालय, १९८१।

काण्व-संहिता, बे रामचन्द्र शर्मा, Puna-37: Vaidika Samsodhana Mandala, 1992.

कृष्णयजुर्वेदीया कपिष्टलकठसंहिता, Raghu Vira, Delhi-6 : Meharchand Lachhmandas. Prop. The Sanskrit Book Depot. 1968.

कृष्णयजुर्वेदीया तैत्तिरीय-संहिता, श्रीपाद दामोदर सातवलेकर, पारडी नगरम्ः स्वाध्याय मण्डल, १९८३।

कष्णयजुवेदीयं तैत्तिरीयारण्यकम्, वाबाशास्त्री फडके, पुणाः आनन्दाश्रममुद्रणालये, १९८१।

तैत्तिरीयप्रातिशाख्यम्, R. Shama Sastri & K. Rangacarya, दिल्लि वाराणसी पाटना मद्रासः मोतिलाल बनारसीदास, १९८५।

तैत्तिरीयव्राह्मणम् (द्वितीयाष्टकम्), द्वितीय-खण्डः, शामशास्त्री, दिल्लि वाराणसी पाटना मद्रासः मोतिलाल बनारसीदास, १९८५।

पारस्करगृह्यसूत्रम्, Mahadeva Gangadhar Bakre, New Delhi-110 005: Munshiram Monoharlal Publishers, p.v.t. LTD, 1982.

यजुर्वेदीयकाठकसंहिता, श्रीपाद दामोदर सातवलेकर, पारडी नगरम्ः स्वाध्याय मण्डल, १९८३।

यजुर्वेदीयमैत्रायणीसंहिता, वलसाड, गुजरातः स्वाध्याय मण्डल पारडी, nd.

शिक्षासूत्राणि, युधिष्ठिर मीमांसक, वलाहगडढ (सोनीपत-हरयाणा): रामलाल कपूर ट्रस्ट, १९८३।

शुक्लयजुर्वेदसंहिता (वाजसनेयि माध्यन्दिन), पण्डित जगदीशलालशास्त्री, देहलि-११० ००७: मोतिलाल वनारसीदास, १९८७।

श्री वाजसनेयि-माध्यन्दिन-शतपथ-व्राह्मणम्, देहलि-११० ००७: ज्ञानपब्लिशिंगहाउस. १९८७।

Rgveda-Samhita (Vol.4). N.S. Sontakke & C.G. Kashikar, Pune-37: Vidika Samsodhaua Mndala, 1983.

तत्थसूत्राणि

१। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहूभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः। - ऋग्वेदे- १०.८१.०३

२। तथाविधैस्तैः जेहमानम् उपर्युपरि व्याप्नुवत् पतत्रि पतनवच्छिरोऽपश्यं भावयामि।-ऋग्वेदे, सायणभाष्ये-१.१६३.६

३। ...द्विपात् मनुष्यादिकं चतुष्पत् गवादिकं तथा पतत्रिणः पतत्रवन्तः पक्षोपेताः वयश्चित् पक्षिणश्च दिवः अन्तेभ्य....। - ऋग्वेदे, सायणभाष्ये- १.४९.३

४। यस्मादेवं तस्मात् पतत्रिणः पतनवतोऽग्नेः सकाशात् स्थातुः स्थावरं चरथं च जङ्गमं च भयते बिभेति॥ - ऋग्वेदे, सायणभाष्ये-१.५८.५।

५। पतत्रिणः पक्षिणोऽपि बिभ्युः बिभ्यति भयं प्राप्नुवन्ति। - ऋग्वेदे, सायणभाष्ये-१.९४.११

६। पतयन्तः सर्वत्र गमनसमर्थाः तथा पतत्रिणः पतनशीला गरुढादयो वायवो वा नकिरा दधर्षति नैव शक्नुवन्ति॥- ऋग्वेदे, सायणभाष्ये-१.१५५.५

७। इमे प्रसिद्धपतत्रिणी पतनशीले पुनरावर्तनशीले अहोरात्रे मां मा वि दुग्धां विशेषेण दोहगतसारं...। - ऋग्वेदे, सायणभाष्ये-१.१५८.४

८। तथा चरत् चञ्चलं पशुजातं पतत्रि पक्षिजातं च विष्णुणं विष्वक्ननारूपमनयोर्मध्ये वि तिष्ठते।-ऋग्वेदे, सायणभाष्ये-३.५४.८

९। अध तदानीं यामानि युद्धे प्रसितस्य कृशानोरस्त्रैर्बद्धस्य वेः गन्तुः अस्य श्येनस्य अन्तः मध्ये स्थितं पतत्रि पतनशीलं तत् पर्णं पतत् अपतत्॥-ऋग्वेदे, सायणभाष्ये-४.२७.४

१०। ...अरेणुभिः रेणुरहितैः आन्तरिक्षैः रजोभिः मार्गैः योजनेभिः रथयुक्तैः पतत्रिभिः पतनवद्भिः विभिः अश्वैः अर्णसः जलस्य उपस्थात्...।-ऋग्वेदे, सायणभाष्ये-६.६२.६

११। अस्रिधानैः अक्षीयमाणैः आश्रमैः अव्यथिभिः च पतत्रिभिः पतनवद्भिर्गमनवद्भी रथे नियुक्तैरश्वैः दंसनाभिः शारीरैः कर्मभिश्च शारीरैः कर्मभिश्च....। - ऋग्वेदे, सायणभाष्ये-७.६९.७

१२। ऋग्वेदे - १०.८८.४

१३। ऋग्वेदे - १०.९७.९

१४। ऋग्वेदे - १०.१४३.५

१५। ...सः वैश्वानरः अग्निः पतत्रिं पतनशीलं पक्षिजातम् इत्वरं गमनशीलं सरीसृपादिकं स्थाः स्थावरं वृक्षादिरूपं च जगत्।- ऋग्वेदे, सायणभाष्ये-१०.८८.४

किं च यूयं सीराः सरणशीलाः पतत्रिणी पतनवत्यश्च स्थन भवत।-ऋग्वेदे, सायणभाष्ये-१०.९७.९

अच्छ अभि पतत्रिभिः पक्षोपेतैर्नौ विशेषैः सह आ यातम् आगतवन्तौ स्थः।-ऋग्वेदे, सायणभाष्ये-१०.१४३.५

१६। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रै-र्द्यावाभूमी जनयन्देव एकः॥ -- शुक्लयजुर्वेदे-१३.१९

१७। एकोऽसहायो देवः विश्वकर्मा द्यावाभूमी जनयन्सन् बाहुभ्यां बाहुस्थानीयाभ्यां धर्माधर्माभ्यां संधमति। धमतिर्गत्यर्थः। संगच्छते संयोगं प्राप्नोति पतत्रैः पतनशीलैः अनित्यैः पञ्चभूतैश्च संगच्छते धर्माधर्मरूपैर्निमित्तैः पञ्चभूतरूपैरूपादानैश्च। साधनान्तरं विनैव सर्वं सृजतीत्यर्थः।- शुक्लयजुर्वेदे, महीधरभाष्ये-१७.१९

१८। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः॥--काण्वसंहितायां-१८.२.४

१९। परमेश्वरस्य सर्वप्राण्यात्मकत्वाद्यस्य यस्य प्राणिनो ये चक्षुषी ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्रास्य चक्षुंषि संपद्यन्ते। एवं मुखहस्तपादेष्वपि योजनीयम्। सः तादृशः एकः देवः द्यावाभूमी जनयन् बाहुभ्याम् बाहुस्थानीयभायां धर्माऽधर्माभ्यां निमित्तकारणाभ्यां संधमति। धमतिर्गत्यर्थः। जगत्सर्वं सम्यग्गतं प्राप्तं स्वाधीनं करोति। तथा पतत्रैः पतनशीलैरनित्यैः पञ्चभूतैरुपादानकारणैः जगत् संधमति स्वाधीनं करोति।- काण्वसंहितायां-१८.२.४

२०। अणवःक्षुद्रधान्यानि।--काण्वसंहितायां, सायणभाष्ये, आनन्दवोधे-१९.४.४

२१। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः। - मै. सं-२.१०.२.१८, ते. सं-४.६.२.४, कपि. सं-२८.२, का. सं-१८.२.१३

२२। विश्वचर्षणिरुत विश्वतोमुखा यो विश्वतस्पाणिरुत विश्वतस्पृथः।
सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः। - शौनकीयाथर्ववेदे-१३.२.२६

२३। एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः।
स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्मात्।
सं बाहुभ्यां नमति सं पतत्रैर्धावापृथिवी जनन्देव एकः, इति॥ -तैत्तिरीयारण्यके-१०.१.३

२४. ...तथा पूर्वो जातो हिरण्यगर्भस्वरूपत्वेनायमेव प्रथममुत्पन्नः। हि-शब्देन हिरण्यगर्भः समावर्तत इति मन्त्रप्रसिद्धिः सूच्यते।...विश्वतः सर्वतो मुखानि रूपाद्युपलब्धिद्वाराणि चक्षुरादीनि यस्यासौ विश्वतोमुखः। तादृशोऽयं जगदधिष्ठानत्वेन तिष्ठति। स च ब्रह्माण्डरूपं देहं धृत्वा सर्वप्राणिदेहस्वरूपत्वात्तदीयैः सर्वैश्चक्षुरादिभिर्युक्त इति विश्वतश्चक्षुरित्यादिपदैरभिधीयते। तत्रल्लोकनिवासिनां प्राणिनां चक्षूंषि तत्र तत्र स्थितान्येवैतदीयानि भवन्ति। अतोऽस्य सर्वत्र चक्षुष्मत्त्वम्। एवं विश्वतोमुखत्वादिकमपि द्रष्टव्यम्। स च परमेश्वरो बाहुभ्यां संनमति बाहुसहशाभ्यां धर्माधर्माभ्यां निमित्तकारणाभ्यां सर्व जगदुत्पादयति एंवमयं देवो द्यावापृथिव्यादिकं कृत्स्नं जगदुत्पादयन्नेक एवावतिष्ठते।--तैत्तिरीयारण्यके, सायणभाष्ये--१०.१.३

२५। ब्रह्मसूत्रे-२.४.७

२६। अणवश्च एते प्रकृताः प्राणाः प्रतिपत्तव्याः। अणुत्वं च एषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, कृत्स्नदेहव्यापिकार्य्यानुपपति सङ्गात्।--वेदान्तदर्शने, सायणभाष्ये-२.४.७

२७. आत्मकामस्य ब्रह्मविदो मोक्ष इत्येतस्मिन्नर्थे मन्त्रब्राह्मणोक्ते विस्तरप्रतिपादका एते श्लोका भवन्ति। अणुः

सूक्ष्मः पन्था दुर्विज्ञेयत्वाद्विततो विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा वितरः इति पाठान्तरात्मोक्षसाधनो ज्ञानमार्गः पुराणाः चिरन्तनो नित्यश्रुतिप्रकाशितत्वान्न तार्किकवुद्धिप्रभवकुदृष्टिमार्गवदर्वाक्कालिको, मां स्पृष्टो मया लब्ध इत्यर्थः। बृहदारण्यकोपनिषदि, शाङ्करभाष्ये ४.४.८

२८। कठोपनिषदि-१.१.२१

२९। देवैरप्यत्र एतस्मिन्वस्तुनि विचिकित्सितं संशयितं पुरा पूर्वम्। न हि सुविज्ञेयं सुष्ठु ज्ञेयं असकृत् श्रुतमपि प्राकृतैर्जनैः यतोऽणुः सूक्ष्म एष आत्माख्यो धर्मः। कठोपनिषदि, शाङ्करभाष्ये--१.१.२१

३०। एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य-कठोपनिषदि-१.२.१३

अणोरणीयान्महतो महीयाना मास्य जन्तोर्निहितो गुहायाम्।-कठोपनिषदि-१.२.२०

कथं पुनरात्मानं जानातीत्युच्यते-अणोः सूक्ष्मादणीयाञ्श्यामा-कादेरणुतरः। महतो महत्वपरिमाणात्महीयान्महत्तरः पृथिव्यादेः। अणु महद्वा यदस्ति लोके वस्तु तत्तेनैवात्मना नित्येनात्मवत्सम्भवति।--कठोपनिषदि, शाङ्करभाष्ये-१.२.२०

३१। यदवर्चिमद्यदणुभ्योऽणु च यस्मिल्लोका निहिता लोकिनश्च।--मुण्डकोपनिषदि, २.२.२, किञ्च यदर्चिमद्दीप्तिमत्। तद्दीप्त्या आदित्यादि दीप्यत इति दीप्तिमदब्रह्म। किञ्च यदणुभ्यः श्यामाकादिभ्योऽप्युणु च सूक्ष्मम्।--मुण्डकोपनिषदि, शाङ्करभाष्ये-२.२.२

३२। एषांऽणुरात्मा चेतसा वैदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश।

प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा॥ - मुण्डकोपनिषदि-३.१.९

यमात्मानमेवं पश्यति ; एपोऽणुः सूक्ष्मः आत्मा चेतसा विशुद्धज्ञानेन केवलेन वेदितव्यः। - मुण्डकोपनिपदि, शाङ्करभाष्ये-३.१.९

३३। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः।
श्वेताश्वतरोपनिषदि-३.३

३४। मैत्रायण्युपनिषदि-६.३५; ६.२०; ६.३८, कैवल्योपनिषदि-१.२०, बृहज्जाबलोपनिषदि-३.२९, नारदपरिव्राजकोपनिषदि-६.१३, पारमात्मिकोपनिपदि-६.३

३५। व्यञ्जनमर्धमात्रा, तदर्धमणु, परमाण्वर्धाणुमात्रा-शुक्लयजुर्वेद-प्रातिशाख्ये-१.५९-६१

व्याकरणान्तरेषु प्रत्याहारव्यवस्था

दे इत्युपनामकः पिन्टुः

प्राक्पाणिनीयतन्त्रे प्रत्याहारव्यवस्थाः

अनुशीलनात् प्रतीयते यद् सूत्रात्मकस्य न तावद् भगवान् पाणिनिः अपूर्वकर्ता। तदीयतन्त्रे केषाञ्चित् मूत्राणामक्षरानुकरणं विहितं वर्तते। किञ्च तिप्-शप्-तिङ्-श्लु-कारकोपपदप्रभृतीनां पारिभाषिकशव्दानां प्रयोगः साधितः, या खलु पूर्वाचार्याणां सम्पादिता संज्ञा इति ज्ञायते। 'परः सन्निकर्षः संहिता' इति सूत्रं वाजसनेयप्रातिशाख्येऽपि उपलभ्यते।

व्याकरणस्य सूत्रात्मकपरम्परा ऐन्द्रव्याकरणाद् आरब्धा प्रसृता चेति ऐतिह्यादवगम्यते। न्यासकारो जिनेन्द्रबुद्धिः पाणिनेः पूर्वं प्रत्याहार आसीदिति युत्तं स्वभाषया अलंकृतवान्-"पाणिनेर्यश्चकारेण प्रत्याहाराः सोऽन्येषामाचार्याणां मतेन षकारेण" इति। तृणधान्यानां च द्वयसाम् इति सूत्रस्थम् अष्-प्रत्याहारज्ञानमादाय न्यासकृतां तादृशव्याख्याने तात्पर्यं चन्द्राचार्येणापि स्ववृत्तौ प्रतिपादितम्-एषः प्रत्याहारः पूर्वव्याकरणेष्वपि स्थित एव। अयं तु विशेषः--ऐओष् यदासीत् तद् ऐओच् कृतमिति। पुनश्च अष्-प्रत्याहारापेक्षया तत्रापि फिट्सूत्र इक्-खय्-हय् प्रभृतीनां प्रत्याहाराणाम् उल्लेखः प्राप्यते। अत एव प्राक्पाणिनीयतन्त्रेषु प्रत्याहारव्यवस्था उत्तमासीत्, यत्प्रभावः पाणिनेरुपरि सन्यस्तः। महर्षिना पाणिनिना तु तेषां स्वरूपं किमपि परिवर्तनं साधितमपि च सूत्रेषु व्यवस्थापितमिति।

अपाणिनीयसम्प्रदायेषु प्रत्याहारव्यवस्थाः

पाणिन्युत्तरवर्तिषु अपाणिनीयसम्प्रदायेषु येषु केषुचित् पाणिनीयप्रत्याहारवत् तत्तच्छास्त्रीयप्रत्याहारा दृश्यन्ते जैनेन्द्र-हैम-सारस्वत-शाकटायन-हरिनामामृतादीनां प्रत्याहारव्यवस्थाल्लखयाग्या।

१) जैनेन्द्रव्याकरणम्ः

अत्र व्याकरणे पाणिनीयवत् चतुर्दशप्रत्याहारसूत्राणि यद्यपि नोपलभ्यन्ते तथापि पाणिनीयप्रत्याहारवत् सर्वं सूत्रेषूपलभ्यन्ते। तथाहि-

क) अण्-'रन्तोऽण्' (जै-१-१-४८)।

ख) इक्-'इकस्तौ' (जै-१-१-१७)

ग) अच्-'द्वित्वेऽचि' (जै-१-१-५९)।

घ) यण्-'इस्यणो जिः' (जै-१-१-४५)।

पाणिनीयप्रत्याहारविधायकसूत्रं यथा 'आदिरन्त्यन सहेता' (पा-१-१७१), तथेवात्र 'अन्त्येनेतादिः' (जै-१-१-७३) इति वर्तते।

२) हैमव्याकरणम्ः

अत्र व्याकरणे हेमचन्द्रसूरिणा पाणिनीयप्रत्याहारवद् व्यवहारा नादृतः, मातृकाक्रमस्य तेन विन्यासः विहितः-

पाणिनीयप्रत्याहारः	हैमसंज्ञा
क) अच्	स्वरः (औदन्ताः स्वराः, है-१-१-४)।
ख) अक्	समानः (लृदन्ताः समानाः, है-१-१-१७)।
ग) यण्	अन्तःस्था (यरलवा अन्तःस्थाः, है-१-१-१५)।

३) सारस्वतव्याकरणम्ः

अस्मिन् व्याकरणे पाणिनीयप्रत्याहारवत्प्रत्याहाराणां प्रयागोऽस्ति। स्वरूप तु कश्चन विपरीतः क्रमो लक्ष्यते प्रत्याहारसूत्राणि 'हयवरट्' इत्यारभ्य 'शषसर्' इति यावत् पाणिनीयसूत्रवदिति।

सारस्वतप्रत्याहाराः	संज्ञिवर्णाः	पाणिनीयप्रत्याहाराः
इल	अवर्णरहितस्वरः, अन्तःस्थ	इण्
चप	वर्गप्रथमः	चय्
जब	वर्गतृतीयः	जश्

४) शाकटायनव्याकरणम्ः

पाल्यकीर्तेर्विरचितेऽस्मिन् शाकटायनव्याकरणेऽपि प्रत्याहारव्यवस्था प्रत्याहारसूत्राणि च प्रायः पाणिनिवन्निर्दिष्टानि सन्ति। यंथा- 'अइउण्', 'ऋक्एओङ्', 'ऐओच्', 'हयवरलञ्',--'हल्' इति। पाणिनीयप्रत्याहारसूत्रापेक्षया अत्र काचिद् भिन्नतास्ति। यथा-'ऋक्' इत्यत्र 'लृ' इत्यस्य पाठः न विहितः। 'हयवरट्' 'लण्' इति सूत्रद्वयस्थाने एकमेव सूत्रं 'हयवरलञ्' निर्मितम्। 'अतो दीर्घो यञि' (पा-७-३-१०१), 'सुपि च' (पा-७-१०२) इति सूत्रद्वये तस्य यञ् इत्यस्य प्रयोगे लक्ष्यत। येन पचामि, पचावः, पचामः, पच़ावहे, पचामहे, रामाय, रामाभ्यामिति प्रयोगाः सिध्यन्ति। केवलं वकारस्य, मकारस्य, यकारस्य, भकारस्य च उद्देश्यतानिरूपितविधेयतास्ति। शाकटायने तेषां प्रत्याहारद्वाराः निर्देशं न विधाय साक्षाद्वर्णेमाध्यमेन प्रतिपादितम्। तद्यथा-

पाणिनीये	शाकटायने
अतो दीर्घो यञि (पा-७-३-१०१)	आद् मव्यतः (शा-४-२-३४)
सुपि च' (पा-७-३-१०२)	भ्यत्याः (शा-१-२-१६२)

५) हरिनामामृतव्याकरणम्ः

श्रीजीवगोस्वामिना विरचितेऽस्मिन् व्याकरणे साम्प्रदायिकताभावमादाय सूत्राणामुपन्यासो विहितः। श्रीहरेनामानुसारं व्याकरणप्रक्रियात्र साधिता। अस्मिन् पाणिनीयप्रत्याहाराः तत्र हरिनाम्नाभिहिताः।

पाणिनीये	हरिनामामृत
अक्	दशावतारः
अण्	अनन्तः
अच्	सर्वेश्वरः
हल्	विष्णुजनः

उपसंहारः

प्रत्याहारसूत्राणां विरचनेन तथा तत्सूत्रगतप्रत्याहारनिर्माणेन, अर्धमात्रालाघवेन पुत्रात्सवं: मन्यन्ते वैयाकरणा' इति वैयाकरसिस्वभावर्णसद्धलाघवोपायतया तेषां शास्त्रषु प्रयोगन पाणिनिना या स्वकीया सूक्ष्मेक्षिका प्रदर्शिता, सा हि विद्वत्सदसि प्रशंसिता, तदुत्तरवर्तिवैयाकरणैश्चानुसृता।

सहायकग्रन्थपञ्जी

१। महर्षिपाणिनि, "अष्टाध्यायी" सम्पादक, श्रीगोपालदत्तपाण्डेयः "अष्टाध्यायी (सूत्रपाठः)", वाराणसीः चौखाम्बा-सुरभारती-प्रकाशन्।

२। आचार्यवामनजयादित्य, "काशिकावृत्ति', द्वारिकादासशास्त्री, कालिकाप्रसादशुक्ल, "काशिकावृत्तिः (न्यास-पदमञ्जरीसहिता, प्रथमभाग)", वाराणसीः चौखाम्बा-सुरभारती-प्रकाशन्।

३। मिश्र, आचार्यविश्वनाथ, "परिभाषेन्दुशेखरः", वाराणसी, चौखाम्वा-सुरभारती-प्रकाशन्।

४। वर्धन, प्रमोद, कौण्डिन्यायन-धर्ममीमांसाचार्य, "पाणिनीयशिक्षा", वाराणसीः चौखाम्बाविद्याभवन।

५। नेने, गोपालशास्त्री, 'प्रौडमनारमा", वाराणसी, चौखाम्वा-संस्कृत-संस्थान्।

६। आचार्यपतञ्जलि, "महाभाष्यम् (नवाह्निकम्)", सम्पादक, रुद्रधरझाशर्मा, वाराणसीः चौखाम्वा-संस्कृत-सीरीज्।

७। आचार्यभर्तृहरि, "वाक्यपदीयम् (ब्रह्मकाण्डम्०", वामदेवाचार्य, वाराणसीः चौखाम्वा-कृष्णदास-एकादेमी।

८। भट्टोजिदीक्षित, "वैयाकरणसिद्धान्तकौमुदी", अनु. गिरिधरशर्मा, श्रीपरमेश्वरानन्दशर्माः, दिल्लीः मोतिलाल्-वनारसीदास।

९। आचार्यपतञ्जलि, "महाभाष्यम् (नवाह्निकम्)", सम्पा. दण्डिस्वामी-दामोदर्-आश्रम, कलकाताः दक्षिणेश्वर-रामकृष्ण-आश्रम, आद्यापीठ।

শ্রীমদ্‌ভগবদ্‌গীতায়—“বিশ্বমানব ধর্ম”

অনুপ প্রামাণিক

দ্বাপরযুগের শেষের দিকে কুরুক্ষেত্রসমরাঙ্গণে কুরুপান্ডবগণের মধ্যে যে ভয়ঙ্কর যুদ্ধ ঘটেছিল, এই যুদ্ধের প্রাক্‌কালে স্বজন নিধন চিন্তায় শোকাকুল অর্জুন যখন আমি যুদ্ধ করতে চাই না যুদ্ধার্থ সমবেত আত্মীয়গণকে চোখের সামনে দেখে আমার শরীর কাঁপছে রোমাঞ্চ হচ্ছে গান্ডীবধনু হাত হতে খসে পড়ছে[১] আমি নানারকম দুর্নিমিত্ত দেখছি আমার জ্ঞাতি ভ্রতা ধার্ত্তরাষ্ট্রগণ যদি আমাকে বধ করে তো করুক তাই আমার পক্ষে মঙ্গল কর।[২]

এইরূপ শোক বিহ্বল—তখন ভগবান কৃষ্ণ হ অর্জুন তোমার যখন এইরূপ দয়ার উদ্রেক হয়েছে, তা খুবই ভাল। এই ভাবান্তর দেখে আমি সন্তুষ্ট হচ্ছি। তুমি আর ক্ষত্রিয় নও। এখন ব্রাহ্মণ হয়ে গেছ। শম, দম, ক্ষমা প্রভৃতি ব্রাহ্মণোচিত গুণাবলী তোমাতে পরিস্ফুট হয়েছে। তাই তোমার ব্রাহ্মণের ধর্ম পালন করাই উচিত। যুদ্ধকর্ম ক্ষত্রিয়ের ধর্ম এ এখন আর তোমার ধর্ম নয়। অতএব তুমি যুদ্ধক্ষেত্র পরিত্যাগ করে বনে চলে যাও ভগবানের আরাধনা প্রভৃতি (যজন যাজন অধ্যয়ন অধ্যাপনা দান প্রতিগ্রহ রূপ) ব্রাহ্মণের ষট্‌ কর্মে মনোনিবেশ কর। তুমি এখন ক্ষত্রিয় হতে ব্রাহ্মণে উন্নীত হয়েছ তাই প্রশংসনীয় পুরুষ। এইরূপে অর্জুনকে সম্বর্ধিত করলেন না উপরন্ত তীব্র র্ভৎসনা সুরে বললেন

> “ক্লৈব্যং মাস্ম গমঃ পার্থ নৈতত্ত্বয্যুপপদ্যতে।
> ক্ষুদ্রং হৃদয়দৌর্বল্যং ত্যক্ত্বোত্তিষ্ঠ পরন্তপ।।” গীতা ২/৩

হে পরন্তপ অর্জুন তুমি যুদ্ধের মুখোমুখি দাঁড়িয়ে কি বলছ? ক্লীবতা পরিত্যাগ কর। তোমার ঐ রূপ শোকবিহবলতা হৃদয়ের দুর্বলতা ছাড়া কিছু নয় তুমি তা ত্যাগ কর। তোমার মত বীরের এইরূপ শোক বিহবলতা শোভা পায় না। ক্ষত্রিয়ের ধর্ম তোমার নিজ ধর্ম তা তুমি পরিত্যাগ করে অন্যের ধর্ম (ব্রাহ্মণের ধর্ম) গ্রহণ করতে পার না।[৩]

নিজ ধর্মের পানে তাকাও শোকবিবশ হয়ে কম্পিত হও না। অন্যায়ের বিরুদ্ধে যুদ্ধ করা ক্ষত্রিয়ের পক্ষে ধর্ম্যযুদ্ধ এ হতে শ্রেয়স্কর অন্য কিছু ক্ষত্রিয়ের নাই।[১] স্বধর্ম পরিত্যাগ করলে পর তুমি পাপভাক্‌ হবে। যুদ্ধে জয়লাভ করলে রাজ্য লাভ করবে আর মৃত্যু হলে স্বর্গে যাবে যে কোন একটা হবেই লোকসান বলে কিছু নেই। অতএব হে কৌন্তেয় তুমি যুদ্ধের জন্য দৃঢ় নিশ্চয় হও।[২]

ভগবান এইভাবে অর্জুনকে ক্ষত্রিয়ের ধর্ম যুদ্ধকর্মে প্রেরণা দিয়েছিলেন। ভগবানের বাক্যে চেতনা ঘুরে পেয়ে অর্জুন কুরুক্ষেত্র যুদ্ধে প্রবৃত্ত হয়েছিলেন। অর্জুনকে উপদেশ ছলে তিনি বিশ্বমানবের চিত্তে অঙ্কিত করে দিলেন যে বর্ণের জন্য (জাতির জন্য) যেই কর্মগুলি শাস্ত্রে উপদিষ্ট হয়েছে সেই কর্মগুলি সেই সেই বর্ণের ধর্ম তা যথাযথ পালন করাই সেই জাতির ধর্মাচারণ করা। ধর্ম কেবল মন্দির মসজিদ্‌ গীর্জায় আবদ্ধ নয়। প্রতি

মানব হৃদয় ধর্মের সাম্রাজ্য ইহা আচরণের বিষয়। কেবল অনুভবের বিষয় নহে। আচরণের দ্বারা একে প্রতিষ্ঠিত করা চাই। তবেই ব্যক্তি জীবন, সমাজ জীবন কল্যাণময় হবে। ইহাই গীতার ভগবদুদ্দিষ্ট বিশ্বমানব ধর্ম।

কথিত আছে—"ধর্মো রক্ষতি রক্ষিতঃ" ধর্মকে পালন করতে হবে ইহাই ধর্মের রক্ষা। পালনকারীকে ধর্ম রক্ষা করে। পালন ছাড়া ধর্ম কথায় মাত্র পর্যবসিত হয়। সেইরূপ ধর্মের দ্বারা কোন উপকার হয় না। শাস্ত্রে "বেদপ্রণিহিতং কর্ম ধর্মস্তন্মঙ্গলং পরম" ইহাই উক্ত আছে।

মানবজাতির জন্য বেদে উপবিষ্ট কর্মই ধর্ম। তার অনুষ্ঠানের দ্বারা ব্যক্তি জীবনে এবং সমাজ জীবনে সুস্থিতি সংহতি সমৃদ্ধি সাবিত হয়। বেদোক্ত বিশ্বমানব ধর্মই ভগবান গীতাগ্রন্থে সহজবোধ্য সুখবোধ্য করে সকলের জন্য প্রচার করেছেন। ধর্মকর্ম কেবল ইহ জীবনেই ফলপ্রদ হয় তা নয় পরলোকেও মোক্ষের সহায়ক হয়।

এই কথাই "কর্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয়ঃ" কথায় বলা হয়ছে। পুরাকালে জনক অশ্বপতি প্রভৃতি রাজর্ষিগণ শাস্ত্র-বিহিত নিজ নিজ কর্মের অনুষ্ঠানের দ্বারা চিত্তশুদ্ধি লাভ করে মোক্ষ জনক মহাজ্ঞান লাভ করেছিলেন।

কিন্তু কর্মই জীবকে এই সংসারে বদ্ধ করে রাখে "কর্মণা বধ্যতে জন্তুর্বিদ্যয়া চ বিমুচ্যতে" বিদ্যার দ্বারা (জ্ঞানের দ্বারা) জীব মুক্তি প্রাপ্ত হয়। এমতাবস্থায় কর্মের দ্বারা মোক্ষ লাভ হয় তা কেমন করে? এতদুত্তরে ভগবান—নিষ্কাম কর্মযোগের উপদেশ করেছেন। মোক্ষলাভের প্রতি সাক্ষাৎ কারণ যে তত্ত্ব জ্ঞান তা চিত্তের শুদ্ধি ব্যতীত লব্ধ হয় না। চিত্ত শুদ্ধির প্রধান উপায় নিষ্কাম কর্মানুষ্ঠান। কর্মফলের কামনা পরিত্যাগ পূর্বক যিনি ভগবানের প্রীতির নিমিত্ত আমার এই কর্মাচরণ, ইহা ভগবানের উপাসনা।

এই বুদ্ধিতে কর্মের অনুষ্ঠান করেন তাঁর কৃতকর্ম সংসারে বন্ধন সৃষ্টি করে না। চিত্তের বিশুদ্ধি সম্পাদন পূর্বক মোক্ষের সহায়ক হয়। এই কথাই "স্ব কর্মণা তমভ্যর্চ্য সিদ্ধিং বিন্দতি মানবঃ" গীঃ ১৮/৪৬ বলা হয়েছে। নিজ কর্মের আচরণ রূপ ভগবানের অর্চনার দ্বারা মানব সিদ্ধি = (মোক্ষ) লাভ করে। নিষ্কাম কর্মাচরণ ব্যতীত নৈষ্কর্ম্য সিদ্ধি = ব্রহ্ম স্বরূপে অবস্থান, সম্ভব হয় না। জ্ঞানের উৎপত্তি ছাড়া (জ্ঞান শূন্য হয়ে) সর্ব কর্মের পরিত্যাগ রূপ সন্ন্যাসের দ্বারা মোক্ষ লাভ হয় না।

> ন কর্মণামনারম্ভান্ নৈষ্কর্ম্যং পুরোযোঽশ্নুতে।
> ন চ সন্ন্যসনাদেব সিদ্ধিং সমধিগচ্ছতি।। গীঃ ৩/৪ শ্লোক।

উক্ত শ্লোকের শ্রীধর স্বামি কৃত টীকায় বলা হয়েছে—চিত্তশুদ্ধি সহকারে জ্ঞানোৎপত্তির পূর্ব পর্যন্ত বর্ণাশ্রমোচিত কর্ম গুলির অনুষ্ঠান করণীয়। অন্যথা চিত্তশুদ্ধির অভাবে জ্ঞানোৎপত্তি হবে না, চিত্তশুদ্ধি ছাড়া জ্ঞানশূন্য সন্ন্যাস হতে মোক্ষলাভ রূপ সিদ্ধিলাভ হয় না।[১] কৃতকর্ম কিভাবে চিত্তশুদ্ধি সম্পাদন পূর্বক মোক্ষ জনক হয় তা "ন কর্মণামনারম্ভাৎ" শ্লোক অনুধাবনা করলে পর বোঝা যায়। বিষ্ণু পুরাণে কথিত আছে সেই ভাবেই কর্ম করা উচিত যেভাবে কর্ম করলে পর কর্ম সংসার বন্ধনের কারণ হয় না এবং তাহাই বিদ্যা (জ্ঞান) যে বিদ্যা মোক্ষফলকে প্রসব। করে।[২] যিনি কর্মফলে আসক্ত হয় কর্ম করেন তাঁর দ্বারা কৃতকর্মই তাঁর সংসার বন্ধন সৃষ্টি করে। কিন্তু নিষ্কাম ভাবে কর্মানুষ্ঠানকারীর কর্ম সংসার বন্ধনের কারণ হয় না উপরন্তু চিত্তশুদ্ধি সম্পাদন দ্বারা মোক্ষের প্রযোজক হয়।

অতএব চিত্তশুদ্ধি সহকারে জ্ঞানের উৎপত্তি পর্যন্ত কর্ম করতেই হবে কর্ম ত্যাগ করা চলবে না। কর্ম না

করলে পর নৈষ্কর্ম্য সিদ্ধি ব্রহ্ম স্বরূপে অবস্থান স্বরূপ জ্ঞান নিষ্ঠা লাভই হবে না ইহাই গীতার সাবধান বাণী। (উক্ত প্রকার জ্ঞান নিষ্ঠা মোক্ষে অবশ্য প্রয়োজনীয়।) মহাভারতে উক্ত আছে—

ধারণাদ্ধর্মমিত্যাহুঃ ধর্মো ধারয়তে প্রজাঃ।
যৎ স্যাৎ ধারণ সংযুক্তং সধর্ম ইতি নিশ্চয়ঃ।। কর্ণ পর্ব-৫৫

যাহা ধারণ = (রক্ষা) করে তাহাই ধর্ম। ধর্মই প্রাণিকুলকে ধারণ করে রাখে। ভগবান কৃষ্ণ কর্তৃক ঐ রূপ ধর্মের লক্ষণ কথিত হয়েছে।। মানবকুলের জন্য শাস্ত্র বিহিত সৎকর্মই মানবকুলকে ধারণ ও পোষণ করে চলছে। সৎকর্মই ঐহিক সুখশান্তি সংহতি ও পারত্রিক পরম শ্রেয়োলাভের প্রকৃষ্ট উপায় তাই সৎকর্মকেই ধর্ম বলা যায়। ইহাই বিশ্বমানবের নিমিত্ত ভগবানের অমূল্য উপদেশ যা গীতায় বর্ণিত হয়েছে। অবশ্য ধর্মের ব্যাপকতা লক্ষণীয়।

মনুসংহিতায় দশবিধ ধর্মের কথা বর্ণিত আছে। যেমন—

"ধৃতিঃক্ষমা দমোঽস্তেয়ম্ শৌচম্ ইন্দ্রিয়নিগ্রহঃ।
ধীর্বিদ্যা সত্যমক্রোধো দশকং ধর্ম লক্ষণম্"।। মনুঃ ৬/৯২।

ধৃতি = সন্তোষ, ক্ষমা = শক্তিসত্ত্বে অপকার না করা। দম = বিষয় সংসর্গে ও মনের অবিকারিত্ব। অস্তেয় = চুরি না করা। শৌচ = মৃৎ জলাদির দ্বারা দেহ শুদ্ধি। ইন্দ্রিয় নিগ্রহ = ইন্দ্রিয়গণকে নিবৃত্ত করা। ধী = শাস্ত্রীয় জ্ঞান, বিদ্যা = আত্ম জ্ঞান, সত্য ও অক্রোধ = ক্রোধের কারণ সত্ত্বেও ক্রোধ না করা।

উক্ত দশবিধ ধর্ম পালনকারীর জীবনযাত্রা সুখ স্বাচ্ছন্দ্যময় হয়। এবং মানব সমাজের সুস্থিতি, সংহতি উত্তরোত্তর স্থাপিত ও বর্দ্ধিত হয়। তাই ঐগুলি সর্ব মানব ধর্ম। ভগবান বলছেন "নির্বৈরঃ সর্বভূতেষু যঃ স, মামেতি পান্ডব।।" গীতা ১১/৫৫।

হে অর্জুন যে ব্যক্তি সর্বজীবের প্রতি বৈরিভাব শূন্য (শত্রুতা শূন্য) সেই আমাকে প্রাপ্ত হয়।

"ত্রিবিধংনরকস্যেদং দ্বারম্ নাশনমাত্বনঃ।।
কামঃ ক্রোধস্তথা লোভ তস্মাৎএতৎত্রয়ং ত্যজেৎ।। গীঃ ১৬/২১

কাম, ক্রোধ, লোভ নামক রিপুত্রয় ব্যক্তি জীবন ও সমাজ জীবন বিধ্বংসী, এগুলিকে পরিত্যাগ করবে। ইন্দ্রিয় গ্রাম যার বশীভূত তারই জীবন মধুময় হয়। সেই ব্যক্তিই যথার্থ প্রজ্ঞাবান পুরুষ। "বশে হি যস্যেন্দ্রিয়াণি তস্য প্রজ্ঞা প্রতিষ্ঠিতা" গীঃ ২/৬১। নিজের আচরণের দ্বারা কাহাকেও উদ্বিগ্ন করবে না। পরের আচরণে স্বয়ং উদ্বিগ্নও হবে না। হর্ষ, অমর্ষ (পরশ্রীকাতরতা) ভয়, উদ্বেগ মুক্ত হবার, জীবের প্রতি দ্বেষরহিত, মৈত্রীভাবাপন্ন দয়াবান, অহঙ্কার শূন্য ক্ষামাশীল হবার উপদেশ গীতার অবদান। ঐগুলি মনুষ্য সমাজ গঠনেই গীতার প্রয়াস। ঐগুলিই শ্রী ভগবানের মুখনিঃসৃত গীতা বর্ণিত বিশ্ব মানব ধর্ম। যা ভঙ্গুর পার্থিব মানব জীবনকে অমরতা দায়ী অমৃত। যার অভাবে মানব জীবন মরু ভূমি। স্বার্থ সঙ্কীণতার পশুভাবের পিঞ্জর। অতএব ধর্ম মানবকে সঙ্কীর্ণ করে পরস্পর বিচ্ছেদ ঘটায় এইরূপ চিন্তা না করাই ভাল। ধর্ম মানুষে মানুষে প্রীতি বন্ধন সৃষ্টি করে। জীব সেবার দ্বারা ভগবানেরই অর্চনা করা হয় এই আত্মচেতনা জাগরিত করে। ব্যক্তি জীবনকে সমষ্টি জীবনে রূপান্তরিত করে। "বসুধৈব কুটুম্বকম্" এই ব্যাপক আত্মীয়তার বাতাবরণ সৃষ্টি করে। ধর্ম বিচ্ছেদ ঘটায় না।

ভাগবতে উল্লিখিত আছে—

"যো মাং সর্বেষু-ভূতেষু সন্তামাত্মানমীশ্বরম্।
হিত্বার্চাংকুরুতে মৌঢ্যাদ্ ভস্মন্যেব জুহোতি সঃ।।
(ভাগবত ৩য়/স্কন্ধ ২৯ অধ্যায় ২২ নং শ্লোক।)

ইহাই ধর্মীয় চেতনা আত্মীয়তার মধুর সূত্রে বিশ্বকে চেনা। সর্বভূতে (সর্বজীবে) ভগবান বিদ্যমান, সেই ভগবানের জ্যান্তমন্দির জীবকে পরিত্যাগ করে যে কেবল প্রতিমাতে ভগবানের পূজা করে সে ভস্মে ঘৃতাহুতি নিক্ষেপ করে। এই ধর্মীয় চেতনার মধ্যে সঙ্কীর্ণতার স্থান কোথায়? এর চেয়ে উদার উপদেশ আর কি হতে পারে। ধর্ম এই ভাবে মানব চিত্তকে শোধন করে ব্যক্তি মানবকে বিশ্ব মানবের সাথে মিলিত করে। যথার্থ মনুষ্যত্বকে জাগরিত করে। উহা ৫ হাজার বছর পূর্বে ভাগবতের অবদান। ইদানীং যুগে স্বামী বিবেকানন্দের কণ্ঠে যা ধ্বনিত হয়েছে—

"বহুরূপে সম্মুখে তোমার ছাড়ি কোথা খুঁজিছ ঈশ্বর।
জীবে প্রেম করে যেই জন সেইজন সেবিছে ঈশ্বর"।

আজ হতে বহু বর্ষ পূর্বে উপানিষদে যে চেতনা মূর্ত্ত হয়েছিল তাহা—

একো বশী সর্বভূতান্তরাত্মা, একং রূপং বহুধা যঃ—করোতি ইত্যাদি—কঠ ২/২/১২।

সেই একই ঈশ্বর সর্বভূতের অন্তরে অবস্থিত অন্তরাত্মা। তিনি এক হয়েও বহুরূপে প্রকাশিত। সেই মহতী চেতনাই গীতাতে মূর্ত্ত।

"অহমাত্মা গুড়াকেশ সর্বভূতাশয়স্থিতঃ" গীঃ ১/২০।
"ক্ষেত্রজ্ঞাঞ্চাপি মাং বিদ্ধি সর্বক্ষেত্রেষু ভারত"।। গীঃ ১৩/১২।

আমি সর্বভূতের অন্তরে আত্মরূপে বিরাজমান। শরীর রূপ ক্ষেত্রে আমাকেই ক্ষেত্রজ্ঞ = আত্মা বলে জান। শ্রী ভগবানের এই মূল্যবান উপদেশ সর্বদেশ কালব্যাপী আত্মীয়তার বীজ বপনকারী মনুষ্য জীবনের সর্ববিধ অভ্যুদয়ের মহামন্ত্র, মানব সমাজকে সঙ্কীর্ণ বিষবাষ্প মুক্ত করার পরমৌষধি। গীতা প্রোক্ত উক্তবিধ মহান ধর্ম নিঃশঙ্ক চিত্তে কায়মনোবাক্যে গ্রহণ করতে হবে। ইহাকে অবহেলা করা চলবে না। অবহেলা করলে মানবতাই বিপন্ন হয়ে যাবে।

"চাতুর্বর্ণ্যং ময়া সৃষ্টম্"—গুণকর্ম বিভাগশঃ গীঃ ৪/১৩।

এই কথার দ্বারা শ্রী ভগবান গুণকর্মানুসারী ব্রাহ্মণাদি জাতি চতুষ্টয়ের কথা বলেছেন। ইহা অনেকেই বলে থাকেন অর্থাৎ যে কোন কুলে জন্মগ্রহণকারী হলেও যদি সেই ব্যক্তির মধ্যে ব্রাহ্মণোচিত গুণ-কর্ম দেখা যায় তাহলে সেই ব্যক্তি ব্রাহ্মণই হয়ে থাকে। কুলানুসারে ক্ষত্রিয় বৈশ্য বা শূদ্র হবে তা নয়।

যদি তাই হয় তাহলে কুরুক্ষেত্র যুদ্ধের প্রাক্ কালে অর্জুনের মধ্যে যখন ব্রাহ্মণোচিত গুণাবলী প্রকাশিত হল যখন তিনি যুদ্ধ করতে চাইছেন না তখন ভগবান তাঁকে ক্ষত্রিয়ের ধর্ম যুদ্ধকর্মে প্রবৃত্ত করেছেন। তখন তো ভগবান হে অর্জুন তুমি এখন আর ক্ষত্রিয় নও ব্রাহ্মণ হয়ে গেছ তোমার যুদ্ধ ত্যাগ পূর্বক তপস্যাদি ব্রাহ্মণের কর্মই শ্রেয় তাই তুমি কর। তা না বলে যুদ্ধের মুখোমুখী দাঁড়িয়ে কাপুরুষোচিত শোক কোরো না। যদি তুমি তোমার (ক্ষত্রিয়ের) ধর্ম যুদ্ধকর্ম পালন না কর তাহলে পাপী হয়ে যাবে। তাই নিজের ধর্মের দিকে চিন্তা করে শোকে কম্পিত হয়ো না। যুদ্ধ কর—ভগবানের এই কথার দ্বারা স্পষ্ট প্রতীত হয় অর্জুনের মধ্যে শমদমাদি ব্রাহ্মণোচিত গুণাবলী তদানীং প্রকটিত হলেও অর্জুন ক্ষত্রিয়ই ছিলেন ব্রাহ্মণে পরিণত হন নাই।

এর দ্বারা ভালভাবে বুঝা যায় জাতি বা বর্ণ ব্যবস্থা গুণ বা কর্মানুসারে নয়। জন্মানুসারেই জাতি ব্যবস্থা ভগবানের বিধান। উক্ত শ্লোকে তিনি "সৃষ্টম্" এই পদটি বলেছেন। এর দ্বারা ব্রাহ্মণাদি জাতি তাঁর দ্বারাই সৃষ্ট। এই সৃষ্ট ব্রাহ্মণাদির মধ্যে ভাগ ভাগ করে গুণ ও কর্মের সন্নিবেশ তিনিই করেছেন। ইহা জগতের সৃষ্টি কালেই ভগবৎ কর্ত্তৃক সৃষ্ট হয়েছে। অতএব পরবর্ত্তিকালে মন গড়া করে কেউ একজাতি হতে অন্য জাতিতে পরিবর্ত্তিত

হয়ে যাবে তা হবে না। যদি তাই হয় তাহলে সমাজে চরম এক বিশৃঙ্খলার উদ্ভব হবে। কারণ একই মানুষ কোন সময় সত্ত্বগুণাধিক্যে ব্রাহ্মণ কোন সময় রজোগুণাধিক্যে ক্ষত্রিয় কোন সময় বৈশ্য কোন সময় শূদ্র—এই প্রকার চরম অব্যবস্থা মাথা তুলে দাঁড়াবে। যদি তাই মেনে নেওয়া যায় তাহলে অর্জুনের বর্ণ সঙ্করাশঙ্কায় দুর্ভাবনা অমূলক হয়ে পড়ে। কারণ প্রকৃতির নিয়মেই সব মানুষই কখন ব্রাহ্মণ, কখন ক্ষত্রিয়, কখন বৈশ্য, শূদ্রে রূপান্তরিত হয়ে চলেছে ইহা প্রাত্যহিক ব্যাপার।

অতএব বর্ণ সাঙ্কর্য প্রকৃতির নিয়মেই অনিবার্যরূপে ঘটে চলেছে। এ বিষয়ে অর্জুনের মত বুদ্ধিমান ব্যক্তি শোক করতেন না। ইহা অবশ্যই চিন্তনীয়। সর্ব প্রমাণ শিরোমণি বেদে ব্রহ্মের মুখ হতে ব্রাহ্মণ, বাহু হতে ক্ষত্রিয়, উরু হতে বৈশ্য ও পদদ্বয় হতে শূদ্র এই চতুর্বর্ণের জন্মের কথা উল্লিখিত আছে।

"ব্রাহ্মণোঽস্য মুখমাসীৎ-বাহ্বোঃ রাজন্যঃ কৃতঃ।
উরুর্যদস্য তদ্‌বৈশ্যঃ পদ্ভ্যাং শূদ্রোঽজায়ত"।।

"প্রপন্ন পারিজাতায় তোত্রবেত্রৈকপাণয়ে
জ্ঞানমুদ্রায় কৃষ্ণায় গীতামৃতদুহে নমঃ"।।

টীকা

১। বেপথুশ্চ শরীরে মে রোমহর্ষশ্চ জায়তে।
গাণ্ডীবং সংস্রতে হস্তাৎ ত্বক্ চৈব পরিদহ্যতে।। গীঃ ১/২৯

২। নিমিত্তানি চ পশযামি বিপরীতানি কেশব।
ধার্ত্তরাষ্ট্রা রণে হন্যুস্তন্ মে ক্ষেমতরংভবেৎ।। গীঃ ১/৪৫

৩। স্বধর্মমপি চাবেক্ষ্য ন বিকম্পিতুমর্হসি।
ধর্ম্যাদ্ধি যুদ্ধাৎ শ্রেয়োহন্যৎ ক্ষত্রিয়স্য ন বিদ্যতে।। গীতা ২/৩১

৪। অথ চেত্ত্বমিমং ধর্ম্যং সংগ্রামংন করিষসি।
ততঃ স্বধর্মং কীর্ত্তিঞ্চ হিত্বা পাপমবাপ্স্যসি।। গীঃ ২/৩৩।

৫। হতোবা প্রাপ্স্যসি স্বর্গং জিত্বা বা ভোক্ষ্যসে মহীম্।
তস্মাদুত্তিষ্ঠ কৌন্তেয় যুদ্ধায় কৃত নিশ্চয়ঃ।। ২/৩৭

৬। সম্যক্ চিত্তশুদ্ধ্যা জ্ঞানোৎপত্তি পর্যন্তং বর্ণাশ্রমোচিতানি কর্মাণি কর্ত্তব্যানি। অন্যথা চিত্ত শুদ্ধ্যভাবেন জ্ঞানানুৎপত্তেরিত্যাহ ন কর্মণামিতি। চিত্তশুদ্ধিং বিনাকৃতাৎ সন্ন্যসনাদেব জ্ঞান শূন্যাৎ সিদ্ধিং মোক্ষং ন সমধিগচ্ছিত। ন প্রাপ্নোতি।। গীঃ ৩/৪ শ্লোকের শ্রীধরী টীকা।

৭। "তৎকর্ম যন্নবন্ধায় সা বিদ্যা যা বিমুক্তয়ে।" বিষ্ণুপুরাণ—১ম অংশ/১৯ অঃ/৪১।

शब्दानुशासने सूत्ररहस्यविचारः

डा. गिरिधारी पण्डा

निखिलेऽस्मिन् वाङ्मये अभिव्यक्तिसाधने उपदिश्यमानेषु उपायविशेषेषु सर्वोत्कृष्टा सुस्पष्टा समृद्धा च माध्यमविशेषा भाषा इत्यामनन्ति भाषाविज्ञानविदः। माध्यमभूतायाः अस्याः भाषायाः परिधौ ये निवसन्ति ते सर्वे परस्परमवगन्तुं समर्थाः भविष्यन्ति। विभिन्नेन कारणेन कौशलस्य व्यतिक्रमेण वा विच्युतिं प्राप्य शब्दः ध्वनिविज्ञानामित्मकां शय्यामवलम्ब्य भाषारूपेण प्रयोगक्षमा भवति। इदमेव विचारणेनालं यत् प्रवहन्त्याः भाषायाः विकसनं संकोचनं विलोपनमित्यादीनि प्रक्रियात्मकानि कार्याणि सरितां शय्यावदाकल्यन्ते। कस्मिंश्चिदुपाये अवसरे वा इमानि कार्याणि प्रकल्पन्ते प्रवर्त्तन्ते च अन्यथा तन्निर्णेतुम् अववोधयितुं प्रयोक्तु ं वा न शक्यते। अत एव एकस्मिन् अनुशासने बन्धने नियमेन तस्याः किल भाषायाः परीक्षणमपेक्ष्यते, यत् खलु शब्दमर्य्यादया शब्दानुशासनमिति व्यवहारं लभते। शब्दानुशासनं नाम व्याकरणम्, यत्र साधुशब्दानाम् असाधुशब्दानां न वैधानिकी विचारधारा प्रवर्त्तते। शब्दानुशासने व्याकरणे वा प्रतिपादितायामेतस्यां विचारधाराया यत् अलौकिकम् अनन्यम् अनुपमम् उपायं साधयति, स्वल्पीयसा आयासेन अल्पीयसा कालने च याथार्थ्यं प्रतिपादयति। व्याकरणपरिभाषायां तत् 'सूत्रम्' इति पदेनाभिधीयते, येन माध्यमेन शब्दानुशासनं व्याकरणं वा पूर्णाङ्गं लभते। तत्र शब्दानुशासने अवलम्बितं सर्वं वैज्ञानिकं सूत्रमाध्यमेनैव परिष्कृतं जायते।

'सूत्रम्' इति पदस्योपादनं सर्वथा लध्वर्थं हि उद्देश्यम्। एतस्मिन् विधौ पदानां प्रयोगार्हभूतानां च कृते एकं संघटनं सजातीयतामादाय संस्थाप्यते। तत्र प्रयोगविज्ञाने स्वरूपंविचार्य समानतायां क्रियायाः अवलम्वनं विधीयते। शब्दस्य मूलप्रकृतौ कस्मिन् भागे विकाशः विकारः विश्लेषणं वा अवधार्यते, तत् वि चार्य सम्पंद्यमानाया क्रियायां समानता अवलम्ब्यते। एवं च किमात्मकं कार्यं तस्य स्वरूपं वा इति विचारपुरःसरं कार्यविधानं साधनं वा निरूप्यते उपदिश्यते च। तत्र पुनः शब्दानुशासने शब्दोपपादनप्रसङ्गे च शब्दोपदेशे प्रकृतिनिर्देशे च संक्षिप्तानुशीलनेन सर्वथा अवधार्यते। इदं तत्रावधेयं यत् समानरूपस्य क्रियमाणस्य कार्यस्य कृते यत्र व्यतिक्रमः लक्ष्यते तदेवोपस्थाप्यते। किमात्मकस्य व्यतिक्रमः, तदपि अवधार्यते। कार्ये कुत्र निषेधः, कुत्र विकल्पः, कुत्र वा उभयविध इति सर्वं निर्दिश्यते। सूत्रे अल्पाक्षरेण समन्वितेन पदेन बहुविधस्य तात्पर्यस्य उपस्थापनं कर्तव्यं जायते इति सूत्रलक्षणात् तस्मात् प्रतिपद्यते। तथा हि-भाष्यकारः पाणिनेः कृते सूत्रकारशब्दस्य प्रयोगः साधु चिन्तितवान्। "पाणिनेः सूत्रकारस्य" इति। पुनश्च पाणिनिना शब्दाः प्रोक्ताः किं तर्हि सूत्रम्।'[१]

अयं 'सूत्रम्' इति शब्दः न तावत् पारिभाषिकः, अपि तु अन्वर्थसंज्ञकः। विवक्षितानां विषयाणां संक्षिप्ततया तर्कमार्गेण एकत्र येन विधिना उपस्थाप्यते तद् भवति 'सूत्रम्' इति अस्य तात्पर्यार्थः। 'अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्' 'लघूनि सूचितार्थानि' इत्यादीनि यानि वचनानि एतस्य लक्षणार्थम् उपापादितानि, तानि सूत्रवेष्टने इति घात्वर्थतात्पर्येण पल्लवितानि, नान्यद्रहस्येण विचारितानि। सूत्रीयते इति सू त्रमिति या व्युत्पत्तिः, सा तात्पर्यप्रतिपादनाय अलम्। संक्षिप्ततया प्रतिपादनमेतस्य वैशिष्ट्यम् इति विवेकः। शास्त्रीयकोषग्रन्थेषु अन्यत्र च एतत् तात्पर्येण एतस्य विवेचनं विहितं दृश्यते।

अल्पाक्षरमसन्दिग्धं सारवतविश्वतोमुखमेतत् सूत्रं शब्दानुशासनप्रक्रियया संक्षेपेन समासेन वा पदसाधुत्वसम्पादनाय उद्दिष्यम् ुपापादितं वा। एकस्यैवोदाहरणस्योपस्थापनेन अलं--"इको यणोऽचि"[२] इति पाणिनीयं सूत्रम्-अष्टाध्यायाः षष्ठोऽध्यायस्य प्रथमपादस्य सप्तसप्ततिसूत्रम्। पञ्चाक्षरात्मकमिदं सूत्रम्। यस्य वृत्तिस्तु 'इकः स्थाने यण् स्यादचि संहितायां विषये'। अत्रेदमेव तात्पर्यं यत् इकः नाम इक् प्रत्याहारस्य स्थोने-यण् नाम यण् प्रत्याहारः स्यात् अचि संहितायां विषये। तत्र 'हलन्त्यम्' (पा. सू. १-३-३) 'आदिरन्त्येन सहेता' (पा. सू. १-१-७१) इति सूत्रद्वयमाश्रत्यि प्रत्याहाराः सिध्यन्ति। इक् = इ, उ, ऋ, लृ, यण् = य्, व, र, ल्। 'यथासंख्यमनुदेशः समानम्' 'स्थानेऽन्तरतमः' (पा. सू. १-१-५०) इत्यादिना इकारस्थाने यकारः, उकार स्थाने-व् कारः, स्यात् अचि...। येन सुधी + उपास्यः = सुद्ध्युपास्यः, अनु + अयः = अन्वयः, पितृ + आलयः = पित्रालयः, लृ + आकृतिः = लाकृतिः इत्यादीनां पदानां रूपसिद्धिरनायासेन जायते। कथनस्यायमेवाशयः यत् व्याकरणपरिभाषायामन्वर्थसंज्ञकेऽस्मिन् सूत्रे लघुना उपायेन तर्कमार्गेण पदसाधुत्वसाम्पादनतथ्यानि उपपादितानि विद्यन्ते, यानि आश्रित्य शब्दानुशासनप्रक्रिया पल्लविता, शब्दानुशासनं शास्त्रं व्याकरणं च शब्दनिकायात्मके कानने विकसितं जातम्।

महाभाष्यकारः व्याकरणस्य निर्वचनावसरे 'सूत्र' प्रयोगः' इति उभयं व्याकरणमिति प्रतिपादितवान्। केवलं सूत्रव्याकरणं न प्रयोगेऽपि व्याकरणं न तदुभयविधं समुदितं भवत व्याकरणम्। उभयथा पक्षे अनेकाः अनुपपत्तयः उपपादिताः दृश्यन्ते। तदुक्त्या-"[३]लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति। किं पुनर्लक्ष्यम्, किं वा लक्षणम् शब्दो लक्ष्यः सूत्रं लक्षणम्। एवमप्ययं दोषः समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्त्तते। अथवा पुनरस्तु सूत्रम्-सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति। नैष दोषः। व्यापदेशिवद्भावेन भविष्यति।[२१] सूत्रात्मकस्य व्याकरणस्य एतिह्यविषये स्वरूपविषये च यद्यपि सृष्टतया काचिदुपलब्धिर्नोपगम्यते, तथापि पाणिनीयं व्याकरणं सूत्रविहितेन मार्गेणोपपन्नमिति सिद्धान्तः।

ऐतिह्यानुसारं व्याकरणनिकाये सूत्रत्मिका परम्परा ऐन्द्रव्याकरणादारभ्य प्रारब्धा। तत्राऽपि सम्प्रदायद्वयम् ऐन्द्रसम्प्रदायः माहेश्वरसम्प्रदायश्च। त्रिमुनिव्याकरणस्य पर्य्यालोचनातः प्रतिभातं जायते यत् वार्त्तिककारः कात्यायनः ऐन्द्रसम्प्रदायस्य आचार्यः। सूत्रकारः भगवान् पाणिनिः माहेश्वरसम्प्रदायस्य आचार्यः। सम्प्रदाये केवलमुपपादनस्य भिन्नता किन्तु साधुत्वसम्पादने एकरूपता इति।

सूत्रसंघटनेन आचार्यपाणिनेः ख्यातिरनस्वीकार्या माहेश्वरसम्प्रदायमाश्रित्य महामुनिः पाणिनिः

शब्दशास्त्रप्रक्रियां प्रवृत्ति च अधिगम्य सूत्रात्मकविधिना व्याकरणशास्त्रस्योपपादनं साधितवान्। तेन विरचितः अष्टाध्यायीग्रन्थः सूत्रद्वारा एव पर्यवेशितः। तत्रस्थसुत्रसंख्या अत्र संक्षेपेन विचारिता-

१. अध्यायः	प्रथमपादः	द्वितीयपादः	तृतीयपादः	चतुर्थपादः
प्रथमः	७५	७३	९३	११०
द्वितीयः	७२	३८	७३	८५
तृतीयः	१५०	१८८	१७६	११७
चतुर्थः	१७८	१४५	१६८	११४
पञ्चमः	१३६	१४०	११९	१६०
षष्ठः	२२३	१९९	१३९	१७५
सप्तमः	१०३	११८	१२०	९३
अष्टमः	७४	१०८	११९	६८

१. चतुःसहस्रीसूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह॥
३९८+ १४= ३११५ (स्वरसिद्धान्तचन्द्रिका)

३. त्राणि सूत्रसहस्राणि तथा नवशतानि च।
षण्णवअति च सूत्राणां पाणिनिः कृतवान् स्वयम्॥

४. सिद्धान्तकौमुदी-३१७८+ १४
(माहेश्वरसूत्राणि) = ३११२

लौकिकप्रक्रियायां व्याख्यातानि सूत्राणि-३३८६
वैदिकप्रक्रियायां व्याख्यातानि सूत्राणि-२६३
३२१ (स्वरप्रक्रिया)
माहेश्वरसूत्रणि १४

संख्यागतं तथ्यं किमपि भवतु सूत्रमाध्यमेन शब्दगतं सर्वं रहस्यं समुपपादितं विद्यते तत्र, येन प्रयोगाविज्ञाने साधुशब्दानामुपयोगः विधीयते। दण्डकन्यायेनाऽत्र अष्टाध्याय्यां यानि सूत्रण्युपदिष्टानि सन्ति, तानि सर्वाण्येव व्याकरणशास्त्रस्य मूर्धन्यभूतानि, येन शब्दशास्त्रमिदं पल्लवितं जायते।

तत्र अष्टसु अध्यायेषु अध्यायक्रमेण प्रतिपादितविषयाणां समुपस्थापनं संक्षेपेनाऽत्र प्रस्तूयते।

प्रथमोऽध्यायः-संज्ञापरिभाषा (विक्षिप्तभावेन)

अशिष्यप्रकरणम्-	१/२/५१-५७
एकशेष-	१/२/६४-७३
इत्संज्ञा-	१/३/२-१

आत्मनेपदम्-	१/३/१२-७७
परस्मैपदम्-	१/३/७८-९३
कारकम्-	१/४/२३-५५
निपातः, गतिः, कर्मप्रवचनीयम्-	१.३.५६-९६
द्वितीयोऽध्यायः-	
समासः-	२.१.१-२.२.३८
कारकम्-	१.३.२-७३
लिङ्गम्, संख्या-	२.४.१-३१
धात्वादेशः-	२.४.३५-३९
लुग्विधानम्-	२.४.५८-८४
तृतीययोऽध्यायः-	
सनाद्यन्ताः-	३/१/५-३२
लकारः	३/१/३३-९०
कृदन्तं-कृत्या-	३/१/९१-१३२
तृजादि-	३/१/१३३-३/४/७६
तिङन्तम्-	३/४/७७-११७
चतुर्थोऽध्यायः, पञ्चमोऽध्यायः-	
ओङ सुपः-	४/१/२
स्वाप्रत्ययाः-	४/१/३-८१
तद्धितः/समासान्तः-	४/१/७६-५/४/१६०
षष्ठोध्याः-	
द्वित्वविधिः	६.१.१-१२
सम्प्रसारणाम्-	६/१/१-१२
आत्वप्रकरणम्-	६/१/४४-५६
अमागमः-	६/१/५७-५१
आदेशः (स, न)	६/१/६०-६३
लोकः-	६/१/६४-६८+
लुक् विधानम्	६/१/७४-९८
सन्धिः-	६/१/७४-९८

स्वरविधानम्-	६/१/१०४-११० (पूर्वमन्तोदात्तः)
उत्तरपदादाद्युदात्तः-	६/१
सुट् प्रकरणम्-	६/१/१३१-१५१
स्वरविधानम्-	६/१/१५२-२१७ ६/२/१-१९९
अलुक्विधिः-	६/३/१-२३
आवङ् आदेशाविधिः-	६/३/२४-३१
ईत्, इट्, द्यावा, दिवम्-	
उषासानिपातनसिद्धिः-	६/३/३३-४२
पुंवद्भावप्रकरणम्-	६/३/४२-४४
ह्रस्वविधिः-	६/३/६०-६५
आगमविधिः-	६/३/६६-७५
आदेशविधिः-	६/३/७६-९७
आगमविधिः-	६/३/९८-९९
आदेशविधिः-	६/३/१००-१०९
दीर्घाप्रकरणम्-	६/३/११०-१३८
अङ्गाधिकारः-	६/४/१-१८
असिद्धत्वम्ः-	६/४/२२-१७५

सप्तमोऽध्यायः-

अङ्गाधिकारे	१/१-७/४
वृद्धिकार्यसहिम्-	७/२/७,११४-७/३/३५
इडागमाहितम्-	७/२/८-७८

अष्टमोऽध्यायः-

द्वित्वविधिः-	८/१/१-१५
वाक्ये स्वरविधिः आदेशविधिश्च-	८/१/१६-७४
असिद्धत्वम्-	८/२/११-८/४/६७

सुत्रेषु कार्यानुसां कार्यविधेः ाप्रतिपादनानुसारं च षड्विधप्रकारभेदव्यवस्था कल्पनीया विद्यते। संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारश्चेति भावेन, यथोक्तं-

संज्ञा च परिभाषा च विधिर्नियम् एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

"तत्र च नामकरणं संज्ञा"[२५]। संज्ञा-सूत्राणां सूत्रोपात्तपारिभाषिकपदानामुपादाने वृद्धि-गुण-प्रत्याहार विभाषा-सर्वर्णोत्यादि-भावेन प्रसिद्धिः। प्रायतः सज्ञासूत्रसहकारेण विधिसूत्राणां प्रवृत्तिार्जायते। यथा-"अदेङ्गुणः"[२६] इति गुणसंज्ञा-विधायक-सूत्रमाध्यमेन 'आद्गुणः"[२७] इति विधिसूत्रस्य कार्य विधीयते।

"अनियमे नियमकारिणी परिभाषा[२८]"। परितो भाषन्ते इति परिभाषा। अष्टध्याय्यां पाणिनिप्रोक्तानि पञ्चाशत्संख्यकानि परिभाषासूत्राणि सन्ति, येषामुपयोगित्वं केवलमष्टाध्यायीस्थ-विधिसूत्राणां प्रवृत्तिसाधनमुद्देश्यम्। एतद्व्यतिरिच्य पाणिनीयसूत्राणामर्थाववो धनाय व्याख्येयपरिभाषारूपेण बहूनि परिभाषा-बचनानि सन्ति, यानि पाणिनीयसूत्रैः ज्ञापितानि वाचनिकानि लोकन्यांयसिद्धानि वा सन्ति। सूत्रात्मकपरिभाषां विना एताः परिभाषाः व्याख्येयपरिभाषारूपेण प्रसिद्धाः। यथा-'व्याख्यानतो विशेशप्रतिपत्तिर्नहि सन्देहादलक्षणम्'[२९] "निर्दिश्यमानस्यादेशाः भवन्ति'[३०], "एकदेशविकृतमनन्यवत्"[३१] इत्यादिभावेन। एतादृशानां परिभाषाणां स्वरूपनिरुपणावसरे भूतिकारेणोक्तं यत्-"संकेतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारक-शास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधकसहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिश्रयुच्चरितभिन्नत्वम्"[३२]। "तस्मिन्निति निर्दिष्टे पूर्वस्य"[३३] इत्यादिकं पारिभाषिकं सूत्रं तु पाणिनिना साक्षादुच्चारितम् एतेषां परिभाषासूत्राणां प्रयोगास्तु व्याकरणशास्त्रस्य प्रयोगविज्ञाने साधुत्वसम्पादनार्थं ववधीयते।

"कर्त्तव्यत्वेनोपदेशो विधिः"[३४]। षड्विधेषु सूत्र-भेदेषु 'विधिसूत्रं' 'शास्त्रं' वा प्रमुखं स्थानमर्जयति। स च विधिः-१. सामान्यविधिः २. वैकल्पिकविधिः ३. निषेधविधिः ४. नित्यविधिः ५. परविधिः ६. अन्तरङ्गविधिः ७. वहिरङ्गविधिः ८. असिद्धविधिः ९. असरूपविधिः १०. सन्निपादविधिः ११. निपातनसिद्धविधिः १२. अपवादविधिः। एतेषां विधिशास्त्राणामुपकारत्वेन इतराणि सूत्राणि शास्त्राणि च उपादेयानि वर्त्तन्ते। तेषामेव विधिशास्त्राणां सञ्चरणे अनेके उपायाः प्रतिपादनीयाः वर्त्तन्ते, तत्र आचार्याणां रहस्यं गोपायितं वर्त्तते, येन विधिसूत्राणां प्रवृत्तिः नियम्यते निरूप्यते च। वचनमात्रेण उपस्थापनेन अलम्-१. कार्यमनुभवन् कायनिमित्ततया नाश्रीयते २. यत्र अनेकविधमान्तर्य्यं तत्र स्थानतः आन्तर्यः वलीयः कृद्ग्रहणे गतिकारकोपपादानां ग्रहणम्। ४. असिद्धं वहिरङ्गमन्तरङ्गे ५. वार्णादाङ्गः वलीयः ६. येन नाप्राप्ते यो विधि आरभते स तस्य वाधको भवति ७. अभ्यासे विकारेषु वाध्यवाधकभावो नास्ति इत्यादीनिं।

कार्यप्रकारात् विधिशास्त्राणामपि प्रकारभेदो वर्तते। यथा-एकशेषः, समासविधानम्, विभक्तिविधांनं, तिङन्तं, स्त्री प्रत्ययः, तद्धितंः, समासान्तः, सम्परसारणम्, अगमः, आदेशः, लोपः, लुक्विधिः, सन्धिः, स्वरविधानम्, निपातनसिद्धः, पुंवद्भावः, ह्रस्वरिधिः, द्वित्वविधश्चेत्यादयः स्थालीपुलकन्यायेन अष्टध्यायाः विषयविन्यासमादाय मया अत्रोपस्थापितम्।

"बहुत्र प्राप्तौ संकोचनं नियमः"[३५]। अन्यनिवृत्तिफलकत्वे सति सिद्धार्थप्रतिपादकत्वं नियमसूत्रत्वम्

विधिसूत्रस्य प्रवृत्तिसंकोचनाय यत् सूत्रं संघटितं तत् नियमसूत्रमिति किमपि कार्यमनेन विधयते। परन्तु विधीनां नित्यप्रवृत्तौ सत्यां नियमयति। संज्ञापरिभाषाधिकाराणां सूत्राणां कृतेऽपि स्थलविशेषमादाय नियमनं जायते। इदं द्विविधं-विधेयात्मकं नियमसूत्रं, तद् यथा-"आकडारादेका संज्ञा"[३६] (१.४.१), निषेधात्मकनियमसूत्रं 'तद्यथा-"पदान्तस्य"[३७] (८/४/३७) शास्त्रीयं प्रतिवचनमधिगम्यते, प्राप्तौ सत्यामारभ्यमाणो विधिः नियमाय कल्प्यते।

"अन्यतुल्यत्वविधानम् अतिदेशः"[३८]। प्रायशः पाणिनीयव्याकरणे पञ्चनवति (९५) संख्यकानि सूत्राणि अतिदेशस्य कृते उदिष्टानि सन्ति यस्य कार्यणि रूपातिदेशः कार्यतिदेशः इत्यदिभावेन सप्तविभागः संकलिताः वर्तन्ते। कार्यप्रकारात् द्वात्रिंशत्प्रकाराः एते विषयाः भवन्ति। ते यथा-१. आद्यन्तवत् २. अन्तादिवत् ३. स्थानिवत् ४. ङित्वत् ५. कित्वत् ६. युत्वत् ७. पुंवत् ८. पूर्ववत् ९. आम्प्रत्ययवत् १०. एक्वत् ११. पराङ्वत् १२. परवत् १३. कर्मवत्। १४. वर्तमानवत् १५. अनद्यतनवत् १६. लङ्वत् १७. भूतवत् १८. भववत् १९. धर्मवत् २०. अंकोवत् २१. कितूवत् २२. समुहवत् २३. असिद्धवत् २४. चिण्वत् २५. लट्वत् २६. सनवत् २७. बहुब्रीहिवत् २८. कर्मधारयवत् २९. अविद्यामानवत् ३०. णिद्वत् ३१. आमप्रत्ययवत् ३२. अप्लुवत्। एतत् प्रकारकमादाय विधिसूत्रं प्रवर्त्तते। "अस्मिन् तदवुद्धिः" इत्यस्य तात्पर्यम्। अयं विधिः अनित्य" मिति। किन्तु भाष्ये क्वापि अनुलिखितत्वात् अस्य प्रामाण्यं किमपि नास्ति।

'उत्तरप्रकरणव्यापी अधिकारः" अष्टाध्याय्याम् ७५ संख्यकानि अधिकारसुत्राणि वर्त्तन्ते। विधिसुत्रैकवाक्यतया वोधजनकत्वमधिकारत्वम्। अथवा स्वदेशे वाक्यार्थवोधकमुत्तरोत्तरसूत्रेषु स्वघटकपरसमर्थकमधिकारसूत्रम्। अनेन विधिसूत्राणां संज्ञासुत्राणां च अवधिः निर्दिश्यते। अङ्गाधिकारः, संज्ञाधिकारः, संहिताधिकारः, प्रत्ययाधिकारः, प्रतिपदिकाधिकारश्चेति अनेकविधः अधिकारः उपपादित इति अस्य कार्य्यप्रकारात् अवधीयते। अधिकारो नाम त्रिप्रकारः यथा-१. कश्चित् एकदेशस्थः सर्वशास्त्रमभिज्वलयति प्रदीपवत्, २. द्वितीयो यथा वादिवद४धं काष्ठमनुचकारप्रतियोगमुपतिष्ठते। यथा-'अङ्गस्य' इति। केषाञ्चिन्मते उत्तरोत्तरागमनाधिकार इति स्वरितत्वप्रतिज्ञावलात् अस्योपस्थापनम्। कारिकायामुत्कम्-"प्रतिज्ञास्वरिताः पाणिनीयाः"। नारायणभट्टेनापि तदेव प्रतिपादितम्। सूत्रेषु अनुवर्त्तनीयं सर्वं प्राक्सूत्रेभ्यः अनुवर्तन्ते। तद्व्याख्यायां शरणं त्रयं स्वरितत्वं तु दुर्ग्रहणम्। निषेधोऽपि अन्यः कश्चन विभागः इति केचन प्रतिपायन्ति। वस्तुगत्या विधिसूत्रे तस्य अन्तर्भावो जायते। यस्य विधिसूत्रस्य यत् कार्यं निषेधसूत्रस्यापि तत् कार्यं केवलं निषेधः विधीयते इति विशेषः।

एवं प्रकारेण षड्विधप्रकारभेदमाश्रित्य सूत्रं शब्दशास्त्रे शास्त्रान्तरेषु वा स्वकीयां तनुं वितनुते, येन शब्दानां साधुत्वप्रकारव्यवस्था उपकल्पनीया साधनीया च जायते, यदवलम्ब्य (सूत्रमलम्ब्य) "व्याकरणं षट्सु वेदाङ्गेषु प्राधान्य" भजते च। अपारं किल शब्दशास्त्रमध्येतुमयं सरलतम उपायविशेष इति तात्पर्यम्।

संक्षिप्तानुशीलनमस्योपायस्य प्रमुखमुद्देश्यम्। शब्दानां पदानां च साधुत्वचिारः वैज्ञानिकेनोपायेन कर्त्तब्यो जायते इति अनुशीलनात् प्रतिभाति। सूत्रसञ्चरणविधौ विभिन्नत्र व्याकरणे कौशलस्य विभिन्नता अवलम्बिता जायते ऋश्यते च। इदं प्रतिपादनेन अलं यत् श्रुङ्खलितनियमेन प्रक्रियागतानुशासनेन च शब्दस्य पदस्य वा

सार्वजनीनतासाधनं तदुपस्थापनं वा सूत्रमाध्यमेनैव विहितं दृश्यते। अतः शब्दानुशासनप्रक्रियायां व्याकरणपर्य्यालोचनायां वा 'सूत्रम्' एकमनन्यमसाधारणं साधमिति दिक्।

संदर्भसंकेतसूचीः

१। वायुपुराणम्-८९/१४२
२। उद्धत. वै. सू. १/१/१
३। वाररूचसंग्रहः १.१.१
४। अनेकार्थसग्रहकेशः पृ. ३९
६। कालिदासप्रणीतं सधुवंशम्-२/४
७। मन्त्राणां विनियोजकं सूत्रकल्प-अ.१
८। Panini, his place in sanskrit literature. page-3
९। काशिकावृत्तिः-१.३.३३
१०। पाणिनीयसूत्रम्-४ा.३.६५
११। पाणिनीयसुत्रम्-४.३.११०
श२।महाभाष्यम्-२.३.७६
१३। महाभाष्यम्-पस्माशह्निकम्
१४। महाभाष्यम्-४.२.६६
१५। काशिकावृत्तिः-५.२.५८
१६। म.भा.पृ-६६ - चौखम्बा विद्याभवन, १९६७
१७। महाभाष्य-उद्योत-१.१.१
१८। As I believe that panini was perfectly acquinted the art of writing and that written books been existed long before his time idea of the logical connectikon of rules. (Goldstucker-page-3)
१९। महाभाष्यम्-पश्पसा. (वा)-१३
२०। पाणिनीयसुत्रम-६.१.७७
२१। महाभाष्यम्-पश्पसाह्निकम्, पृ. ४३, ४४ सम्पा चारूदेवशास्त्री
२२। स्वरसिद्धान्तचन्द्रिका-पृ. ६. श्लो-२५ (Annamalai University Edition)
२३। S.C. Chakravorty, Introduction to his edition of Nyaya.
२४। वैयाकरणसिद्धान्तकौमुदी, पृ. १३
(प्राक्कथनम्) व्याख्याकारः-श्री गोपालदत्तपाण्डेयः
२५। तत्रैव-पृ. ७
२६। पा. सू. १.१.२

२७। पा. सू. ६.१.८७
२८। वै. सि. कौमुदी-श्रीगोपालदत्तपाण्डेयः पृ. ७
२९। परिभाषेन्दुशेखरः - विश्वनाथमिश्रः, परि-७, पृ. ३
३०। तत्रैव-परि. १२, पृ. ५२
३१। तत्रैव-परि ३७, पृ. १४७
३२। तत्रैव- प्राक्कथनम्-पृ. १०
३३। पा. सू. १.१.६६
३४। वै. सि. कौमुदी-गापालादत्त पाण्डेय
३५। तत्रैव-पृ. ७
३६। पा. सू.१.४.१
३७। पा. सू. ८.४.३७
३८। वै. सि. कोमुदी-पृ. ७
३९। तत्रैव।

योगविभागस्तथाखण्डतावादः

रुवेल-पालः

व्याकरणशास्त्रे योगशब्दोऽयं[1] पारिभाषिकः। अत्र योगशब्देन सूत्रस्य बोधो जायते। अतः योगः सूत्रं, तस्य विभागो विभाजनं खण्डीकरणम्वा योगाविभागः।

अस्माकं पारस्परिकभावविनिमयस्य अन्यतमा साधनीभूता हि भाषा। भाषायाः परिमार्जनाय, वर्धनाय रक्षणाय च व्याकरणस्यापेक्षा वर्तते। व्याकरणे वर्तते सौत्रपन्था अर्थात् नियमव्यवस्था। वस्तुतः सूत्रद्वारेणैव भाषा मार्जिता रक्षिता वर्धिताश्च भवन्ति। कथंकारिणी सा प्रक्रिया हत्याकाङ्क्षायाम् अत्रोच्यते--प्रचलितायाः भाषायाः परवर्त्तिकाले यथा कालेन विलुप्तिर्न स्यात् तन्निमित्तं सूत्राणि (laws) विरच्यन्ते। ततः कालेन विकृतभाषया यदि भाषाया मिश्रीभवनसम्भावना जायते तर्हि परशीलनाय, पुनः कालतो बुद्धिलोपवशात् भाषा विस्मर्यते चेत् तर्हि तत्रापि प्रक्रियया वर्धनाय च सूत्राणामपेक्षा वर्तते। अर्थात् सूत्रैर्योगैर्वा भाषारूपेष्टसिद्धिर्भवति। अत्रोदाहरणं यथा एधते इतीष्टरूपं भविष्यति लुप्तं मा भूत् इति रक्षणाय, लुप्तश्चेन् पुनः सर्जनाय नाम वर्धनाय, 'एधति' इत्यशुद्धरूपं यथा न स्यात् इति परिशीलनाय च सूत्राणि योगावा अवशयकर्तव्या एव। सुतरामिष्टसिद्धिरेव योगकरणेन प्रयोजनमिति फलति।

जगतः शान्तिरक्षणमेवोद्देश्यं काम्यश्च। तदर्थमेव एकरूपाखण्डतत्त्वमुररीक्रियते। यथा संसारे मातापितृभ्याम् शान्तिरूपेष्टसिद्धये पुत्रकन्याभ्यः एकत्वस्य अखण्डताया अभिन्नतत्त्वस्य वा शिक्षा प्रदीयते। वेदान्तिभिश्च विश्वसंसारस्य शान्तिरक्षणाय ब्रह्मरूपस्य परमात्मरूपस्य वा एकतत्त्वस्य स्वीकारः क्रियते, तद्वदत्रापि व्याकरणे भाषाशृङ्खलारक्षणाय अखण्डयोगस्य आवश्यकता। उदाहरणेन इदं स्पष्टीक्रियते। सुबन्तेन सुबन्तस्य समासो दृग्गोचरीभूयते। अतः सुबन्तसमास इष्टः। एतदिष्टसिद्धये योगः क्रियते 'सह सुपा' (२।१।४)' इति। गुणवाचकत् अस्त्रीलिङ्गशब्दात् विकल्पेन तृतीया पञ्चमी चेष्टा। तथाहि योगः क्रियते 'विभाषा गुणेऽस्त्रियाम् (२।३।२५)' इति। एवमन्ये सर्वे योगा अवगन्तव्याः।

संसारे विश्वसंसारे च शान्तिरक्षणमेव उद्देश्यम्। तदर्थमेव संसारस्य क्षुद्रसंसारे विश्वसंसारस्य च देशप्रदेशादिषु विभागः क्रियते, तत्र संसारखण्डतायाः कारणं खण्डसंसारेऽपि क्वचिदानन्दोपलब्धिः। (Attitude is like to searhc Peacefull atmosphere in nuclear family) । एवम्प्रकारेण व्याकरणोऽपि दृश्यते योगविभागप्रक्रिया। तत्रापि कारणमिष्टसिद्धिः। अत्र इष्टं तावत् सुबन्तेन सुबन्तभिन्नतिङन्तप्रातिपदिकानामपि समासः। तथाहि 'सह सुपा' (२।१।४) इति सूत्रविभागद्वारा 'सह' इत्यकोः योगः सुपा चापरयोगो भवति।

तेन प्रथमेन 'सह' इत्यनेन योगेन सुबन्तस्य येन केनापि सह समासो भवति। तेन तिङन्तेन प्रातिपदिकेन च सह समासे नास्ति काचिद्बाधा।

अपि च अगुणे स्त्रियां च क्वचित् विकल्पेन तृतीया पञ्चमी वा स्यादिति इष्टम्। तत्रापि, 'विभाषा गुणोऽस्त्रियाम्' (२।३।२५)' इति सूत्रस्य विभागद्वारा इष्टसिद्धिः भवति। अतो वक्तुं शक्यते यत् संसारे शान्तिरक्षणाय यथा विभागः क्रियते, संसारसिद्धये एकस्यैव ब्रह्मणः परमात्मनो वा बहुरूपत्वमुररीक्रियते तद्वत् व्याकरणेऽपि शिष्टप्रयुक्तभाषारूपेष्टसिद्धये योगविभागः स्वीक्रियते। तथाहि 'सह सुपा (२।१।४)' इति सूत्रस्य वृत्तावुक्तं दीक्षितेन--" **'सह' इति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगाविभागस्य इष्टसिद्ध्यर्थत्वात् कतिपयतिङन्तोत्तरपदोऽयं समासः, स च छन्दस्येव।"** इति।

'सत्यं ज्ञानमनन्तं ब्रह्म' इति तैत्तिरीयश्रुतेः 'सर्वं खल्विदं ब्रह्म' 'एकं सद्विप्रा बहुधा वदन्ति' इत्यादिश्रुतेश्चावगम्यते यत् ब्रह्म अखण्डाभिन्नपूर्णरूपम् एव। वस्तुतो ब्रह्म स्वजातीयविजातीयस्वगतभेद--रहितमेव। अतो जगत्प्रपञ्चस्य खण्डता भिन्नता वा ब्रह्मणोऽध्यासवशादेव भवति। सुतरां जगतोऽखण्डैकरूपब्रह्मत्वेन एव सत्यत्वं, खण्डत्वेन ममत्वबुद्ध्यध्यस्तजगतः मिथ्यात्वमित्याशयेन शङ्कराचार्येण उक्तं--'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति।

एवम्प्रकारेण व्याकरणे भगवत्पाणिनि-प्रणीतः प्रत्येकं योगोऽखण्डः सम्पूर्णो वैव। तेनात्र वक्तव्यं यत् 'सह सुपा (२।१।४)' विभाषा गुणेऽस्त्रियाम् (२।३।१५) च योगौ पूर्णौ अखण्डौ वा सन्तौ क्रमेण सुबन्तस्य सुबन्तभिन्नतिङन्तप्रातिपदिकैः सह समासस्य, हेतौ गुणवाचका--स्त्रीलिङ्गशब्दात् तथा च अगुणवाचकस्त्रीलिङ्गशब्दात् वैकल्पिकतृतीयपञ्चम्योः साधकौ स्याताम्। वस्तुत एतं योगविभागलब्धमर्थं[3] 'सह सुपा' इति सूत्रे सहेति पदं तथा विभाषा गुणोऽस्त्रियाम्' इति सूत्रे 'विभाषा' इति पदञ्चैव ज्ञापयति। कथमिति जिज्ञासायां प्रतिसूगं पर्यालोच्यतेऽधः--

१. सह सुपा (२।१।४)

ननु अत्र सूत्रे 'सह' इत्येवाकृत्वा सुपा इत्येव कृते 'पिता पुत्रेण गच्छति', 'वृद्धो यूना' चेत्यादिवत् सहार्थस्य प्रतीतेः पुनः सहग्रहणंम् अपृथक्समासार्थं, पृथक्समासे 'राजाश्वः' इत्यादौ द्वौ समासान्तप्रत्ययौ द्वौ स्वरौ च स्यातामिति जेन्न, सहग्रहणा-भावेऽपि 'गर्गाः शतं दण्डयन्ताम्' इत्यादौ अपृथग्भूते समुदाये एव कार्यसम्प्रत्ययात्।[4]। एवञ्च सहग्रहणं सूत्रे व्यर्थं सत् योगाङ्गं भूत्वा योगाविभाग-लब्धार्थं विज्ञापयति। तथाहि भाष्ये-"एवं तर्हि सिद्धे सति यत् सहग्रहणं करोति तस्यैतत् प्रयोजनं 'योगाङ्गं यथा विज्ञायेत'। सति च योगाङ्गे योगविभागः करिष्यते 'सह'। सह सुप्समस्यते। केन सह? समर्थेन। अनुव्यचलत्, अनुप्राविशत्।"[5] इति।

२. विभाषा गुणेऽस्त्रियाम् (२।३।१५)

यदि तृतीयापञ्चम्योः वैकल्पिकविधानमेव प्रकृतसूत्रस्य तात्पर्यं तर्हि विभाषेति अस्य स्थाने 'वा' इत्युक्ते सिद्धे कार्ये, विभाषाग्रहणं व्यर्थं सत् योगाङ्गं भूत्वा योगविभागार्थं विज्ञापयति।

सर्वमेतत् पर्यालीच्य वक्तुं शक्यते यत् पाणिनीयं शास्त्रं नाम सूत्रं योगो वा स्वतः पूर्ण एव। किन्तु अन्धपञ्चकस्य हस्तिदर्शनमिव मोहान्धजीवैर्यथा 'अहं अमुकः, अहं ज्ञानी, अहं सुखी दुःखी वा इत्यादिरूपं क्षुद्राहमेव पुनः पुनः खण्डखण्डतया ज्ञायते[६], परन्तु 'सोऽहं सोऽहं' 'अहं ब्रह्मास्मि' इत्येवं रूपं प्रकृताखण्डस्वरूपमहमिति न ज्ञायते। पुनः ब्रह्मतत्त्वविद्भिश्च स्वतत्त्वप्रतिपादनाय अखण्डब्रह्म अध्यासादेव खण्डितजगता सम्बन्ध अवकल्प्यते, तथैव व्याकरणाम्बुसुधाऽपीताः प्रकृतं पूर्णं योगं योगविभागेन खण्डतया जांनन्ति, किन्तु वैयाकरणैरेव योगस्य नाम शास्त्रस्य अखण्डताया एव प्रतिपादनावसरे सामान्यतो योगविभागः स्वीक्रियते। सुतरां प्रकृततत्त्वस्य मूलतत्त्वस्य प्रामाण्यमखण्डत्वं[७] संगच्छते इति शिवम्।

पादटीका--

१। योगशब्दस्य नैके अर्था भवन्ति। तद्यथा--
क) सन्नहनं कवचादिः ख) उपायः सामदानादिः ग) ध्याने चित्रवृत्तिनिरोधः घ) सङ्गतिः श्लेषः ङ। युक्तिर्योजनम्। 'योगः सत्रहनोपायध्यानसङ्गतियुक्तिषु। (अमरकोषः)। तत्र गणितशास्त्रे योगो नाम संकलनम्।

२। पुरुषसूक्ते आम्नातं यत्--'ततो विश्वङ्व्यक्रामत् साशनाशने अभि ॥४॥' इति अर्थात् पुरुषरूपी परमात्मा साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिरूपम् अनशतं तद्रहितमचेतनं गिरिनद्यादिरूपम् इत्युभयात्मकं जगद्यथा स्यात्तथा स्वयमेव विविधो भूत्वा स्थितः।

३। सुबन्तेन सुबन्तभिन्नतिङ्लप्रातिपदिकानां समासस्तथा च हेतौ क्वचित् अगुणे स्त्रियाञ्च तृतीयापञ्चमीविभत्त्यौ च भवत इत्यर्थः।

४। सहवचनं किमर्थम्? सहवचनं पृथगसमासार्थम् सहवचनं क्रियते। किं प्रयोजनम्? पृथगसमासार्थम्'। सहभूतयोरेव समाससंज्ञा यथा स्यादैकैकस्य समाससंज्ञा मा भूदिति। किं च स्यात्, यद्यकैकस्य समाससंज्ञा स्यात्? इह 'ऋक्पाद' इति समासान्तः प्रसज्येत। इह च 'राजाश्व' इति च द्वौ स्वरौ स्याताम्। कथं च कृत्वैकैकस्य समाससंज्ञा प्राप्नोति? 'प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। तद्यथावृद्धिगुणसंज्ञे प्रत्येकं भवतः। ननु चाऽयमप्यस्ति दृष्टान्तः--'समुदाये वाक्यपरिसमाप्ति'रिनि। तद्यथा ''गर्गाः शतं दण्डयन्ता' मिति, अर्थिनश्च राजानोहिरण्येन भवन्ति, न च प्रत्येकं दण्ड्यन्ति। सत्येतस्मिन् दृष्टान्ते यदि तंत्र प्रत्येकमित्युच्यते, इहापि 'सह'ग्रहणं कर्तव्यम्। अथ तत्रान्तरेण 'प्रत्येक' मिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः इहापि नार्थः सहग्रहणेन भाष्यम सह सुपा।

५. सहग्रहणं भोगविभागार्थं निङापि सह यथा स्यात्। (काशिकावृत्तिः, २।१।४)

६. मोहादनीशतं प्रप्य मग्नो वपुषि शोचति। (पञ्चदशी, चतुर्थोऽध्यायः, द्वैतविवेकप्रकरणम्)।

७. व्याकरणे एको नियमोऽस्ति 'यथोत्तरमुनीनां प्रामाण्यम्' इति। उक्तवचनस्य पूर्वपूर्वमुनीनां वचनाप्रामाण्यत्वे तात्पर्यवधारणं हेयं, शास्त्रास्याप्रमाण्यापत्तेः, तत् कथमिति तु अस्मिन् प्रबन्धे किञ्चिदालोचितं, स्थाने च सम्यग् आलोचयिष्यते। प्रसङ्गेऽस्मिन् परिभाषेन्दुशेखरं--'व्याख्याततो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इत्यस्य परिभाषायां व्याख्यातावसरे भूतिटीकाकारेण श्रीरामकृष्णशास्त्रिणा (तात्याशास्त्रिणा) उक्तं यत्-

-'यथोत्तरमुनीनां प्रामाण्यम् इत्यस्य उत्तरीत्तरमुन्यभिप्रेते अर्थे पूर्वपुर्वमुनीनां तात्पर्यमेव अर्थो न तु पूर्वपूर्वमुनीनामप्रमाण्यमिति, अन्यथा पूर्वशास्त्रस्याप्रामाण्यापत्तिः'। इति।

सहायकग्रन्थनिर्देशः

१। वैयाकरणसिद्धान्तकौमुदी, बालमनोरमा-तत्त्वबोधिनीसहिता (समासप्रभृतितद्धितप्रकरणान्त) द्वितीयो भागः, मोतिलाल बनारसीदास प्रकाशन दिल्ली २०१० वर्षे।

२। व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्द्यतसमुल्लसितम्, प्रथमाध्याय-द्वितीयपादादिद्वितीयाध्यायान्त्म् विधिशेषरूप् द्वितीयं खण्डम् संशोधमः श्री भार्गव शास्त्री जोशी चौखम्बा संस्कृतप्रतिष्ठान प्रकाशन ३५ यू ए जवाहरनगर वंगलो रोड पो बा नं २११३ दिल्ली ११०००७, २००७ वर्षे।

३। वैयाकरणसिद्धान्तकौमुदी समासप्रकरण ड. सच्चिदाननन्द मुखोपाध्याय, प्रकाशमः श्री सत्यनारायण वन्धोपाध्याय, के ३११० मार्कास स्कोयार कलकाता-७।

४। A Higher Sanskrit Grammar and Composition. Dr. Lairi and Sastri दि ढाका स्टुडेन्टस लाइव्रेरी. ५११., श्यामाचरण दे स्टीट् कलकाता-१३, २००९ वर्षे।

५। अष्टाध्यीयसूत्रपाठः पुष्पादीक्षित ज्ञानभारती पब्लिकेशन दिल्ली, २००९ वर्षे।

६। लघुसिद्धान्तकौमुदी, भैमीव्याख्या, चतुर्थभागः समासप्रकरणम् भीमसेन शास्त्री भैमी प्रकाशन, ५३७, लाजापतराय मार्केच, दिल्ली, ११०००६, पञ्चमसंस्करणम् २०११।

७। काशिका, पाणिनीयसूत्रवृत्तिः , डाः श्रीमङ्गलदेवशास्त्री योखम्बा संस्कृत पुस्तकालयः, बेनारस-१।

८। वैयाकरणसिद्धान्तकौमुदी (समासादिद्विरुक्तान्तः द्वितीयभागः) श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, बाराणसी, २०११।

९। व्याकरणमहाभाष्यम् ('ज्योत्स्ना' समुद्भासितम्०, द्वितीयोऽध्यायः, डा हरिनारायणनिवारी, चौखम्बा विद्याभवन बारणसी।

१०। पञ्चदशी, स्वामी वागेशानन्द, उद्बोधन कार्यालय कलकाता-३००००३।

११। अमरकोष वा अमरार्थचन्द्रिका, श्रीमद् गुरुनाथविद्यानिधि, महाचार्य, संस्कृतपुस्तक भाण्डार, कलकाता-६।

मीमांसाशास्त्रे आधारविमर्शः

राजीव सिन्हा

मीमांसामते आधारस्वरूपम्

मीमांसामते आधारणम् आधारशब्दस्य अर्थः। भेदेन आधारो द्विधा विभज्यते। लघ्वाधारः, दीर्घाधारश्च। अर्थः आधारः न कृतमात्र एव प्रधानेषु उपकरोति, यत् कारणं, तस्मिन् काले प्रधानान्येव न सन्ति। यदा तु सर्वाप्यङ्गानि कृतानि, तदा तज्जन्यापूर्वाणि संभूय प्रधानेषु उपकुर्वन्ति। आधारः प्रथमः अमन्त्रकः 'प्रजापतिं मनसाध्यायन् आधारयति' 'तुष्णीमाधारयति' इति श्रुतेः। आधारमाधारयति इति द्रव्यपरा चोदना। द्रव्यं हि अनया क्रियया क्षार्यते, क्षारितं च यागं साधयति। एतदेव आधारणं प्रधानकर्म। आज्यं द्रव्यं, मान्त्रवर्णिकी इन्द्रो देवता। द्रव्यदेवतासंयुक्तमाधारणम्। तस्य यजतेर्नामधेयम्। आधारे 'ऊर्ध्वमाधारयति' इति गुणविशेषविधिः। 'संततमाधारयति' इति सन्ततशब्दस्तु दीर्घधारत्वात् दीर्घाधार यस्य तादृशत्वात् प्रयुक्तः। दर्शपूर्णमासयोराधारं प्रकृत्य श्रूयते। 'सन्ततमाधारयति' इति। तत्रापि क्षणिकत्वान्मन्त्रेण कर्मणः सह तननं न घटते। एकत्वात् कर्मसंतानो नास्ति। तस्मात् द्रव्याभिप्रायः संतानशब्दः[१] (भाष्यम्)। न च कर्मणः क्षणिकत्वेऽपि क्रियायाः एकफलावच्छिन्नव्यापारनिचयरुपत्वात् दीर्घकालत्वसंभवेन साहित्यमुपपद्यते इति[२] वाच्यम्। अवयवानामपि कतिपयत्वेन दीर्घतरमन्त्र साहित्यस्य तथाप्यनुपपत्तेः (सोमः)। ''संततमाधारयति'' इत्यत्र कर्मैकत्वात् तदविच्छेदविधानानुपपत्तेर्मन्त्र-साहित्यमेव विधीयते इति मन्त्रादेः कर्मांश्चि संनिपातः (भाट्टः)। 'आधारेस्यादेवमेव' एवं वसोर्धारा वत् (मण्डनः)। 'संतताधारकर्म च '। मन्त्रान्ते आरभेत। आधारकर्मणः द्रव्यदेवताऽन्वयेन यागरुपता तत्प्रख्याधिकरणे अभिहिता (शंकरः)।

मीमांसामते आधेयस्वरूपम्

आधेयशक्तिः शक्तिवादः इति अत्र द्रष्टव्यम्। शक्तिः अव्यवधानेन शब्दजन्य प्रतीयत्यनुकूला वृतिः अव्यवहितत्वं च अर्थान्तरप्रतीत्यद्वाराकत्वम्। इदं च लक्षणा वरणाय तादृशचेष्टावारणाय चावशिष्टम्। सा च 'अस्मात् पदात् अयमर्थो बोद्धव्यः। इत्याकारिका ''ईश्वरेच्छा'' इति न्यायविदः। पदाथान्तरं इति मीमांसकाः। अस्य एव संकेत इति व्यवहारः। साक्षाच्छब्दजन्यार्थप्रमिति-सहकारिज्ञानविषयत्वं वा। वैयाकरणास्तु बोधकत्वमेव शक्तिः। एवं लक्षणिकाद्यर्थेऽपि शक्तिरेव। अतएव[२] 'सर्वे सर्वार्थवाचकाः इत्याहुः। ''शक्तिः गोत्वादाविव अन्वयेऽपि'' इति वेदान्तिनः। शक्तिस्त्रिधा सहजा आधेया पदशक्तिश्चेति। शक्तिः पदस्य वाक्यस्य वा क्व इति विचारः[३]

'वाक्यार्थे शक्तिः लक्षणा वा', पदानामेव कार्यान्विते अनुभाविका शक्तिः। स्मारिका च जातिगुणादौ। अनुभावकशक्तिग्रहे च स्मारकशक्तिग्रहस्य हेतुता। तेन उपपत्तेः पदानां वाक्यार्थे न शक्तिः। पदानां अन्वये अपि शक्तिः पदेषु स्मारिका अनुभाविका चेति शक्तिद्वयम्। तत्र स्मारिका जोतौ, अनुभाविका कार्यान्विते इति प्रभाकराः। शक्तिः विनियोग योग्यत्वम्। शक्तिः सँस्कारभेदात् शक्त्युद्बोधः। तदनुरोधिनी भिन्ना च शक्तिः एकमपि विषयं भेदेन समर्पयन्ती स्वभेदाग्रहणात् अनेकग्रहणभ्रमं उत्पादयति। शक्तिः समासेषु अङ्गीकार्या इति वैयाकरणाः शक्तयः सर्वभावानां नानुयोज्याः स्व भावतः। तेन नाना वदन्त्यर्थान् प्रकृतिप्रत्ययादयः। अन्यत्र गतया शक्त्या अन्यस्य अविनियोगः। शक्तेः प्रमाणान्तरविषयत्वात् विधिरूपानुगताया अपि न शास्त्रार्थता। शक्तेः शब्दश्रितत्वात् तद्भेदे शक्तिभेदौचित्यम्।[४] 'देशकालनिमित्तानि व्यञ्जकान्यर्थवादिनः'। शक्तीनां कारणस्थानां स्वकार्यनियमं प्रति। सर्वशक्तीनां अर्थापत्तिरेवैकं प्रमाणम्। सहजशक्तौ आधेयशक्तौ च अर्थापत्तिर्मानम्।

शक्तिवादः ननु एवं 'वह्निः दाहानुकुलद्विष्टातीन्द्रियधर्मसमवाची, दाहजनकत्वात् अदृष्टवत् आत्मवत्' इत्यनुमानस्य अनुकूलतर्काभावेन अप्रयोजकत्वात् उत्तेजकाभावविशिष्टम-प्यादिप्रविबन्धकाभावस्यैव दाहजनकतया मप्यादिसमवधाननाश्यतयाऽपि शक्तिकल्पनस्य अनुपपत्तेः तद् बोधक वेदाभावच्च शक्तिरपि न सिध्येत्। इति चेत् न तृणारणिमणीनां व्यभिचारेण वह्नित्वावच्छिन्नजनकत्वग्रहानुपपत्या कायनिष्टवैजात्यकल्पनापूर्वक हेतु हेतुमदभावत्रयकल्पनं अपेक्ष्य तृणादिनिष्टजनकतावच्छेदकसहजशक्त्यङ्गीकारेण एक हेतु हेतुमद्भावकल्पनालाघवतर्कसह कृततृणादिपक्षकवह्नि जनकत्वहेतुकता दृशधर्मानुमानस्य तत्र मानत्वात्। एवं वैकल्पिकव्रीहियवयोरपि हेतुताग्रहे लाघव व्यभिचारवारणं च।[५] "न च प्रदेयप्रकृतित्वेन उभयोर्हेतुत्वात् जनकतावच्छेदक-शक्त्यभावेऽपि न व्यभिचार" इति वाच्यम्। व्रीहिनिष्ठकारणताग्रहे प्रदेय प्रकृतित्वग्रहः तद्ग्रहे च तदग्रहः इत्यन्योन्याश्रयात्।

[६]"नापि आग्नेयत्वव्याप्यवैजात्यस्य कार्यतावच्छेदकत्वकल्पनेन व्यभिचारपरिहारः"। तादृश जातौ मानाभावात्। व्रीहिजन्यतावच्छेदकतयैव तत्कल्पने विकल्पो दत्तजलाञ्जलिः स्थात्। शक्तेश्च प्रत्येकं पर्याप्ततया न समुच्चयापत्तिः। अन्यथा अन्यतराभावविशिष्ठान्यतरस्य उभया भावविशिष्टव्रीह्यादेवाहेतुत्वकल्पने गौरवापत्तिः व्यभिचारश्च। अतो जनकतावच्छेदकतया सहजशक्तिस्तावत् आवश्यकी तयोश्च अयमेव भेदो यत् सहजशक्तिः जनकतावच्छेदिका, आधेयशक्तिः जनाकाजन्या चेति।

एवं आधेयशक्तिरपि प्रोक्षणादिजन्या व्रीहिनिष्ठः अन्यथा प्रोक्षणादिजन्यापूर्वस्य आत्मनिष्ठतया व्रीहीणां प्रोक्षणकर्मत्वानुपपत्तिः। अदृष्टवदात्मसंयोगेन अदृष्टवत्तया कर्मत्वोपपत्तौ घटादीनामपि तत्कर्मत्वापत्तिः। तेन व्रीहजन्यापूर्वजनिका आधेयशक्तिरपि आवश्यकी।

मीमांसामते सप्तमीविचारः

सप्तम्यर्थोऽपि तत्रैव अन्वति स च 'सप्तम्यधिकरणे च' इति सुत्रानुशिष्टं अधिकरणत्वम्। तच्च 'आधारोऽधिकरणम्' इति सूत्रनिरुक्तम्।

ननु अधिकरणत्वं नाम न येन केनचित् संबन्धेन सम्बन्धत्वम्, रुपसादीनामपि परस्पराश्रयत्वपत्तेः। नापि स्वाधेयसम्बन्धित्वम्, आधेयत्वस्यैव निर्वक्तुम् शक्तेः। तस्य स्वाश्रयसम्बन्धित्वरुपत्वे अन्योन्याश्रयप्रसङ्गाच्च। नापि कारणत्वं, निमित्तकारणादौ अतिव्याप्तेः। नापि समवायिकारणत्वं, संयोगेन घटाद्याश्रय जात्याश्रये समवायाश्रये च भूतलादौ अव्याप्तेः।

“यत्तु तद्भिन्नत्वे सति तत्पतनप्रतिबन्धकसंयोगवन्मूर्तत्वं पतनवन्निरुपिताधिकरणत्वम्। पतमानपर्णादौ आश्रयत्ववारणाय सत्यन्तम्। ब्रह्माण्डादिधारकसंयोगाश्रयैश्वरवारणाय मूर्तपदो पादानम्। वस्तुतस्तु ‘यस्मिन् सर्व प्रतिष्ठितम्। चेवेदं धार्यते जगत्’ इत्यादिवचनात् ईश्वरेऽपि अस्त्येव अधिकरणत्वम्। इतरया ब्रह्माण्डादिधारकत्वस्यैव अनुपपत्तेः। अतो मूर्तपदं नैव देयम्। लक्ष्यं द्रव्यनिरुपिताधिकरणत्वम्। आकाशादीनां तु प्रमाणाभावादेव न द्रव्याधारत्वं आधेयत्ववत्। ईश्वरे तु उक्तवचनात् आधारत्ववत् आधेयत्वेऽपि ‘यः पृथिव्याः तिष्ठन् पृथिवीमन्तरो यमयति। ‘ईश्वरः सर्वभुतानां हृद्येशेऽर्जुन तिष्ठति। इत्यादि श्रुतिसमृतिवशात् न क्षतिः। गुणादिनिरुपिताधिकरणत्वं समवायित्वम्। “समवायादिनिरुपितं च तत्तत्स्वरुपसंबन्धित्वम्” इति मतम्।

‘सप्तम्यधिकरणे च’ इति चकारात् दूरान्तिकार्थेभ्योऽपि सप्तमी। ‘वनस्य दूरे अन्तिके वा ग्रामः। दूरे दूरत्वावच्छिन्नप्रदेशे। प्रतियोगित्वं षष्ट्ऽर्थः यद्यपि अत्र अधिकरणत्वादेव सप्तमी प्राप्यते, तथापि द्वितीयादिविभक्तित्रयेण विशेषविहितेन बाधप्रसक्तौ प्रतिप्रसवार्थः चकारः।

एवं ‘क्तस्येविन्वषयस्य कर्मण्युपसंख्यनम्’ इति वार्तिकात् सप्तम्यधिकरणे च इत्यत्रैव वस्तुतो यत्कर्म तस्मिन् सप्तमी। अधीती व्याकरणे अधीतमनेन इति विग्रहः। ‘इष्टादिभ्यश्च’ इति कर्तरि इन् प्रत्ययस्य विधानात्। एतस्य च तद्धितत्वेन ‘कृत पूर्वी कटम्’ इतिवत् द्वितीयायां प्राप्तायां कर्मणि सप्तमीविधीः तद्बाधेन। शाब्दबोधश्च तद्वदेव। कर्मचात्र मूख्यमेव न तु मासादि तेन ‘मासमधीती व्याकरणे’ इत्यत्र काले द्वितीयैव।

एवं “साध्वसाधुप्रयोगे च” साधुः कृष्णो मातरि भवति, असाधुर्मातुले, इत्यत्र सप्तमी। अत्र वैषयिकत्वादिना अधिकरणसप्तम्यैव सिद्धौ पुनर्वचनं षष्ठीनिषेधार्थम्। न च ‘साधुनिपुणाभ्यामर्थायां सप्तम्यप्रतेः इति वक्ष्यमाण सूत्रेणैव साधुशब्दप्रयोगे सप्तमीसिद्धेः एतद्वार्त्तिकि साधुशब्दग्रहणवैयर्थ्यम्। अनर्यायां प्रतिना योगेऽपि साधुशब्दयोगे सप्तमी इत्येवं सार्थक्यात्। न चैवं ‘साधुर्भृत्यो यज्ञः इति षष्ठी प्रयोगानापत्तिः, तत्र यज्ञो भृत्यद्वारकान्वयस्वीकारेण साधुत्वद्वार कान्वयानङ्गीकारात्। न चैवमपि आर्यानर्यादिसाधारण्येन साधुशब्दयोगे सप्तमीविधौ वक्ष्यमाणसुत्रे अर्याग्रहणवैयर्थ्ये निपुणदयोगे आर्यायमेव सप्तमी इत्येवं सार्थक्यात् न चैवं एतद्वाक्येनैव साधुशब्दयोगेऽपि “सप्तमीसिद्धेः” उक्त सुत्रे साधुशब्दग्रहणवैयथ्यम्। उत्तरभाविवार्त्तिकिन पुर्वभविसूत्रे वैयथ्येशंकाया अनुक्तिसहत्वात्। एवं[७] ‘षष्ठी चानादरे’ इति सूत्रात् अनादरविशिष्टलक्ष्यलक्षणभावविवक्षायां षष्ठीसप्तम्य विकल्पेन। ‘रुदति रुदतो वा प्राव्राजीत् रुदन्तं पुत्रमनादृत्य इत्यर्थः।

एवं [८]“स्वामीश्वराधिपतिदायादसाक्षिप्रतिभुप्रसुतैश्च’ इति सूत्रात् एभिः सप्तमिर्योगे षष्ठीसप्तम्यौ स्तः। ‘गोषु गावं वा स्वामी’ निरुपकत्वं विभवत्यर्थः। तस्य च स्वाम्यादिद्वारकः अस्ति क्रियान्वयः।

समानार्थकस्वम्यादित्रयग्रहणं पर्यायान्तर निवृत्यर्थम्। विरुपाणामपि समानार्थानाम् इति वार्त्तिकात् वक्रदण्डौ इतिवत् पदत्रयैकशेषस्तु शब्दस्वरुपपरत्वात् न शङ्क्यः 'गवां गोषु वा प्रसुतः' गा अनुभवितुं जात इत्यर्थः इति हरदत्तः।

एवं[९] 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रत्तेः' इति सुत्रात् 'मातरि साधुर्निपुणो वा' इत्यत्र सप्तमी। आर्चाऽभावे 'निपुणो राज्ञो भृत्यः' इति षष्ठी। प्रतिग्रहणमुपलक्षणम्।[१०] 'साधुर्निपुणो वा मातरं प्रति परि अनु वा'। पूर्वमेव च व्याख्यातप्रायं इदं सूत्रम्।

एवं[११] 'प्रसितोत्सुकाभ्यां तृतीया च' इति सूत्रात् आभ्यां योगे तृतीया स्यात् सप्तमी वा इत्यर्थकात् प्रसित उत्सुको वा हरिणा हरौ वा इत्यत्र विकल्पेन सप्तमी। प्रसितः आसक्तः, न तु प्रकर्षेण शुक्लः। विषयत्वं विभक्त्यर्थः। तृतीयायाः पाक्षिकत्वार्थे वचनम्।

एवं[१२] 'नक्षत्रे च लुपि' इति सूत्रात् नक्षत्रवाचिप्रकृतेः[१३] 'नक्षत्रेण युक्तः कालः' इत्यनेन अण्प्रत्ययस्य[१४] 'लुबविशेषे' इति लुपि कृते नक्षत्रयुक्तकालप्रातिपदिकात् अधिकरणे तृतीयासप्तम्यौ स्तः इत्यर्थकात् 'मूलेन मूले वा देवीमावाहयेत् इत्यादौ सप्तमी, कालिकाधिकरणत्वं विभक्त्यर्थः। अण् प्रत्ययाकरणे न शुद्धनक्षत्रपरत्वे 'पुष्ये शनिः' इत्यादौ सप्तम्येव, न तृतीया। कालपरत्वेऽपि अधिकरणत्वाविव-क्षायाम् 'अद्य पुष्यः' इत्यादौ प्रथमाऽपि।

एवं [१५]'सप्तमीपञ्चम्यौ कारकमध्ये' इति सूत्रात् सजातीययोर्विजातीय-योर्वा कारकयोर्मध्ये यौ कालाध्वानौ तत्र सप्तमीपञ्चम्यौ स्तः इत्यर्थकात् 'अद्य भुक्त्वा अयं द्व्यहे द्व्यहाद्वा भोक्ता, इह स्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्। इत्यादौ विकल्पेन सप्तमी। अत्र यद्यपि भोजनद्वयेऽपि एक एव पुरुषः कर्तृकारकं तथापि अद्यतनकालीनभोजनक्रियानिरूपितकर्तृत्वात् व्यहकालीन भोजनक्रियानिरुपितकर्तृत्वस्य भेदात् कारकद्वयमध्यत्वम्। द्वितीयोदाहरणे तु अयं इति कर्ता, लक्ष्यं इति कर्म, इह इत्यधिकरणम् इति विजातीय मध्यत्वम्। सर्वत्र अधिकरणत्वं विभक्त्यर्थः। अपादानत्वाद्यसंभावत् पक्षे पञ्चमीप्राप्त्यर्थः विधिः।'

एवं अधिकशब्दोनापि योगे 'लोके लोकाद्वा अधिको हरिः' इत्यादौ पञ्चमीसप्तम्यौ ज्ञेये[१६] 'तदस्मिन्नधिकं' [१७]'यस्मादधिकम्' इति च सूत्रीयद्विविधानिर्देशात् निरुपितत्वं विभक्त्यर्थः। स्वसम्बन्धाधिक्याश्रय-वृत्तित्वसंसर्गेण क्रियान्वयी।

एवं [१८] 'यस्मादधिकं यस्य चेश्वर वचनं तत्र सप्तमी' इति सूत्रात् आधिक्यार्थककर्मप्रचनीयुक्ते सप्तमी स्यात् स्यात् इत्यर्थकात् 'अप परार्धे हरेर्गुणः' इत्यादौ सप्तमी। प्रतियोगित्वं सप्तम्यर्थः। स्वसम्बन्ध्याधिक्याश्रयगुणवृत्तित्वेन क्रियान्वयी। उपपदं तात्पर्यग्राहकम्।

एवं [१९]'अधिरीश्वरे' इति सूत्रात् ऐश्वर्ये अधिः कर्मप्रवचनीयसञ्ज्ञः तद्युक्ते एश्वर्यप्रतियोगिनि तदनुयोगिनि च 'अधिरामे भूः' 'अधिभूविरामः' इत्यादौ पर्यायेन सप्तमी। अत्र क्रमेण अनुयोगित्वं प्रतियोगित्वं च सप्तम्यर्थः। स्वसम्बन्ध्यैश्वर्यसम्बन्धीतरवृत्तित्वं आख्यातार्थसंसर्वः। अधिः तात्पर्यग्राहकः रामप्रक्योगिकस्वत्वाश्रयो भूः, भूवृत्तिस्वत्वप्रतियोगी रामः इति च फलितोऽर्थः।

तत् सिद्धं सप्तम्यर्थः शक्यो लाक्षणिको वा सर्वोऽपि भावनान्वयी इति। तदेवं लिङ्गसंख्याव्यतिरिक्तसुबर्थमात्रस्य सिद्धे भावनान्वयः।

